Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीप्रदेशिचरित्रं ॥

( कर्ता—पं० हीरालाल हंसराज )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४४. विक्रमसंवत—१९७४. सने—१९१८.

किं. रु.-३-८-०

☞ श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. जामनगर. ☜

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

## ॥ अथ श्रीप्रदेशीचरित्रं प्रारभ्यते ॥

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीनाभिभूपालकुले गभस्ति—मीक्ष्वाकवंशातुलभूषणं च ॥ योगीश्वरं श्रीपदशैलभूपं । नमाम्यहं श्रीप्रथमं जिनेंद्रं ॥ १ ॥ भव्यांगिनां धर्मसुशांतिकारं । जगज्जनाधीशमनाथनाथं ॥ संतप्तकार्तस्वरदेहकांतिं । मृगांकितं शांतिजिनं नमामि ॥ २ ॥ दूरीकृतः संसृतिरंगसंगो । ह्यंगीकृतो येन निजात्मभावः ॥ विनिर्जितो मन्मथभूपपक्षो । नमाम्यहं श्रीमदरिष्टनेमिं ॥ ३ ॥ नरामरेंद्रार्चितपादपद्मं । वैडूर्यरत्नप्रभदेहकांतिं ॥ भव्यांबुजोल्लासनभास्करं च । जिनेशपार्श्वं प्रणमामि भक्त्या ॥ ४ ॥ सत्प्रातिहार्यातिशयप्रधानं । सुदर्शनज्ञानविभाकरं च ॥ विश्वत्रयोत्तारणयानपात्रं । श्रीवर्ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानं प्रणमामि नित्यं ॥ ५ ॥ जिनाननांभोजवरप्रलीना । विद्वज्जनेभावरकामधेनुं ॥ कवीश्वराणां सुरकल्पवल्लीं । श्रीभारतीं नूनमहं नमामि ॥ ६ ॥ जिनागमांभोधिसुपारगं तं । ज्ञानाश्रितध्यानसमाधिलीनं ॥ नमाम्यहं मेऽत्र गुरुप्रधानं । चारित्रनस्तं विजयाभिधं च ॥ ७ ॥ सत्यामयोरुदुग्धोदककलविधिविहंसराजात्मजेन । हीरलालेन भक्त्या स्वपरहितकृते गद्यबंधोरुवाचा ॥ रम्यं चेदं चरित्रं भविजनसुखदं रच्यते वै प्रदेशि—हमार्ध शर्म्येति पूर्वप्रविरचितचरित्रानुसारेण बोध्यं ॥ ८ ॥ सारसुरप्रकरालंकृतजंबूतरूपलक्षिते जिनकल्याणकोल्लासोल्लसितहृदयोद्भूतप्रमोदातिरेकोच्छलदनेककल्लोलकरप्रकरैर्नर्तनपरापारलवणाब्धिपारावारपरिवेष्टिते जंबूद्वीपेऽनंततीर्थकरोपदिष्टदानादिचतुर्विधधर्ममार्गमंडितं सम्यक्त्वानेकभेदसारणिधोरण्यलंकृतं निरस्तकषायस्तेनस्तोमाविम्भितं विविधाद्भुतभव्यांगिगणानेकधान्योत्पत्तिसंभवं चारित्रपात्रानेकमुनिप्रकरारक्षकरक्षितं भारताभिधानं रम्यं क्षेत्रं वर्तते. तत्र विचित्रर्द्धिसमाकीर्णा तुंगोत्तुंगानेकधनिकागारविभूषिता नानाभव्यजनालिसंकीर्णा सुवर्णरत्ननिचितनानाचित्रसमन्वितार्हन्मंदिरश्रेणिप्रोत्तुंगशिखरस्थानेककांचनदंडोपरिगतनानावर्णपताकालिचित्रितांबरा स्वर्गपुरीनिभनाम कल्पाभिधाना नगर्यस्ति. तस्यां नगर्यां गृहे गृहे विचित्रर्द्धिसमन्वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताः पुत्रपौत्रादिपरिवारयुता महेभ्या वसंति. पुनस्तत्रेभ्यगृहेषु सुवर्णरत्नादिनानालंकारालंकृतांगा महर्द्धिकजनस्त्रियः क्रीडाशुकानामप्यर्हतां स्तुतिगणं पाठयंति. तन्नगर्युद्याने विविधपुष्पावलिमंडितवल्लिमंडपनिकुंजेषु नरनारीनिकराः स्वेछया क्रीडां कुर्वंति. यत्र दंभस्त्वर्हे मंदिर एव दृष्टः. बंधनं च नवमल्लिकादिकुसुमावबद्धप्रमदाधम्मिल्लेष्वेव दृष्टं. विविधक्रयाणकविक्रयैकलब्धलाभा अनेके सार्थवाहास्तत्र नानादेशेभ्यः समागत्य व्यापारं कुर्वंति. लब्ध्वा च भूरिधनममंदानंदोल्लसितहृदयाः पुनर्निजनिजदेशेषु व्रजंति. तत्र धर्मनीतिज्ञः पुत्रवत्पालितप्रजः औदार्यधैर्यगांभीर्यसौंदर्याद्यनेकगुणगणालंकृतः शुभसामुद्रलक्षणलक्षितांगः श्वेतांबिधो महीपतिर्निजराज्यं करोति. इंद्रस्येव तस्यैकातपत्राज्ञा दानमानाद्याकृष्टसकललोकहृदया समस्तमेदिनीतले वरिवर्ति. भानुवद्रिपूणां संतापकारको निशाकर इव मित्राणामाह्लादजनकोऽसौ स्वकीयातुलवीर्येण बलवतोऽप्यरातिनिकरान्निराकरोतिस्म. मन्मथस्य रतिरिव तस्य नृपस्य पतिव्रता पतिभक्ता मुकुटायितपत्येकाज्ञा मानोन्मानप्रमाणपरिणतलक्षणव्यंजनालंकृतांगोपांगा शीलैकालंकृतिधारिणी धारिणीत्यभिधाना महिषी वर्तते. यतः—शीलं सर्वगुणौघमस्तकमणिः शीलं विपद्रक्षणं । शीलं भूषणमुज्ज्वलं मुनिजनैः सर्वैः समासेवितं ॥ दु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वांरोग्रतराग्निदुःखशमने प्रावृट्पयोदोदकं । शीलं सर्वसुखैककारणमतः स्यात्कस्य नो संमतं ॥ १ ॥
तस्या लावण्योपेतं मनोहरं रूपं निरीक्ष्य लज्जया व्याकुलीभूता नागकन्या पातालं, लक्ष्मीः पद्मद्रहे
सुरस्त्रियोऽन्याश्च स्वर्गपुर्यां जगाम. सुरपतिः पौलोम्येव तया समं नित्यं नानालीलाविलासेन पं-
चाक्षसुखविनोदक्रीडां कुर्वन् नृपः सुखं निजसमयं गमयतिस्म. जैनधर्मविचारज्ञसत्प्रीतिर्ज्ञानादिरत्न-
त्रयाराधकवाचंयमचयसद्भक्तिस्त्रिकालं जिनार्चनपरश्चतुर्विधसंघसन्मानैकमानसो विनयादिगुणगणा-
लंकृतः सुपात्रदानसक्तहृदयः षड्विधावश्यकलीनचित्तो ज्ञानोपेतक्रियायुतश्चाङ्गोचितद्वादशव्रतपाल-
नपरोऽसौ नृपो विधिपूर्वकं सदा जैनधर्ममाराधयन् निजजन्म सफलं करोति. यतः—त्रैलोक्ये जि-
नपूजनं प्रतिदिनं संघस्य सन्माननं । स्वाध्यायो गुरुसेवनं च विधिना दानं तथावश्यकं ॥ शक्त्या
च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा । सैष श्रावकपुंगवस्य कथितो धर्मो जिनेंद्रागमे ॥ १ ॥
अथान्यदा कोकिलकुलमधुरकलकलारवोल्लसितजनहृदयोद्भूतामंदानंदे मंजरीपिंजरीभूतानेकाम्रतरु-
घटाच्छादितचंडरश्मिरश्मिनिचये सौरभ्योपेतकुसुमामंदमकरंदासक्तरोलंबमालाझंकाराहूतानेकपारपरि-
वारपरिमंडिते तन्नगरोपांतस्थाम्रशालवने नानाविग्रहलब्धचित्रलब्धिगणालंकृतैः सुसंविग्नज्ञानोपेत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रियापरैर्गौतमाद्यनेकतपोधनैर्युतः प्रातिहार्याष्टकविराजितो निर्जरनिकरनिर्मितस्वर्णपंकजोपरि संचरन् ग्रामाकरपुरादौ भव्याब्जानि प्रबोधयन् श्रीवर्धमानजिनेश्वरः समाययौ. तत्रैवं श्रीवीरतीर्थेशं समवसृतं ज्ञात्वा वनपालोऽतीवहृष्टहृदयो मनोहरफलपुष्पपाणिर्नृपतेर्वर्धापनाय शीघ्रं राजद्वारं संप्राप्तः. तत्र सभास्थं नृपतिं नत्वा ललाटबद्धांजलिर्विनययुतः श्रीवीरजिनागमनोदंतेन वर्धापयामास. नृपोऽपि वनपालमुखाज्जिनागमनं श्रुत्वा प्रमोदप्रकरपुलकितांगस्तस्मै संतोषदानं दत्वा तं व्यसर्जयत्. ततस्त्यक्तसिंहासनो नृप उत्तरासंगं विधाय श्रीवीरदिशमुद्दिश्य सप्ताष्टांह्रिमितां भूमिं जगाम. ततः प्रभुं मनसि निधाय कृतत्रिप्रणामो नृपो मुक्ताशुक्तिमुद्रां विधाय गंभीरस्वरैः स्तवतिस्म.—श्रीसिद्धार्थकुलांबरे दिनकरं भव्यांगिनां मुक्तिदं । बाह्याभ्यंतरशत्रुवर्गदलनप्रह्वैकरूत्वं जिनं ॥ संसारांबुधिसंपतत्सुभविनामालंबनं द्वीपवत् । सद्भक्त्या प्रणमाम्यहं त्रिजगतामीशं महावीरकं ॥ १ ॥ देवेंद्रासुरमानवेंद्रमहितं मिथ्यात्वविध्वंसकं । त्रैलोक्यार्तिविनाशिनं गुणनिधिं भव्यौघसंतारकं ॥ भावद्वायकशुद्धदर्शनयुतं सत्साद्यनंतस्थितिं । सद्भक्त्या प्रणमाम्यहं त्रिजगतामीशं महावीरकं ॥ २ ॥ संसारभ्रमघर्मतप्तमनुजान् सच्छांतिभावप्रदं । जैनोक्त्यमृतपानपुष्टमनुजान् कल्याणसंपादकं ॥ लोकालो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कविभासकं च विमलं कैवल्यलक्ष्मीयुतं । सद्भक्त्या प्रणमाम्यहं त्रिजगतामीशं महावीरकं ॥ २ ॥
तदनंतरं महीपतिः शक्रस्तवं विधाय प्रभुं च नमस्कृत्य निजासनमलंचकार. ततो जिनवंदनयात्रो-
त्सुको हृदयाद्भुतप्रमोदातिरेकवान् मेदिनीपतिः पर्यधात्स्वांगोपांगेषु विविधाभूषणवस्त्राणि. रेजे चा-
सौ सुवर्णरत्नजटितैर्मुकुटाद्यलंकारैरलंकृतांगः कल्पतरुरिव. अथो प्राप्तनृपादेशाः किंकरा जिनवंदन-
यात्रार्थं गजरथहयसुभटालंकृतं सैन्यं सज्जीचक्रुः. उदयाद्रिमर्यमेव नृपोऽपि गजजातीयमैरावणोन्नतं
महागजेंद्रमारुरोह. चेलुश्चाग्रे सिंदूरपूरालंकृतगंडस्थला गलन्मदपरिमलाकृष्टानेकरोलंबकदंबकाः स्व
भाराक्रमणखिन्नां मेदिनीमितस्ततश्चलत्स्वकर्णतालवृंतकैर्वीजयंत इव स्तंबेरमाः. प्रससुश्चाह्वयंत इव
स्वकीयहेषारवैर्गगनगमनप्रवणांस्तरणिहयान् प्लवमानास्तुरंगमाः. चेलुश्च स्वचित्कारनादैर्दिनकररथं
स्पर्धयंत इव विविधवर्णपताकाभिमंडिताः स्यंदनाः. कुंतासिशरादिविविधायुधगणालंकृतपाणयोऽनेके
पदातयो वैरिमेदिनीपत्यनीकविजयायोल्लसिता इव श्रेणिबद्धा व्रजंतिस्म. एवं गजघटाघंटामितटणा-
त्कारैः स्यंदनस्तोमक्रमणोद्भूतचित्कारैर्मदोन्मत्तोत्तुंगमातंगघनगर्जितैर्वर्यतूर्यनिनादोत्करैः पदानीकप्र-
कटितपंचाननिनादनिकरैः परिपूरिताखिलगगनमंडलांगणदिकचक्रवालो नृपालो नगरीमध्यगराज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्गेण संचरन् क्रमेण भव्यनरनारीपरिवारपरिवारितो जिननमस्कृत्युत्सुकमानसः समुल्लंध्य वरगोपु
रद्वारं समागतश्च जिनपतिपादारविंदपवित्रिते तत्राम्रशालवने. जिनसमवसरणदर्शनानंतरं मुक्तसक-
लाम्बवारः पादचारिनृपः पंचाभिगमनपूर्वकं भगवंतं त्रिःप्रदक्षिणीकृत्य विनयेन ललाटतटाचरितांज-
लिपुटो नत्वा जिनसन्मुखमुत्कटासनो जिनवदनशशांकोद्भूतवचनामृतपानपिपासुर्घनसलिलस्पृहया-
लुश्चातक इव यथास्थानं तत्र निषसाद. भगवान् वर्धमानोऽपि नृपं तं धर्मश्रवणयोग्यं विज्ञाय प्रा-
रेभे घनगर्जनगभीरया गिरा धर्मोपदेश—अपारसंसारसमुद्रमध्ये । पोतंव मानुष्यमवाप्य जन्म ॥
भव्या वितन्वंतु सुधर्मयत्नं । समीहितं येन सुखं प्रयांतु ॥ १ ॥ विभावजानंदमनित्यभावं । क्षणे
क्षणे योगवियोगरूपं ॥ ज्ञात्वापि धर्मं न करोति मूढ—श्चिंतामणिं पातयति प्रमादात् ॥ २ ॥ सं-
सारसौख्यं क्षणभंगुरं च । यथा कुशाग्रे खलु वारिबिंदुः ॥ तथा जनायुरपि दृष्टनष्टं । यथैव वृक्ष-
स्थितपांडुपर्णं ॥ ३ ॥ परोद्भवानंदमथाप्यमानं । सारं न पश्यंति बुधाश्च सर्वे ॥ तं चित्रसंध्याभ्रवि-
भासमानं । दधाति बालः प्रमदं निरीक्ष्य ॥ ४ ॥ नरेंद्र मीनध्वजजन्यसौख्याद् । दुःखौघमायांति
हि भूरिसत्वाः ॥ गजेंद्रवत्स्पर्शवशेन नारीं । दृष्ट्वैव बंधादिकमाप्नुवंति ॥ ५ ॥ झषादयः स्वादरसेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृत्युं । घ्राणेन भृंगा वरगंधरक्ताः ॥ नेत्रैः पतंगाः श्रवणैर्मृगाश्च । बंधादिकं दुःखमवाप्नुवंति ॥ ६ ॥
प्रत्येकमेवं स्वसुखप्रसंगैः । प्राणक्षयं दुर्धरदुःखमेति ॥ सत्वाश्च पंचाक्षसुखप्रसक्ता । अधोगतिं यांति
कुलापवादं ॥ ७ ॥ जिनोक्तदृष्टांतदशस्वरूपं । संप्राप्य दुर्लभ्यनरावतारं ॥ क्षेत्रार्यवंशोत्तमदेहरूप—
दीर्घायुषां योगमवाप्य पुण्यैः ॥ ८ ॥ वाचंयमानां परमां च सेवां । स्याद्वादपक्षान्विततत्वभावं ॥ स-
म्यक्त्वहेतुं शिवशंबलं च । धर्मप्रयत्नं न करोति मूढः ॥ ९ ॥ युग्मं ॥ मर्त्यो जरामृत्युगदादिकानां
। विश्वासमालंब्य कथं प्रसुप्तः ॥ प्रमादनिद्रां च विहाय सारं । देशांतरं गच्छतु शैवमिच्छुः ॥ १० ॥
कलत्रवित्तार्जकबंधुसंग—विचित्रपंचाक्षसुखानि सर्वे ॥ पश्यंति नित्यत्वतया ह्यहात्र । पद्मांबुमुक्ता
फलसन्निभानि ॥ ११ ॥ नरोग्रवीर्यान्विननारीरक्ते । बीभत्सरौद्रेऽशुचिगर्भवासे ॥ उद्वेगभाजोऽशु-
चिकर्दमे च । दुःकर्मयोगेन वसंत्यनेके ॥ १२ ॥ कर्माष्टपाशैर्भवपत्तने च । बद्धा जनाः खेदयुता-
श्च सर्वे ॥ दुःखोग्रसंघातमवाप्नुवंति । तत्त्राणकस्तत्र न कोऽपि लोके ॥ १३ ॥ दुर्व्याधिसक्ताः स-
न्मार्गनष्टा । दुःकर्मयोगैर्भवकानने च ॥ जीवा वराकाश्च परिभ्रमंति । न कोऽपि तेषां हि शरण्य
तुल्यः ॥ १४ ॥ कांता च माता जननी कलत्रं । पितार्जकः सोऽपि पिता तथैव ॥ कर्मप्रणुन्ना हि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनाः समस्ता । जवाब्धिमध्ये ग्रथिला जवंति ॥ १५ ॥ ब्रमन् जवाब्धौ विविधर्द्धिबंधु—सत्संगमोऽमृत्सहमा तदंतः ॥ तथापि धर्मं न करोति यत्नं । जीवो हि मूढः खलु मुह्यते च ॥१६॥ त्यक्त्वा प्रमादं जिनधर्मसंगं । कुर्वन्नजस्रं जववारणाय ॥ सौजाग्यविद्याजरकीर्तिलक्ष्मी–माप्नोति जीवः खलु मोक्षवासं ॥ १७ ॥ यतः—धर्माज्जन्म कुले शरीरपटुता सौजाग्यमायुर्बलं । धर्मेणैव भवंति निर्मलयशोविद्यार्थसंपत्तयः ॥ कांताराच्च जयाच्च शीघ्रमिह हि धर्मः परित्रायते । धर्मः सम्यगुपासितो हि जविनां स्वर्गापवर्गप्रदः ॥ १८ ॥ एवं धर्मोपदेशं दत्वा श्रीज्ञाननंदने जगवति विरते प्रबुद्धाः केचिद्भव्याः सम्यक्त्वं, केचिद्देशविरतिं केचिच्च सर्वविरतिं जगृहुः. श्रुतनिबिडघनगर्जनाप्तोल्लासा मयूरा इव जिनगभीरदेशनाध्वनिं निशम्यामंदानंदसंदोहप्रफुल्लहृदया नृपादयो जना निजजन्मानि सफलानि मन्यमानाः, संसारापारपारावारोत्तीर्णा इव जिनपादारविंदप्रवहणयोगतः, परिवारयुता निजं निजं स्थानंप्रति जग्मुः. सुरासुरपरिवारगौतमादिवाचंयमैःसंसेवितचरणयुगलो जगवान् वर्धमानोऽपि तत्रोद्याने सुखं तस्थौ.

इतश्च सौधर्मदेवलोके सूर्याजाजिधविमाने सुधर्माजो विशालः सजामंमपो वर्तते. वसति च

For Private And Personal Use Only

तत्र स्वर्णरत्नविनिर्मिते सूर्याभाभिधविष्टरे सूर्यातिशायिकांतिमान् सूर्याभाभिधानो निर्जरोत्तमः. चतुःसहस्रसामानिकदेवैश्चतुःसहस्रपरिवारोपेतचतुर्महिषीभिर्बाह्याभ्यंतरमध्यभेदत्रिसभास्थानैकाज्ञाधीनदेवदेवीगणैः सप्तानीकपत्युपेतनिजात्मरक्षकषोडशसहस्रसुरैः परिवारितः स सूर्याभदेवो निर्जरनिकराहतविविधवाजित्रदिव्यध्वानबंधुरमप्सरःप्रकरविधीयमानमनोहरसंगीतोपेतनाटकं प्रेक्षयन् दिव्याभरणसहस्रालंकृतदेहभागो दिव्यभोगान् भुनक्तिस्म. अथैकदा स सूर्याभदेवः सभास्थो भवस्थावधिबोधेन तिर्यग्लोकं समीक्षयन् जंबूद्वीपं पश्यतिस्म. तत्रामलकल्पोपांतस्थाम्रशालवने समवसृतं भगवंतं श्रीवर्धमानजिनेश्वरं दृष्ट्वा जातोऽसौ प्रमोदभरमेदुरांतःकरणः, विमुच्य च निजसिंहासनं समुत्थाय विहितोत्तरासंगः श्रीवीरसन्मुखं सप्ताष्टांह्रिमितां भूमिं गत्वा त्रिकयोगसमन्वितः संकुचितवामजानुर्भूतलन्यस्तदक्षिणजानुः ललाटपट्टकृतांजलिपुटोऽसौ पंचांगैः प्रभुं प्रणनाम. एवं वारत्रयं नमस्कृत्य च जिनं स्वभावानुभावयोगेन कृतमुक्ताशुक्तिमुद्रः स एवं चैत्यवंदनमुच्चचार.—सिद्धार्थपुत्रं त्रिशलोद्भवं च । मुक्तं जरामृत्युविभावसंगैः ॥ सुसंयमध्यानसुरक्तचित्तं । नमाम्यहं श्रीजिनवर्धमानं ॥ १ ॥ भावारिमातंगदलद्विपारिं । सुदर्शनज्ञाननिधानपुंजं ॥ लोकत्रयोद्भासनभास्करं च । नमा-

म्यहं श्रीजिनवर्धमानं ॥ २ ॥ संसारवारांनिधियानपात्रं । निजात्मनावालयलीनचित्तं ॥ सुदर्शन-
ज्ञायकनावयुक्तं । नमाम्यहं श्रीजिनवर्धमानं ॥ ३ ॥ प्ररूपिनो द्वंद्वविधः सुधर्म—स्त्रैलोक्यकल्या-
णविधायकश्च ॥ सर्वप्रदेशैर्विमलात्मरूपं । नमाम्यहं श्रीजिनवर्धमानं ॥ ४ ॥ त्वदीयनाषामृतपान-
योगै—र्मयार्जितं दर्शनमत्र शुद्धं ॥ यथार्थषड्द्रव्यविकासकं च । नमाम्यहं श्रीजिनवर्धमानं ॥ ५ ॥
तुन्यं नमः शत्रुनिकंदनाय । तुन्यं नमो विश्वविन्नूषणाय ॥ तुभ्यं नमो लोकैकरूपकाय । तुन्यं
नमो विश्वत्रराधिपाय ॥ ६ ॥ एवं रम्यार्थपदोपेतं चैत्यवंदनं विधाय कृतशक्रस्तव सूर्यानो हृदयधृ-
तवीरजिनध्यानो निजात्मश्रेयोलानाय जिनरूपं मनसि नावयन् प्रमोदातिरेकात्प्रन्नुं स्तवतिस्म. सु-
दर्शनज्ञानगुणाधिकश्च । ममात्मगेहे खलु सूर्यतुल्यः ॥ अज्ञानतामिस्रविनाशनाय । जिनेश्वर त्वं
खलु शक्रपूज्यः ॥ १ ॥ धर्मस्त्वया त्राणकृते त्रिलोक्याः । प्ररूपितः सुष्टुममाधिनावैः ॥ त्वदीयसद्द-
र्शनभाववर्ह्नै—र्नैव प्रलेभे खलु शुद्धबोधः ॥ २ ॥ सिद्धार्थवंशोद्भवमुक्तरूपो । नवाब्धिमज्जद्धरया
नपात्रं । त्वद्भक्तितो मेऽत्र सुदर्शनाप्ति—र्नवे नवे वीर नवत्वमेया ॥ ३ ॥ पादांबुजं ते खलु मोक्ष-
लक्ष्मी—र्लब्ध्वा स्थिता या चपलापि नित्यं ॥ प्रनावनस्ते धरणीतलेऽपि । मारीतीनां नो हि नयं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कदापि ॥ ४ ॥ अचिंत्यचिंतामणिकामकुंभा । त्वत्पादसेवा शिवसौख्यहेतुः ॥ पुण्यानुयोगेन मया
द्य लब्धं । त्वद्दर्शनं नाथ नमाम्यहं त्वां ॥ ५ ॥ मिथ्यात्वसक्ताश्च पराङ्मुखास्ते । त्वद्दर्शनं नैव
जना लभंते ॥ त्वत्पादसंसेवनमुक्तचित्तो । गोशालकोऽभूद्भवसंगगामी ॥ ६ ॥ ते गौतमादिश्रमणैः
प्रसादा—दुत्पादितं स्वात्मनि शुद्धरूपं ॥ त्वद्वासनादेव जगन्मनुष्या । ज्ञानं क्रियासयुतमाप्नुवंति
॥ ७ ॥ मयापि ते पादयुगप्रसादात् । सुनिर्मलं हंत सुदर्शनं च ॥ लब्धं सुदिव्यर्द्धिसुखस्वरूपं ।
नमामि ते पादयुगं ततोऽहं ॥ ८ ॥ एवं कृतजिनस्तवः सूर्याभनिर्जरेशः स्वसिंहासने समुपविश्य
निजमनसि चिंतयतिस्म. तत्रामलकल्पाया बहिराम्रशालोद्याने ज्ञानदर्शनसंपन्नो भगवान् श्रीवर्ध
मानो जिनेश्वरः समवसृतोऽस्ति. ये भव्यजनास्तस्य जंगमतीर्थस्य भावेन स्तवनार्चने कुर्वंति, तत्प
दांबुजं च नत्वा हृदयगतप्रश्नानि पृच्छंति, प्रभुमुखान्निशम्य चोत्तरं सफलं निजभवं कुर्वंति, पुनःपु
नश्च तन्मुखदर्शनलाभमनुभवंति त एव खलु धन्याः. ममापि खलु जिनपूजनमेव सुखकल्याणक्षे
मनिरारोग्यकारणं, ततोऽहं तत्र गत्वा बहुसत्कारसन्मानपुरस्सरं श्रीवर्धमानपादारविंदं पर्युपासामि,
वियोगशुद्धात्मा त्रिप्रदक्षिणपूर्वकं तं नत्वा भावेन तद्वचनामृतं च निपीय हृदयस्थामितसंसारपरि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रमणोत्पन्नसंतापं परिहरामीति निजमनसि विचिंत्यासौ त्वरितं निजाभियोगिकसुरं समाहूयेत्यादेशं ददातिस्म. अहोऽधुना जंबूद्वीपे दाक्षिणात्ये भारते मध्यखंडे आमलकल्पपुरोपांतस्थरसालसालको द्याने गौतमादिपरिवारपरिवारितो भगवान् श्रीवर्धमानो जिनेश्वरः समवसृतोऽस्ति. त्वं च तत्र त्वरितं गत्वा भगवते त्रिप्रदक्षिणनतिपूर्वकं स्वाभिधानं निवेद्य समंताद्योजनमंडलां भूमिं शुचीकुरु? ततः काष्टपत्रादिकं दूरीकृत्य. रजोवर्गोपशांत्यर्थं सुगंधांबुवर्षणं विधाय. भासुरविविधवर्णोपेतचतुष्टकोद्भूतसुगंधपुष्पाणामाजानुवृष्टिं विधाय कृष्णागुर्वादिरम्यधूपेन मघमघायितां भूमिं कुरु? इत्यादिकं ममादेशं शीघ्रं विधाय पुनर्मम समर्पय? एतद्राज्ञाक्तं निशम्य विनयावनतदेहेन बद्धांजलिनाभियोगिकदेवेनापि स्वाम्यादेशः समादृतः. ततोऽसावत्यंतप्रमोदतः करौ संयोज्यावदत्, हे स्वामिन्! भवदादेशमहं सम्यग् करिष्ये. इत्युक्त्वा सोऽभियोगिकसुरः पूर्वोत्तरदिगसन्मुख वैक्रियसमुद्घातं विधाय वज्रवैडूर्यमाणिक्यहंसगर्भमसारगल्लरजतजातरूपांजनविद्रुमस्फाटिकारिष्टसूर्यचंद्रकांतादीनां सूक्ष्मसारपुद्गलान् समादाय स्वकीय दिव्यं स्वरूपं प्रकटीचकार. अथोत्तरवैक्रियदिव्यदेहधरोऽसौ चतुर्विधां दिव्यगतिमाहृत्य त्वरितमसंख्यसागरद्वीपं तिर्यग्लोकं समुल्लंघ्य क्रमेण जंबूद्वीपे दक्षिणभारते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरामलकल्पबाह्ये रसालकानने ययौ. तत्र कृतत्रिप्रदक्षिणो भगवंतं श्रीवर्धमानजिनेंद्रं प्रणम्य स्वाभिधानसूचनपूर्वकं स्तुत्वा स उवाच हे स्वामिन्! भवदाज्ञयाहं युष्मदुपासनं कर्तुमिच्छामि. तद्वचनं श्रुत्वा भगवानुवाच हे सुरोत्तम! चतुर्निकायदेवानामयमेवाचारः. निशम्य चैवं घनगर्जनगभीरां वीरवाचममंदानंदसंदोहोल्लसितहृदयोऽसौ देवस्तत्र चतुर्दिक्षु योजनोन्मितं भूमिमंडलं निरस्ततृणपर्णकचवरादिकं व्यधात. ततो वरमेघान् विकुर्व्य रजोवर्गोपशांत्यर्थं सुरभिसूक्ष्मवरवारिवृष्टिं स नभोनिस्म. तदनंतरं च चकारासौ पंचवर्णोपेतकुंदमुचकुंदमालतीपाटलचंपकजात्याद्यनेकवरकुसुमानामधोवृंतानामाजानुमानां सुवृष्टिं. ततोऽसौ कृष्णागुर्वादिवरसुरभिद्रव्यधूपैर्मघमघायितामभितो योजनैकप्रमाणां भूमिं देवलोकसन्निभां विधाय, प्रणम्य च जिनं स्वं स्थानं गत्वा निजस्वामिनं सूर्याभदेवं तं सकलमप्युदंतं विनयावनतो निवेदयामास. सूर्याभोऽपि निजादेशपूर्णीभवनेन हृष्टतुष्टहृदयो निजपदात्यनीकाधिपतिमाह्वयत. सोऽपि द्रुतं तत्र समागत्य स्वाम्यादेशश्रवणेच्छया विनयावनतस्तत्सन्मुखं बद्धांजलिपुटः संस्थितः. तदा सूर्याभ उवाच भो सैन्याधिपते मदाज्ञया त्वं सुधर्मसंसन्मध्यस्थं मधुरध्वनिगंभीरं योजनोन्मितमंडलं सुस्वराभिधं महाघोषं सुघंटं ताडय? निवेदय च सर्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नपि देवदेवीगणान् यद्भवत्स्वामी सूर्याभः श्रीवर्धमानजिनेश्वरवंदनार्थं जंबूद्वीपे दक्षिणभारते आमलकल्पोपांतस्थाम्रशालवने याति, अतो यूयं सर्वेऽपि स्वस्वपरिवारर्द्धिसमन्विता निजनिजयानसमारूढा वेगतस्तत्र समागच्छत ? यतो धर्मोद्यमविधौ विलंबो न कर्तव्यः. एवं वारत्रिकमुद्घोषणां विधाय तं सुस्वराभिधं महाघोषं सुघंटं ताडय ? कृत्वा चैवमेनां मदीयाज्ञां पुनर्मे समर्पय ? श्रुत्वैवं प्रभोर्गिरं स्वाम्यादेशकरणैकहृदयः सोऽनीकाधिपतिरपि पूर्वोक्तोद्घोषणापूर्वकं वारत्रिकं सुस्वरघंटनादं विधाय पंचेंद्रियदिव्यसुखासक्तानां सर्वेषामपि देवदेवीगणानां प्रमादनिद्राजागरणं कृतवान्. सुस्वरघंटानादश्रवणप्रमुक्तप्रमादनिद्राः स्वस्वामिसूर्याभदेवस्याज्ञां मुकुटमिवोत्तमांगस्थां विधाय वीरवंदनगमनप्रमोदभरपुलकितांगा सर्वेऽपि देवदेवीगणा निजनिजविमानस्था स्वस्वपरिवारर्द्धिसमन्विता वेगेन तत्रागमनोत्सुकाः संजाताः. केचिज्जिनेंद्रयात्रार्चनाद्युत्सुकहृदयाः, केचित्कौतुकैकविलोकनार्थिनः. केचित्प्रश्नव्याकरणार्थिनः केचिज्जीतमिदमस्माकमिति मन्यमानाः. केचिज्जिनवचनरचनाभंगिश्रवणार्थिनः, केचिच्च स्वस्वामिप्रेमवशंवदाः, केचिच्च स्वप्रेमभाजनप्रमदाजनप्रेरिता नानाविधालंकारालंकृतांगास्तत्र सूर्याभांतिके सुराः समाययुः. एवं तान् समेतानालोक्य प्रमुदितः सूर्याभदेवो निजाभियोगिक-

देवाय लक्षयोजनविस्तृतविविधमणिरत्ननिर्मितनिजविमानसज्जीकरणायादिशत्. सोऽपि स्वाम्यादेशं लब्ध्वा वज्रवैडूर्यनिर्मितानेकस्तंभसुशोभितं, नानारत्ननिर्मितानेकसोपानपंक्तिविराजितं. निर्मलमौक्तिकोत्करानेकस्तबकमंडितं, सूर्यचंद्राश्मादिविविधरत्नोत्करविनिर्मितानेकतोरणालिमलंकृतं. सुखकरसुकोमलस्पर्शसारसंभारोपेतं, नृत्यासक्तपणांगनोरुपंक्तिमंडितं. नंद्यावर्त्तसुवर्धमानकलशश्रीवत्सभद्रासनमीनस्वस्तिकदर्पणाद्यलंकृतं. पुष्पावल्युद्भवचारुगंधोन्मत्तभ्रमरराजिविराजितझंकारनादप्रमादितामरगणं, नानावर्णपताकिकालिविचित्रितांबरं. कुंदाद्यनेकपुष्पमालालंकृतवक्षःस्थलानेकपांचालिपरिकलितं, कृष्णागुर्वाद्यनेकसुरभिद्रव्यधूपौघमघमघायितं, स्फटिकरत्नतलविराजितं, व्याघ्रोरभ्रवराहसिंहवृषनागाद्यनेकचित्रविचित्रितभित्तिकं विमानं व्यरचत्. तत्र विमाने जीमूतांजनभृंगकज्जलफणिजंबूफलमातंगार्भकगुंजार्धकणवीराशोकबंधुकेभ्योऽप्यधिकतेजोयुक्ता अंजनरत्ननिर्मिताः, वैडूर्यकेकिकंठमधुकरनीलोत्पलनीलाशोकशुकादिवर्णातिशायिनीलरत्नमंडिताः, चंपकसुवर्णकुष्मांडप्रसूनातिरेककांतियुक्तपीतवर्णरत्नालंकृताः, सिंदूरप्रकरप्रवालनिकरागस्त्योद्गमालिप्रभातोऽधिकरक्तकांत्युपेतसन्माणिक्यरत्नबंधुराः, हंसपद्मकुमुदक्षीराब्धिफेनरूप्याचलज्योत्स्नाश्रीखंडादिशुभ्रपदार्थातिशायिसद्वज्ररत्नोपेता अनेके गवा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

द्रा विभांतिस्म. तन्मध्यभागे मार्दवेन तिरस्कृतगोदोहोद्भवफेनसारगंगापुलिनभागं सूर्याभासनं शो-
भते. गांगप्रवाहौघविडंबकाभ्यां श्वेतचामराभ्यां वीज्यमानः सूर्याभदेवस्तत्रासने समुपविशतिस्म. पु-
नस्तेनाभियोगिकदेवेन तत्रेशानवायुकोणयोर्निर्मितेषु नानारत्नजटितस्वर्णादिखचितेष्वनेकेष्वास-
नेषु सामानिकादयोऽनेके निर्जरा उपविशंतिस्म. पूर्वदिशि च तत्र तन्महिषीणां भद्रासनानि वि-
भांति, अग्निकोणे च पारिषद्यामराणामनेकान्यासनानि शोभंते, दक्षिणदिग्भागे च मध्यमदेवयो-
ग्यान्यासनानि संति. नैरृत्ये बाह्यपरिषद्देवानां सिंहासनानि राजंते, पाश्चिमात्ये प्रदेशे च सप्तानी-
काधिपानां सप्त भद्रासनान्यभवन्. मुख्यसिंहासनाच्चतुर्दिक्षु तदात्मरक्षकदेवानां मनोहराण्यासनानि
भ्राजंते. अथ स सूर्याभनिर्जरेशः कृतोत्तरवैक्रियो देवदेवीपरिकरान्वितश्छत्रदर्पणभृंगारादिभिः कृ-
तमंगलो वीज्यमानचामरद्वंद्वोऽमंदानंदोत्सवोल्लसितहृदयसुरगणकृतजयजयारवैरभिनंद्यमानस्ततो ग-
गनमार्गेण व्रजतिस्म. विमानाग्रभागे जयंतीविजयाभिधे द्वे पताके वायुप्रेरणतो गगनमंडलमुल्लि-
खंत्याविव चलतः. तदग्रे च वज्ररत्नदंडमंडितं रविरोचिर्गणोद्दीप्रं चंद्रबिंबमिवोज्ज्वलं विस्तृतमातपत्रं
राजते. तदग्रे मणिरत्नविनिर्मितं पादपीठयुतं मनोहरमेकं सिंहासनं चलति. तदग्रे वज्रदंडविनिर्मितः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंचवर्णपताकिकाभिरभिनंदनीयो निर्जरगणैर्निषेव्यमानः शक्रध्वजश्चरति. तदग्रे कुंतासितोमरशरधनुगणितास्त्रगणालंकृतपाणयः सहस्रशः सुभटा व्रजंतिस्म. स आभियोगिकदेवोऽपि निजपरिवारपरिवृतः स्वकीयामितर्द्धिसंयुतो यथेच्छयामंदानंदोल्लसितहृदयश्चलतिस्म. एवमन्येऽपि वैमानिकदिवौकसो निजनिजविमानस्था अमितालंकारनिकरालंकृतांगा ऋद्ध्या च सूर्याभसदृशश्चलंतिस्म. एवं ते सर्वेऽपि सौधर्मदेवलोकमध्यमार्गेण चलंतः क्रमेणाग्रे उत्तरदिग्विभागे गताः. ततो यथाक्रममसंख्यसागरद्वीपानुल्लंघ्य ते सर्वेऽपि नंदीश्वराख्यवरद्वीपे संप्रापुः. तत्र च ते पूर्वदक्षिणकोणस्थेऽतीवरम्ये रतिकराभिधाचले संप्राप्य सकलां स्वकीयर्द्धिं संक्षेप्याग्रे चेलुः. अथ क्रमेण ते सर्वेऽपि निर्जरा जंबूद्वीपस्थे दाक्षिणात्ये भारते मध्यखंडे मनोहरामलकल्पपुरोपांतस्थाम्रशालवने श्रीवर्धमानजिनपादारविंदपवित्रिते समवसरणे समागत्य हृदयामातहर्षोत्कर्ष पुलकांकुरदंभेनाविष्कुर्वंतः, स्वस्वविमानयुता एव भगवंतं त्रिःप्रदक्षिणीकृत्य तत्रेशानदिग्भागे स्वस्वविमानानि विमुच्य नत्वा च यथास्थानमुपाविशन्. अथ स सूर्याभदेवो निजमहिषीयुतोऽनेकसुरनिकरैर्निषेव्यमानः स्वविमानपूर्वदिकस्थितसोपानमार्गेणोत्ततार. उत्तरदिकस्थसोपानमार्गेण सर्वेऽपि सामानिकसुराः समुत्तरंतिस्म. प्रमोदास-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्तमानसाः शेषा अन्येऽपि सुरा दक्षिणसोपानमार्गेण उत्तेरुः. ततः सुरवर्गसमन्वितोऽसौ सूर्याभ-
निर्जरेशः प्रदक्षिणापूर्वकं जिनं नमस्कृत्य निजाह्वानं च सूचयित्वा भक्तिविनयावनतदेहो ललाट-
पट्टावबद्धांजलिपुट उवाच, हे भगवन्! भवदाज्ञावशंवदोऽहं भवंतं पर्युपासितुमिच्छामि. एतत्सूर्याभ-
वचनं निशम्य भगवानुवाच, भो देवेंद्र! सर्वेऽपि सुरासुरगणा जिनेंद्रोपासनं कुर्वंतीति तेषामा-
चारः केवलालोकभास्करैः पुरातनैरपि जिनेंद्रैर्गदितोऽस्ति. एवं भगवद्वदनांबुदाद्गर्जननिभां निःसृतां
वाचं निशम्य केकीवातीवहृष्टपुष्टहृदयोऽसौ निर्जरेशोऽपि भगवंतं नत्वा यथास्थानमुपाविशत. तदा
भगवान् वर्धमानोऽपि भव्यसत्वोपकाराय गभीरध्वनिबंधुरां धर्मदेशनां तनोतिस्म.—दुष्प्राप्यचिंता-
मणिरत्नरूपं। भव्यांगिनां वांछितदायकं च॥ चारित्रमूलं श्रुतसारभूतं। सम्यक्त्वरत्नं विदधंतु भव्याः
॥ १ ॥ सम्यक्त्वमाहृत्य शिवं प्रयाताः। सुभव्यसत्वा निजगेहमासं॥ त्रैलोक्यसद्मासनरत्नदीपं। स-
म्यक्त्वरत्नं विदधंतु भव्याः ॥ २ ॥ प्रायश्च कर्मस्थितिशेषमिंदु—कोटानुकोट्यब्धिमितं यदा स्यात्॥
कृत्वा तदा वै करणत्रिकं च। सम्यक्त्वरत्नं विदधंतु भव्याः ॥ ३ ॥ कदापि काले च समेऽपि सत्वा
। यथाप्रवृत्तिं प्रथमं लभंते॥ सिध्यंति नो ते खलु यद्विना तत्। सम्यक्त्वरत्नं विदधंतु भव्याः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४ ॥ सम्यक्त्वलाभो भुवि दुर्लभोऽस्ति । दुर्भेद्यरागादिकग्रंथियोगात् ॥ नोऽपूर्वकरणं परियाति यावत । सम्यक्त्वरत्नं विदधंतु भव्याः ॥ ५ ॥ क्रियोपचारस्तु भवस्वरूपो । ग्रैवेयकोत्कृष्टसुखस्य हेतुः ॥ सुदर्शनं मुक्तिविधायकं तत । सम्यक्त्वरत्न विदधंतु भव्याः ॥ ६ ॥ उल्लंघ्य केचिच्च यथाप्रवृत्ति-मपूर्वभावं परिलभ्य भव्याः ॥ भिंदंति रागादिककर्मग्रंथिं । सम्यक्त्वरत्नं विदधंतु भव्याः ॥ ७ ॥ ततो मुहूर्तांतरमाप्नुवंत्य—निवृत्तिरूपं करणं तृतीयं ॥ प्रयांति सत्वाश्च सुदर्शनं तत । सम्यक्त्वरत्नं विद-धंतु भव्याः ॥ ८ ॥ क्षयोपशाम्यं प्रथमं द्वितीयं । तथोपशाम्यं वरक्षायिकं च ॥ त्रिभेदरूपं गदितं जिनैस्तत । सम्यक्त्वरत्न विदधंतु भव्याः ॥ ९ ॥ भव्यांगिनश्चोपशमं भवाब्धा—वुत्कृष्टतो यांति हि पंचवारं ॥ निजात्मनानिर्मलभावरूपं । सम्यक्त्वरत्नं विदधंतु भव्याः ॥ १० ॥ सुक्षायकं चोपशमं च दर्शनं । सत्वाः प्रयांत्येकभवं च युग्मं ॥ क्षायोपशाम्यं तदसंख्यशोऽत्र । सम्यक्त्वरत्नं विदधंतु भव्याः ॥ ११ ॥ उत्कृष्टतः क्षेत्रजपुद्गलार्धे । भ्रमंति नूनं भवकाननेऽत्र ॥ सम्यक्त्वसंस्पर्शितभव्यसत्वाः । सम्यक्त्वरत्नं विदधंतु भव्याः ॥ १२ ॥ एवमुपदेशं दत्वा भगवान् श्रीवर्धमानो जिनेश्वरो मौनमा-हृत्य संतस्थौ, सभासदश्च सर्वे स्वं स्वं गेहं ययुः. अथ सूर्याभो निर्जरः प्रभुवदनारविंदोद्भवमकरंद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रसनिभां धर्मदेशनां श्रवणपुटाभ्यामापीय रोलंब इवामंदानंदकदंबकोल्लसितहृदयो विनयेनार्हत्पा-
दाब्जे प्रणम्योवाच, हे भगवन्! निःसंशयं यूयं केवलालोकविलोकिताखिलजगत्त्रयः प्रतीयध्वे,
ततो ममोपरि कृपां विधाय ममैतेषां प्रश्नानामुत्तराणि प्रयच्छत? किमहं भव्यो वाऽभव्यः? मिथ्या-
त्वी वा सम्यग्दर्शनी? अनंतसंसारी वा सुलभबोधी? चरमो वाऽचरमः? आराधको वा विराधकः?
एवंविधं मनसि स्थितं संशयं यूयमपाकुरुध्वं? तन्निशम्य प्रभुः प्रोवाच, भो सूर्याभ! त्वं भव्यः, स-
म्यग्दर्शनी, सुलभबोधी, चरमश्चाराधकोऽसि, अतस्त्वं मनसि मा विषादं कुरु? एवंविधं वीरवचः
श्रुत्वा हर्षोल्लसितमानसः सूर्याभो जगाद, हे भगवन्! केवलज्ञानप्रभावतः करामलकवदालोकिता-
खिलवस्तूनां युष्माकं वचनं निःसंशयं सत्यमेवाहं मन्ये. अथाहं भवदाज्ञयैतेषां गौतमादिमुनीनां
दिव्यर्द्धिसंयुतं द्वात्रिंशद्विधं नृत्यं दर्शयितुमिच्छामि. इति सूर्याभवचनं श्रुत्वा तूष्णीं स्थितो भगवान्
पुनःपुनर्द्वित्रिवारं पृष्टोऽपि न किंचिदुत्तरं ददौ. ततः सूर्याभो निर्जरो भगवंतं त्रिःप्रदक्षिणीकृत्य वै-
क्रियरूपयुत ईशानदिशि समतलां भूमिं कारयतिस्म. ततोऽसौ सुगंधांबुदवृष्टिप्रविलिप्ते भूपीठे तोर-
णपंचवर्णपताकाभिरामं विशालं प्रेक्षामंडपं मंडयामास. तदनंतरं तत्र मध्यभागे स स्फटिकामलरत्न-

For Private And Personal Use Only

विनिर्मितां वर्तुलाकारां मनोहरां पीठिकां व्यधात्. तस्याः पीठिकाया उपरि नीलमणिबद्धं मनोज्ञमेकं सिंहासनं संस्थाप्य तदुपरि स्वपरिवारपरिवृतोऽसौ सूर्याभदेवः संमदसंदोहरोमांचितांगो भगवत्सन्मुखं न्यषीदत्. ततोऽसौ मणिरत्नोत्करविनिर्मितानेकालंकारालंकृतं स्वकीयं दक्षिणं बाहुं प्रसार्य रूपलावण्यादिगुणगणोपेतांस्तारुण्यवयसो दिव्यवर्णध्वन्याद्यलंकृतांस्तेजःपुंजप्रदीप्तांगान् महासत्वयुतान् मणिरत्नादिजटितदिव्याभूषणभूषितांगोपांगान् नृत्यगानादिकार्येषु कृतात्यंतप्रयासान् हावभावाभिनयविचक्षणान् दिवौकोगणानाकारयतिस्म. तदनंतरं स्वकीयं दक्षिणं बाहुं संकोच्य, पूर्वोक्ताखिललक्षणोपेतं वामं बाहुं च प्रसार्य स्वकीयमस्तकस्थश्यामकेशकलापैरकालेऽपि कादंबिनीं विडंबयंतीः, अर्धचंद्राकृतिललाटतटेन कामभूपालादरणीयस्वर्णोरुसिंहासनं दर्शयंतीः, मदनावनीपालवसंतोत्सवदोलालीलायितकर्णपालीः, भृकुटीयुगलैः स्मरधन्विधनुर्निकरं स्फुटं दर्शयंतीः, निजनेत्रापांगदर्शनानेकमन्मथशरैः प्रविद्धामितकामिजनहृदयाः, मोहितजगज्जनमदननटस्पृहणीयसरलोरुवंशानुकारिनाशिकालंकृताः, ओष्ठदंभेन निखिलमदनातुरजनस्पृहणीयनिजयौवनतरूद्भवारुणप्रवालाग्रप्रवालोत्करमाविष्कुर्वतीः, कुसुमायुधभूपालाभिनंदनीयपुष्पशरोत्करानुकारिकुंदकुसुमाभशुभ्रदंतावलं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृताः, जगज्जयप्रयाणप्रवणप्रद्युम्नमंगलध्वानानुकारिकंबुकंठीः, पीनोन्नतकठिनस्तनस्तबकैस्त्रिजगदेक
वीरमारभूपालोद्भवप्रालीर्दर्शयंतीः, हृदयोद्भूतमन्मथज्वराभितप्तांगकामिपुरुषावगाहनार्थं लावण्यसु
धाकुंडानीव निजनाभिमंडलानि प्रकटीकुर्वंतीः, यौवनमदोन्मत्तविरहिजनशरीरारण्यावगाहनलंपटपंच-
शरगजेंद्रबंधनसमर्थकार्तस्वरालानस्तंभानिवोरुयुग्मानि धारयंतीः, त्रिजगत्स्वेच्छाविहारोत्सुकनिरंकुशकु-
सुमायुधाभिधयात्रिकसंबद्धसमुद्गकसन्निभजानुयुग्मालंकृताः, शरीरवाटिकाभ्रमणैकलंपटमनोभवाभिभू-
तनरभ्रमरनिकराभिलषितमकरंदरसार्पणप्रवणारविंदानीव पादयुगान्यभिव्यंजयंतीः, मनोहरचरणन-
खारुणप्रभाभरमिषतो निजांगभूमिमर्यादातो मीनकेतननवभास्करोद्गममुद्भावयंतीः, कार्तस्वररत्नजटि-
तललामताटंकहारकेयूरकंकणकटीसूत्रमंजीराद्यनेकालंकारालंकृतांगीरप्सरःप्रभृतिदेवांगना आकारय-
तिस्म. तदनंतरमसौ पूर्वोक्तभावसंयुतान् विविधवाजित्रवादनविधिकुशलान् नानावस्त्राभूषणभूषितां-
गान् वाजित्रवादकदेवान् विकुर्वतिस्म. तत्करस्थामितवादित्रनिकरमनोहरनादः सर्वेषां कर्णकोटरेऽप-
रिमितानंदप्रदोऽभवत. एवं समग्रसामग्रीं विधाय सूर्याभनिर्जरस्तान् सर्वानपि सुरान्प्रति जगाद, भो
भो निर्जरा यूयं सर्वेऽपि श्रीमद्भगवंतं श्रीवर्धमानं जिनेश्वरं त्रिःप्रदक्षिणपूर्वकं नत्वा, तथैव श्रीगौत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मादिमुनिगणं च प्रणम्य दिव्यं नृत्यं कुरुत ? युष्माभिः सर्वैरपि हावभावाभिनयादिसमन्वितं द्वात्रिंशद्विधं नृत्यं सर्वेषामपि सभासदां दर्शयितव्यं. एवंविधां निजस्वामिसूर्याभवाचं निशम्य मोदोत्कर्षसमन्विताऽस्ते सर्वेऽपि जिनेश्वरं मुनिगणं च प्रणम्य समभावश्रेणिबद्धा विचित्रवाजित्रध्वनिमयनिर्मितगगनांगणा नानाभिनयविधिविस्मिताखिलसभासदो मनोहरगानोपेतं नृत्यं कुर्वंतिस्म. समश्रेणिस्थितानां तेषां सर्वेषामपि समकालकृतविविधहावभावाभिनयबंधुरं नृत्यं केषां मनस्सु नो चमत्कारकारणं जातं ! समसमयाभिवादिताखिलवादित्राणां रम्यसारस्वरोपेतो महाध्वनिर्घनगर्जनमिव सभासन्मयूरचित्तेष्वमंदानंदसंदोहं व्यधात. तेषामेकसमयोत्थिता नेत्रकरचरणाद्युल्लासा हस्तताला वदनप्रकटितोरुगानध्वनयश्चाभिनयादिरम्यभावा अपास्तरागादीनां मुनीनामपि मनस्सु महदाह्लादं जनयंतिस्म. प्रथमं मंदमंदं, ततस्तारस्वरः, एवं क्रमेण वर्धमानो वादित्राणामतिरम्यो नादः सभासच्चित्ताह्लादकोऽजनि. माधुर्याधरीकृतसुधाधोरणीबंधुरं रम्यस्वरं तद्गीतजिनगुणगणस्तवनं गौतमादिवाचंयमचित्तमयूराणां मनस्सु घनगर्जनमिवामंदानंदोत्सवसंपादकं संजातं. ते सर्वेऽपि देवदेवीगणाः सममेव वीणावेणुमृदंगादिविविधवाजित्राणामपूर्वध्वनिपूर्वकं क्रमेण मृदुतरतमस्वरैर्गायंतिस्म. रम्याप्स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रसां दिव्यनृत्यानुसारिवंशकांस्यादिमधुरध्वनिबंधुरगर्जनैर्निखिलमपि गगनमंडलं पूरितं समजनि. पटहभंभादुंदुभिझल्लर्यादिगंभीरध्वानैः प्रतिगजगर्जनैर्व्याकुलितहृदया इव दिग्गजेंद्राः समजायंत. एवं द्वात्रिंशत्प्रकारं दिव्यं नृत्यं विधाय संतुष्टहृदयः सूर्याभदेवः स्वपरिवारपरिवृतो भगवंतं वर्धमानं भक्तिभरावनतदेहो विनयेन नत्वा स्वालयं जगाम. तस्य गमनानंतरं श्रीगौतमस्वामी वीरप्रभुं नत्वापृछत, हे भगवन्! कोऽयं दिव्यदेहधारी सुरः? कुतो वेदृशी समृद्धिस्तेन प्राप्ता? तन्निशम्य भगवानुवाच भो इंद्रभूते! स तु सूर्याभनामा सुरवरोऽस्ति, प्राप्ता चेदृशी समृद्धिस्तेन पूर्वकृतपुण्यप्रभावात. तत श्रुत्वाश्चर्यचेतश्चमत्कृतिरिंद्रभूतिरुवाच, हे भगवन्! तर्ह्यहं पुण्यप्रौढस्य तस्य सुरवरस्य पूर्वभवसंबंध्यपूर्वं चरित्रं भवद्वदनारविंदात् श्रोतुमिछामि. भगवानुवाच भो इंद्रभूते! तर्हि विपश्चिच्चित्तचमत्कारकारकं मया वर्ण्यमानं तत्पूर्वभवचरित्रं सावधानमनसा निशम्यतां. ॥ इति पूर्वविरचिताशुद्धपद्यबंधप्रदेशिचरित्रानुसारेण जामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालविरचिते गद्यबंधे प्रदेशिचरित्रे प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

लवणाब्धिवीचिनिचयप्रक्षालिताखिलकश्मले जंबूद्वीपे दाक्षिणात्ये भारते क्षेत्रे मध्यखंडे केकयार्धाख्यदेशे लक्ष्मीलीलालंकृता भूमिमंडलभूषणीभूता निजसमृद्धिनिर्जितामरवरनगरी श्वेतांबिकाख्या नगरी वर्तते. तत्पुरीशानदिग्विभागे पुष्पपत्रप्रवालफलाढ्यलंकृतजंबूजंबीरनारंगतालतमालरसालाद्यनेकपादपप्रकरघटाविघटितचंडमार्तंडोग्रकिरणकदंबकावकाशं, घनतरुस्तोमारुछायाश्रितानेकसारंगसरभवृषभादिजंतुजातदत्ताशीर्वादं, नानाविधपक्वफलास्वादाभिलाषलब्धातिप्रमोदानेकशुककाककोकिलादिपतत्रिकृतनिवासं, परस्परमिलितमहत्तरुशाखाविर्भूतपर्णसीबकवृंदाविप्रकटितांधकारेण दिवापि निःशंकमितस्ततोभ्रमद्घूककदंबककृतघूत्कारध्वनिभयंकरं मृगवनाभिधमुद्यानं वर्तते. तत्र नगर्यां मृगयाव्यसनातीवासक्तोऽधर्मपरश्चांडाल इवानेकजीववधतत्परः, क्रूरदृष्टिर्विविधकरादानात्यंतपीडितप्रजः, कूटमायैकमंदिरं, परस्त्रीगमनासक्तहृदयः, कृतघ्नः, परद्रोहपातकाभीरुः, इत्याद्यनेकदुर्गुणगणोपेतः प्रदेशीत्याख्यो नृपतिरासीत्. सोऽहर्निशं पूर्वोक्तमृगवने गत्वानेकानाथमृगयूथानि कर्णाकृष्टधनुर्मुक्तानेकशरव्रातैर्निहंतिस्म. तस्य नृपस्यातीवरम्यरूपापास्तदेवांगनांगसौंदर्या, कमलकोमल-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करचरणा, कटाक्षेषुवारविक्षेपपातितानेकयौवनोन्मत्तकामिजनचित्तपतत्रिव्राता सूरीकंताभिधाना राज्ञी बभूव. तया सहाहर्निशं पंचेंद्रियविविधसुखान्यनुभवतस्तस्य राज्ञः सुकुमालपाणिपादः सर्वलक्षणलक्षितांगोपांगः सुत एकः समजायत. कृततज्जन्मोत्सवेन राज्ञा स्वजनभोजनपूर्वकं तत्साक्षिकं तस्य सुतस्य सूर्यकंत इत्यभिधानं चक्रे. पंचधात्रीभिः पाल्यमानः पितृभ्यां च लाल्यमानोऽसौ बालः पितृमनोरथैः सह वर्धमानः क्रमेण पंचवार्षिको जातः. ततो नृपस्तं योग्यं विज्ञाय कलाकलापग्रहणहेतवे भूरिदानसन्मानपूर्वकं कलाचार्याय समर्पयत्. अथ स सूर्यकंतोऽपि पूर्वकृतागण्यपुण्यसंभारप्रभावतोऽल्पकालेनैव सुरगुरुरिव सकलकलाकलापकुशलो बभूव. क्रमेण तारुण्यारण्यविहारेण तं पंचशरमृगयुशरव्रातविद्धहृदयं विज्ञाय पितरौ तदौषधीभूतप्रमदाधरामृतपानकृते तस्य लावण्यरससरसीनिभां चारुरूपापास्ताप्सरोवृंदां सुकुलोद्भवां राजकन्यां पर्यणाययत्. तदनंतरं राज्ञा सकलमंत्रिसामंतसाक्षिकं तस्य युवराजपदं समर्पितं. अथ स सूर्यकंतकुमारोऽपि सकलराजकार्येषु निपुणीभूय कोशागारादिनिखिलराज्यचिंतां करोतिस्म. अथास्य प्रदेशिनृपस्य राजनीतिज्ञो बुद्धिनिर्जितसुरगुरुरुत्तमगुणगणालंकृतः चित्राख्यः सारथिः परमसुहृदस्ति. नानाराजकार्यविचक्षणत्वेन नृपस्तस्य द्रव्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दानपूर्वकं महत्सन्मानं सर्वदा प्रयच्छति, तस्यानुमतिं विना राजा किमपि राजकार्यं न करोति. राजमान्यत्वान्निखिलनागरा अपि सन्मानपूर्वकं तस्मै सन्मानं ददति. अथानेकजिनमंदिरालंकृते कुणालाख्यदेशे स्वकीयातुलसमृद्धितिरस्कृतामरपुरी सावत्थीत्याख्योत्तमा नगरी वर्तते. तत्र राजनीतिविचक्षणः स्वदोर्बलपराजितानेकशत्रुर्जितशत्रुरित्याख्योऽवनीपालः प्रदेशिनरेंद्रस्य परममित्रमासीत्. अथैकदा प्रदेशिनृपः स्वकीयं परमसौहृदं चित्रसारथिमाहूय तस्यानर्घ्यमणिमुक्तादिगुंफितमेकं हारं दत्वा प्रोवाच, भो मित्र सावत्थीनगरीं गत्वा त्वयैष हारो मम परमसुहृदे जितशत्रुनृपाय कुशलोदंतपृच्छनपूर्वकं मदाज्ञया देयः. तदनंतरं तत्कुशलोदंतपत्रं गृहीत्वा त्वरितमेवात्र त्वया मत्समीपे समागंतव्यं. इत्यादेशं दत्वा शिवास्ते पंथानः संत्वित्याशीर्वचनपूर्वकं नृपस्तं व्यसर्जयत्. अथ चित्रोऽपि स्वसुहृदं नृपं नमस्कृत्य हारोपहारहारिकरोऽमितानंदकल्लोलोल्लसितहृदयो निजगेहं समाययौ. ततोऽसौ निजभृत्यमेकं कौटुंबिकमाहूय वाजियुतं स्वकीयं चतुर्घंटाभिधानं रथं सज्जीकर्तुं समादिशत. तदनंतरं स सुरभिकवोष्णनिर्मलसलिलैः स्नानमकरोत. यतः—स्नानं नाम मनः प्रसत्तिजननं दुःखौघविध्वंसकं । सौभाग्यायतनं मलापहरणं संवर्धनं तेजसः ॥ रूपोद्योतकरं शिरःसुखकरं कामाभि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संदीपनं । स्त्रीणां मन्मथमोहनं श्रमहरं स्नाने दशैते गुणाः ॥ १ ॥ ततो भुक्तमनोहरचतुर्विधाहारश्चर्वितकर्पूरकस्तूरीवासितसुरभितांबूलो महर्घ्यवसनाभूषणभूषितशरीरः परिहितातिदृढसन्नाहः पृष्ठबद्धतूणीरः शरासनशरव्रातव्यग्रपाणिपंकजः स चित्रसारथिर्नृपदत्तहारोपहारं गृहीत्वा विविधास्त्रश्रेणिबंधुरसुभटोत्करपरिवृतं स्वकीयं चतुर्घंटाभिधानं पंचवर्णपताकाभिमंडितं स्यंदनमारुह्य श्वेतांबिकामध्यमार्गान्निःसृत्य क्रमेण पथि नानाकौतुकानि विलोकयन् कुणालजनपदस्थसावत्थीपुरोपांते संप्राप्तः. तत्र बाह्योद्याने स्यंदनं संस्थाप्य गृहीतहारोपहारोऽसौ सामंतसचिवाद्यनेकराजन्यराजिविराजितायां जितशत्रुसंसदि समाययौ. तत्र रत्नजटितकार्तस्वररम्यसिंहासनसंस्थितं कनकाचलोत्तुंगशिखरस्थभास्करबिंबमिव निजवदनतेजोराशिविभासितसकलभामंडपं जितशत्रुभूपं प्रणम्य स्वस्वामिप्रदेशिनृपप्रेषितं रम्यमणिमुक्ताहारोपहारं चित्रसारथिस्तस्याग्रे मुमोच. तदा जितशत्रुनृपोऽपि स्वसुहृदुत्तमप्रदेशिभूपस्य कुशलोदंतं पृष्ट्वातीवप्रमोदभरपुलकितांगो हारं गृहीत्वा तस्मै चित्रसारथये भूरिसन्मानं ददौ. ततोऽसौ स्नानभोजनादिसकलसामग्रीसंयुते, रम्योद्यानपरिवृते, जलयंत्राद्यनेकक्रीडास्थानालंकृते, परितो गवाक्षगणपरिमंभिते नृपदत्तावासे मनोहरनृत्यादि प्रेक्षयन् सुखेन संतस्थौ. इतश्च श्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पार्श्वप्रभुसंतानीयः श्रीकेशिकुमाराभिधगणधरवरश्चारित्रपात्रपंचशतमुनिगणपरिवारितो लोकबांधव इव प्रबोधितानेकभव्यजनकमलोत्करस्तिरस्कृतजगदज्ञानांधकारो नानादेशेष्वनेकनगरग्रामादीन् स्वचरणन्यासैः पवित्रयंश्चतुर्विधज्ञानाब्धिपारगः सावत्थीपुरोपांतस्थकोष्टकाख्यरम्योद्याने समागत्य समवसृतः. तद्वंदनार्थमनेके पौरलोका वस्त्रालंकाराद्यलंकृताः स्यंदनादिविविधवाहनस्था हर्षोत्करपुलकितांगा उद्याने गच्छंति. अथ रम्यनाटकप्रेक्षणपरो गवाक्षस्थश्चित्रसारथिर्गच्छतोऽनेकपौरान् विलोक्यैकं किंकरं पृच्छतिस्म, भो किंकर ! एतेऽलंकाराद्यलंकृताः पौराः क्व गच्छंति ? कोलाहलपराश्च कं वार्तालापं कुर्वंति ? तन्निशम्य किंकरेणोक्तं हे स्वामिन् ! पुरोपांतस्थकोष्टकाख्योद्याने जातिप्रधानसुवंशमुक्तामणिनिभो विनिर्जितकषायाद्यंतरारिवर्गः, संयमोरुखलीनेन जितेंद्रियहयवर्गः, समभावासिना व्यापादितपरीषहसुभटोत्कटकटकः, मेरुरिव सुरासुरकृतोपसर्गवर्गैरपि निश्चलः, निर्ममत्वांकुशेन निरस्तसमस्तसंसारमत्तस्तंबेरमोग्रभयभरः, निर्मलचतुर्विधावलोकावलोकितलोकालोकसचराचराखिलचेष्टः, जन्मजरामरणाद्युच्छलत्कल्लोललोलापारसंसारपारावारापरपारप्रयाणवरप्रवहणनिभः, वांछितार्थप्रदानामरपादपतुल्यः, चारित्राचारचतुरवरपंचशतवाचंयमवारपरिवारपरिवारितः, श्रीपार्श्वतीर्थपत्यन्वयो-

For Private And Personal Use Only

दयाचलसहस्रकिरणः श्रीकेशिकुमाराख्यगणधरेंद्रः समवसृतोऽस्ति. तद्वंदनार्थं प्रमोदोत्फुल्ललोचना
वस्त्रालंकारालंकृतांगा एते नागराः समुत्सुकीभूय परस्परं तद्वंदनवार्तालापैकपराः कोष्टकोद्याने ग-
च्छंति. एवं तद्वदनात्केशिकुमारगणधरेंद्रस्य तत्रागमनं निशम्यातीवहृष्टहृदयश्चित्रसारथिरपि तद्वंदना-
र्थमुत्सुकीभूय स्वात्मानं धन्यं मन्यमानो निजं तं कौटुंबिकं नरमाहूय स्वकीयछत्राढ्यादिनचतुर्घंटानि-
धरथसज्जीकरणायादिशत्. कौटुंबिकोऽपि प्रमाणीकृतनिजनायकादेशोऽविलंबितं रथं सज्जीकृत्य त-
त्समीपे समानयत्. अथ परिहितकेशेशयकोमलामलचीनांशुको नानामणिरत्नजटितहाटकाभूषणो-
त्करभूषितांगो गजवाजिपदानीकनिजाखिलपरिवारपरिवृतो विविधवादित्रव्रजगभीरध्वनिबधिरितांबर-
तटो नृप इव चित्रसारथिरपि निजस्यंदनं समारुरोह. ततः सावत्थीपुरीमध्यभागेन संचरन् स क्रमेण
केशिकुमारगणधरेंद्रादिवाचंयमेंडोत्करक्रमांबुजपवित्रिते, मुनिभक्तिभरावनम्रानेकभव्यजनस्तोमसं-
कीर्णे पुरीबाह्यस्थकोष्टकाख्यरम्योपवने समाययौ. तत्रोदयाचलतुंगशिखरोदितं शशांकमंडलमिव नि-
र्जरोत्करनिर्मितकार्तस्वरारविंदोपरिसंस्थं केशिकुमारगणधरेंद्रं विलोक्य चित्रसारथिराहृतपंचाभिगमो
ललाटपट्टावबद्धकरांभोजकुड्मलो भक्तिभरावनम्रकायो विनयेन चित्रो यथोचितस्थाने समुपाविशत्.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ परोपकृतिकर्मठो गणधरेंद्रोऽपि विशेषतश्चित्रसारथिमुद्दिश्य सूरिभ्रमणोत्पन्नामितश्रमसंताप-संतप्तहृदयानां भव्यगणानां शांतिकृते धर्मोपदेशामृतधाराधरधोरणिं ववर्ष.—जिनेंद्रधर्मः शिवसौख्य-हेतु—रुत्कृष्टसंवेगगुणेन रम्यः ॥ निजात्मभावस्य विधायकश्च । निःसंगमुक्तेरपि दायकोऽस्ति ॥ १ ॥ संवेगबोधोद्भवतत्वरूपो । मुनीशवर्गैश्च निषेव्यमाणः ॥ क्षांत्यार्जवप्रभृतिभेदभिन्नः । सुसाधुधर्मो गदितो जिनेंद्रैः ॥ २ ॥ देशेन षट्कायसुरक्षणात्म—दयाप्रधानो गदितो जिनेंद्रैः ॥ सुश्राद्धधर्मः स्वःसौख्यहेतुः । सम्यक्त्वमूलो विनयात्मकश्च ॥ ३ ॥ तत्र साधुधर्म एव प्रांतेऽपास्तजन्मजरारोगमरणमुक्तिप्रमदासंगाभिलाषवतां वाचंयमानां परमापवर्गसंसाधकोऽस्ति. ते वाचंयमाश्च क्षमासिवर्गेण निपातितक्रोधोत्कटसुभटाः, मार्दवनिशितांकुशकदंबकेन वशीकृतमानोन्मत्तगजेंद्राः, आर्जवोग्रकुठारोत्करेण समूलं विदारितमायाविषवल्लयः, त्यागोरुवज्रव्रजेन विपाटितलोभगिरयः, नानाविधसूर्यातपातिशायितपोविधानेन विनिर्दग्धकर्मेंधनोत्कराः, सप्तदशविधसंयमाराधननिबिडायःशृंखलाश्रेणिभिर्निबद्धेंद्रियादिवाजिवर्गाः, सत्योरुसूर्यतेजसांधीकृतासत्यनिशाटनपाटच्चराः, शौचधर्मोरुनिर्मलसलिलसारणीधोरणीभिः प्रक्षालिताहारादिदोषकश्मलाः, समस्तत्यागात्मकधर्मैवप्राश्रयेण विफलीकृतपराभवा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिलाषिपरिग्रहसैन्यप्रयासाः, अंगीकृतब्रह्मास्त्रमंतरंगमंगलेन तीर्णकटाक्षविक्षेपानेकतरंगभंगिमक्कु-
लहृदयवनितापगोग्रप्रवाहा भवंति. अतो भो भव्याः प्रमादनिद्रामवधूय मुक्तिवधूसुभगसंगमार्थं पथप्र-
याणसमर्थं पूर्वोक्तदशविधयतिधर्मरूपोरुस्यंदनमंगीकुरुध्वं ? यदारूढा यूयं पथि कषायादिलुंटाकोत्क-
टकटकेनाप्यनुपद्रुताः सुखंसुखं भवत्पाणिपंकजाभिलाषैकहृदयमुक्तिवधूहर्म्यालंकृतां सिद्धशिलाख्यव-
रनगरीं प्राप्स्यथ. इत्याद्युपदेशं दत्वा केशिकुमारगणधरेंद्रो मौनमाश्रित्य संस्थितः. आकंठं श्रवणां-
जलिनिपीतमुनिवदनचंद्रविनिर्गतोरूपदेशामृतश्चित्रसारथिर्हृद्यमातामंदानंदरसंबहिर्निष्कासयन्निव के-
शिकुमारगणधरेंद्रं नत्वा जगाद, भो मुनींद्र ! लोकबांधवमिवाद्य भवंतं वीक्ष्याज्ञाननिद्रासुप्ते मे लो-
चने प्रफुल्ले जाते, नानाविधसांसारिककार्यकर्दमावलेपविकसनविमुखं मे हृदयकमलमपि भवदीयो-
पदेशामृतधाराधारवर्षणनिर्धौतावलेपं विबोधितं जातं. परं भवदुपदिष्टवरयतिधर्मैरावणगजारोहणासम-
र्थोऽहं द्वादशव्रतवरसोपानाबद्धश्राद्धधर्मनिःश्रेणिकाश्रयाधिगमाभिलाषी वर्ते, अतस्तद्वितरणायैव
परोपकारप्रवणैर्भवद्भिर्मयि कृपा विधेया. एवं श्राद्धवरधर्मप्रार्थनापरं तं योग्यं विज्ञाय गणधरेंद्रोऽपि
तन्मनोगताभिलाषपूर्तये तस्मै सम्यक्त्वमूलानि श्राद्धद्वादशव्रतानि ददौ. अथ गृहीतद्वादशश्राद्धव्र-

For Private And Personal Use Only

तच्चित्रसारथिरतीवानंदितहृदयः समुत्थाय गणधरेंद्रं नत्वोवाच, हे भगवन्! भवदीयोपदेशामृतमे-
घवृष्टिसिक्तोऽयं मे श्राद्धव्रतोरुकल्पपादपः कालांतरे क्रमेणाविनाशिपदकरमाश्रीकृतामृतरसास्वाद-
मोक्षफलदायको भविष्यतीति मे मनसि निश्चयो वर्तते. धन्याः खलु त एवांगिनो येऽहर्निशं भ्र-
मरा इवामदानंदमग्ना भवच्चरणारविंदं सेवंते, चातका इव भवदीयोपदेशामृतं पिबंति. मयूरा इव
भवदुपदेशघनगर्जनध्वनिं शृण्वंति, हंसा इव भवन्मानसे वसंति. कुमुदानीव भवद्वदनचंद्रं विलो-
क्य विकसंति च. धन्याश्चैते वाचंयमेशा यैः स्वमस्तकन्यस्तभवदीयकरांबुजाचिंत्यप्रभावतः संसारो-
द्भवोग्रसंतापो निरस्तः. इत्यादिस्तुतिपरश्चित्रसारथिर्गणधरेंद्रं नत्वा नेत्रगलत्प्रमोदाश्रुश्रेणिदंभतो
हृद्यमातामंदानंदरसधोरणीं बहिर्निष्कासयन्निव स्यंदनारूढः स्वाश्रयं जगाम. अथासावहर्निशमंगीकृ-
तद्वादशश्राद्धव्रतानि निरतिचारं पालयन्, दिव्याहारतांबूलादिभोगोपभोगान् परिशीलयन्, मनोहर-
नाट्यप्रेक्षणादि विलोकयन्, वीतरागप्रतिमार्चनपरः सुखेन नृपदत्तावासे निजं समयं गमयतिस्म.
ततः कियद्दिनानंतरं स्वसुहृत्प्रदेशिनृपार्थं जितशत्रुनृपवितीर्णदिव्यकुंडलोपहारं गृहीत्वा स्वनगरीप्र-
याणोत्सुकश्चित्रसारथिः केशिकुमारगणधरेंद्रपादारविंदप्रणमनार्थं कोष्टकोद्याने स्वपरिवारपरिवृतो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ययौ. तत्र गणधरेंद्रं प्रदक्षिणापूर्वं नत्वा यथास्थानं निषण्णस्तदास्यपीयूषमयूखोद्भवदेशनाकिरणनिकरैश्चंद्रकांतमणिरिव सोऽतीवार्द्रहृदयो जातः. ततो देशनांते गुरुवरं तं प्रणम्य बद्धांजलिरसौ विनयेनोवाच, हे भगवन्नथाहं स्वनगरंप्रति गंतुमिच्छामि. अथ कदाचिद्विज्ञातसमुचितावसरैः परोपकारैकहृदयैर्भवद्भिर्नूनं स्वचरणन्यासैः श्वेतंबिकापुरोपांतोपवनभूमिरपि पावनीकर्तव्या. एवं बहुवारं विज्ञप्तिपरमतीवोत्कंठितहृदयं चित्रसारथिं ज्ञात्वा मुनींद्रोऽपि मौनमुन्मुच्योवाच, हे चित्रसारथे ! श्वेतंबिकाधिपतिर्भवत्स्वामी सततं सप्तव्यसनवासनावासितमानसो निर्घृणो वाचंयमवृंदोपसर्गकरणैककर्मप्रवणः स्वेच्छया वनविहारोद्भवामितप्रमोदोल्लसितहृदयानामरण्याकीर्णागण्यतृणगणाशिनां, गिरिवरझरन्निर्झरनिर्मलसलिलपानोपशांतनिदाघसमयोद्भूतचंडभानूग्रभानुभरोद्भूतहृदयामितसंतापानां, निर्दोषवराकमृगयूथानामंतक इव निजनिशितशरोत्करैर्विनाशको भुवि प्रसिद्धोऽस्ति; अतस्तत्रोग्रविहारिसंयमिनां संयमनिर्वाहः शंकास्पदमेवानुसरति. अथेति गणधरेंद्रवाचं श्रवणगोचरीकृत्य चित्रसारथिरुवाच, हे भगवन् ! भवदुक्तं सर्वमपि सत्यमेवास्ति, परं परोपकारैककर्मपरायणानां भवत्पादानां नृपेन सह किमपि प्रयोजनं नास्ति, तत्रोग्रागुप्तमवंशमुक्तामणिनिभा अनेके सार्थवाहमहेभ्यादयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनधर्मैकबद्धहृदयास्तत्वार्थबुद्धिकुशला वाचंयमभक्तिभरबद्धकक्षाः संति. तेषां भवदीयोपदेशश्रवणतो महान् लाभो भविष्यति. एवंविधं चित्रसारथिवचनं निशम्य दत्तज्ञानोपयोगो गणधरेंद्रस्तत्र भाविलाभं विज्ञायोचे, हे चित्रसारथे! यथावसरं ज्ञास्यते. ततो विनयावनतकायश्चित्रो मुनिपतिं प्रणम्य हृष्टहृदया निजावासे समाजगाम. अथ कृतस्नानजिनार्चनभोजनश्चित्रसारथिः परिहितानर्घ्यवस्त्राभूषणविभूषितांगः स्वकौटुंबिकसज्जीकृतं स्वकीयं चतुर्घंटाभिधस्यंदनमारूढः सुभटोत्कटकटकाभिवेष्टितः सावत्थीमध्यमार्गेण निःसृत्य क्रमात्कुणालदेशमुल्लंघ्य केकयिकार्धजनपदालंकारभूतश्वेतंबिकापुरोपांतस्थमृगवने समाययौ. तत्र स्थापितस्यंदनोऽसावुद्यानपालकमाहूयोवाच, भो उद्यानपालक! वामासुतसंतानीयः पंचशतवाचंयमपरिवारपरिवृतो विविधाभिग्रहपरः श्रीकेशिकुमारगणधरेंद्रोऽत्रागत्य यदा निजचरणकमलन्यासैरेतामुद्यानभूमिं पावनीकुर्यात्तदा त्वया वंदनपूर्वकमेषणीयशय्यापीठासनादिकैर्भक्त्या तस्मै निमंत्रणं कर्तव्यं, अविलंबितं च निवेदनीयं मह्यं तस्यागमनं. इति श्रुत्वा संमदोत्फुल्ललोचन उद्यानपालकोऽपि बद्धांजलिरुवाच, हे स्वामिन्! भवदाज्ञा मे प्रमाणमेवास्ति. अथ तमुद्यानपालं विसृज्य विकसितवक्त्रांभोजश्चित्रः परिवारयुतः श्वेतंबिकामध्यमार्गेण स्वा-

For Private And Personal Use Only

वासे समाजगाम. ततोऽसौ रथादुत्तीर्य गृहीतजिनशत्रुनृपदत्तकुंडलोपहारो भूमीशमंदिरे गत्वा स-भास्थितं निजस्वामिनं प्रदेशिनृपं प्रणम्य तन्मित्रकुशलोदंतनिवेदनपूर्वकं तद्दत्तकुंडलोपहारं तत्पा-णिपंकजे मुमोच. तेजःस्तोमतिरस्कृतभास्करनिशाकरबिंबं तत्कुंडलयुग्मं निरीक्ष्य प्रदेशिनृपोऽपि सा-नंदं स्वचेतसि चमत्कृतः स्वकीयं सौहार्दं सफलं मन्यमानो बहुसन्मानं चित्रसारथये ददौ. अथ नृ-पविसृष्टश्चित्रसारथिः स्वमंदिरे समागत्य कृतस्नानदेवार्चनभोजनश्चर्वितसुरभितांबूलो वस्त्राभूषणान-रभूषितांगो हावभावाभिनयाद्यलंकृतं विविधवाजित्रजमंमितं नृत्यं विलोकयन् सुखं तस्थौ. अथ कियद्दिनानंतरं समितिगुप्त्युपेतवरचरणालंकारालंकृतपंचशतविनयोपेतविनेयपरिवारपरिवृतः श्रीके-शिकुमारगणधरेंद्रोऽपि ततो विहृत्य धर्मोपदेशसुधाधारधरत्वोरणीभिरनेकभव्यजनक्षेत्राणि सिंचन्, स्वकीयं वृषं च पुरस्कृत्य भव्यानां कोमलार्द्रहृदयालवालवलयेषु बोधिबीजानि वपन्, मिथ्यात्वरजः-पुंजमुपशामयन्, निजचरणन्यासैश्चानेकजनपदनगरारण्यानि पवित्रयन्, धौतजगदज्ञानकश्मलमलः क्रमेण विहरन् श्वेतंबिकोपांतस्थमृगवने समागत्य समवसृतः. तदा वनपालोऽपि स्मृतचित्रसारथिव-चनोऽतीवहृष्टहृदयो गणधरं सपरिवारं विनयेनानम्य शय्यापट्टफलकादिमुनियोग्योपकरणैर्न्यमंत्रयत्.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्प्रार्थनानंदितहृदया मुनयोऽपि स्वयोग्योपकरणानि जगृहुः. अथ विनेयव्रजेभ्यो गणधरेंद्रनामगो
त्रादि विज्ञाय वनपालेन निजहृदये निश्चितं, नूनं यं मुनीशमहर्निशं चित्रसारथिर्ध्यायति स एवायं
गणधरेंद्रोऽत्र समवसृतोऽस्ति, अतोऽहं द्रुतं गत्वा तं सारथीशं वर्धापयामि. इति विचिंत्य वनपालो
द्रुतं चित्रसारथेः समीपे समागत्य बद्धांजलिरकथयत, हे स्वामिन्! यो मुनींद्रो नित्यं भवन्मानसे
निवासं कृत्वा स्थितोऽस्ति, स त्वद्याव चित्रं मृगवने सपरिवारः समवसृतोऽस्ति. एवंविधां घनगर्जन-
निभां वनपालवाचं निशम्य मयूर इवात्यानंदितहृदयश्चित्रसारथिस्तस्मै भूरिद्रव्यवस्त्रालंकारादिपारि-
तोषिकं दत्वा व्यसर्जयत, स्वयं च मुनीशवंदनप्रयाणार्थं स्वस्यंदनसज्जीकरणाय निजकौटुंबिकमा-
दिशत्. अथ गणधरेंद्रागमनाकर्णनेन जिनोक्तधर्मकर्मपरायणा अनेके नागरा विविधालंकारवस्त्रा-
भूषितदेहा मुनीशवंदनार्थं तन्मुखचंद्रोद्भवोपदेशामृतपानं च कर्तुं मृगवने ययुः. चित्रसारथिरपि कृ-
तस्नानादिनित्यकर्मा मुनीशचरणारविंदवंदनोत्सुको भूरिपरिवारपरिवृतो निजस्यंदनस्थो मृगवने य-
यौ. मुनिदर्शनानंतरं त्यक्तस्यंदनश्चित्रसारथिश्चरणचारेण समीपमागत्य प्रदक्षिणापूर्वकं विहितवंदनः
स्तुतिं विधाय हर्षाश्रुपूरमिषेण मानसामानानंदसंदोहमुद्गिरन् देशनामृतपानपिपासुर्यथास्थानमुपा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशत. मुनीशोऽपि दत्तधर्मलाभाशीर्वादो विविधधर्मोपदेशामृतघनवर्षणं विधाय दुरितभाराख्यग्रीष्मतीवसंतप्तजनमनःशांतिं चकार. अथाधिगतावसरश्चित्रसारथिर्बद्धांजलिर्मुनीशं प्रणम्योवाच, हे भगवन् ! मे स्वामी प्रदेशिधराधिपः सर्वदा मृगयासक्तोऽरण्यनिवासिनिरपराधमृगादिदुरितत्वानां वधं करोति, धर्मकर्मश्रद्धाविहीनश्च प्रजानामपि दुःखसंतापकारकोऽस्ति, आकर्णाकृष्टशरासनमुक्तनिशितशरोत्करैः पापपतादिपतत्रिवर्गं चाहर्निशं विनाशयति. धर्मोपदेशश्रवणं तु तस्य कर्णकोटरेऽयःकीलकायते, मुनिभास्करं दृष्ट्वा च घूक इव सोंधितनयनो जायते, विषयवासनासक्तश्च न न्यायान्यायं विलोकयति, अतः केनाप्युपायेन मोहांधकारांधीभूते तल्लोचने परोपकारैकनिष्ठैर्भवद्भिर्ज्ञानोरुदिव्यांजनशलाकयोद्घाटयितुं योग्ये, नूनं भवदुपदेशांभोदामितांभःकदंबकवर्षणधौताज्ञानकर्दमावरणो निर्मलांतःकरणीभूय स सदा सदाचरणप्रवणो भविष्यतीत्यहं मन्ये. अतोऽहमप्येनं मम स्वामिनं येन केनाप्युपायेनात्र भवत्समीपं समानयिष्ये. अथैवंविधां चित्रसारथिवाचं निशम्य गणधरेंद्र उवाच, हे चित्रसारथे ! धर्मकर्मणि प्रमादं माकार्षीः. इत्युक्तश्चित्रसारथिर्द्रुतं मुनिपतिं नमस्कृत्य स्वावासं संप्राप्तः. ॥ इति श्रीजामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालविरचिते गद्यबंधे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदेशिचरित्रे द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

अथ रात्रौ कृतनिद्रश्चित्रसारथिश्चतुर्घट्यात्मके निशाशेषे सुखशय्यातः समुत्थाय कृतावश्यको धर्मध्यानपरः परोपकृतिरक्तः स्वचेतसि चिंतयति, अहोऽद्य मया कः खलूपायः कर्तव्यो येन धर्मविमुखोऽवनीपालो गुरुसमीपे समेत्य तदुपदेशामृतपानतः स्वहृदयस्थमिथ्यात्वविषवमनं कुर्यात. अद्य खल्वनं वाजिखेलनमिषेणाहं गुरुपादारविंदपावनीभूते मृगवने नयामि, नूनं तत्रायं नवकौतुकाकांक्षी गुरुपार्श्वे समेष्यति, गुरूणां चोपदेशाचिंत्यमणिमंत्रप्रभावतस्तन्मनःकोटरकृतनिवासो मिथ्यात्वोरगो दूरीभविष्यति, गुरूपदेशामृतोत्करपरिपूर्णे च तन्मानसे विशुद्धपक्षः सम्यक्त्वोरुमरालः क्रीडापरो भविष्यति. इति चिंतनपरस्य चित्रसारथेरवकाशं दातुमुत्सुकेव निशापि विरराम. जगदखिलपदार्थसार्थक्षणभंगुरत्वनिदर्शनार्थं करालकालेन कवलीकृता इव सर्वेऽपि तारकगणा दृष्टिमर्यादातोऽदृश्यीभूताः. सहस्रकिरणसारथ्यरुणोदयोग्रतेजः पराभूतं निजस्वामिनं रजनीकरं निःश्रीकं विज्ञायाकुलितेव रजन्यपि पराङ्मुखीभूता तं विसृज्य गिरिगभीरगुहादिषु प्रलीना. विरहातुरा पूर्वदिक् च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निजनायकागमनं विलोक्यारुणोदयरक्तप्रभाभिषेणांगपरिहितोरुकौसुंभोत्तरीयवसना, सहस्रकिरण-
किरणनिकरप्रभाभरोत्तेजितामलशुभ्रसलिलपरिपूरितपल्वलोत्फुल्लश्वेतकमलावलिमिषेण मंगलार्थं कर-
धृतोरुतंदुलस्थाला, काककोकिलादिविविधपतत्रिप्रकरोदीर्णमधुरध्वनिदंभेनाचरितमंगलारावा, अर-
ण्योद्भवनवतृणगणांकुरोत्करदंभेन पतिसंगमोद्भवानंदपुलकांकितांगा निर्भरं निजनायकमालिंग्य
दर्भभराग्रविलग्नामलमौक्तिकाभतुषारांभोबिंदुकदंबकमिषेणांगोद्भूताद्भुतस्वेदोदबिंदुत्करं व्यंजयंती,
उत्तुंगतालद्रुमोपरिस्थप्रलंबपर्णालिदंभेन गाढं निजनायकाचरितसंभोगरंगतः श्लथकुंतला विकीर्ण-
केशा, मंदंमंदं गिरिवरझरदमलसलिलप्रवाहमिषेणार्द्रीभूतोरुजघनस्थला, किंशुकोत्फुल्लारुणकुसुमा-
लिदंभेन सुरतोत्सवासक्तस्वामिकृतनखक्षतपंक्तिविराजितकदलिस्तंभनिभकोमलोरुभागा, जलयंत्रो-
च्छलदितस्ततो विकार्यमाणामलसलिलबिंदूत्करमिषेण सुरतरंगोत्सवश्लथिलीभूतनायककरमर्दितोत्तुंग-
पीनकठिनस्तनस्तबकगतोरुशौक्तिकेयहारविलोटनविकीर्यमाणगलदुरुमुक्ताफलोत्करा सुरतोत्सवेन कृ-
तार्थीभूतप्रमदेव प्रभाभरोत्तेजितवदना समजायत. तत्सपत्नी प्राचीदिक् च मंदंमंदं प्रकाशनपरतार-
कोरुनेत्रैर्निजनायकं दिनकरं स्वसपत्न्या प्राच्या सहाभिसरंतं, तां च निजसुरतोत्सवरक्तां कुर्वं

विलोक्य सापत्न्यतो ह्यतीवखिन्नेव क्षणं श्यामानना समजनि. निशाकरोऽपि निजं विलासवतीं विलासिनीं पूर्वाशां दिनकरोत्संगसंगिनीं तत्संयोगरंगरंगरंजितां च विलोक्य वज्रहतदग्धहृदय इव परिपक्वपलाशपर्णपांडुरवर्णोऽपास्ततेजस्कवदनः समजायत. निजनायकोरुपादप्रचारप्रबुद्धाः कासार-रम्यावासस्थिताः कमलिन्योऽपि विकसितवदना भ्रमरव्याजमिषेण शरीराहितसुरभिकस्तूरिकाविलेपनाः, पवनप्रेरितजलोर्मिमालाभिरितस्ततो विलोलनमिषेण निजनायकोत्संगसंगरंगौत्सुक्यं व्यंजयंत्य इव कंपमानाः समजायंत. पतिविरहातुरा वराकी चक्रवाकी निशावसानपर्यंतं रुदनपरा निजनयनविनिर्ग-ताश्रुधारादंभेन रजनींप्रति शापोद्गारवर्षणवर्षणानंतरं क्रमेणारुणोदयविज्ञाततदवसानामंदानंदोच्छ्व-सितहृदया निजमधुरचित्कारनादैर्दिनकरं दीर्घायुराशीर्वादध्वनिभिः सत्कारयंतीव निजपतिसंगममाप्य सुखभाजनं जाता. रुन्मानसंगमासक्तहृदया हंसा अपि स्वकीयसुहृदो हंसस्योदयं निरीक्ष्य सज्जना इव संमदसंदोहोत्फुल्लहृदया निर्मलोरुपक्षद्वयाः कमलाकरान्तिसंतुष्टचित्ता अभवन्. तिग्मरुचिरपि निजोदयं वीक्ष्य निजोग्रकरप्रचारैः स्वकीयारितमसोंतं विधाय तदाश्रयवितरणपरमाकाशमंडलमपि चपलं विभिन्नश्रवणकरं व्यधात्. पुनरपि लब्धोदयमुदयाचलोरुकांतस्वरसिंहासनस्थं राजानमिव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोकबांधवं निरीक्ष्य सर्वेऽपि लोकास्त्यक्तनिद्रा अतीवानंदोल्लसितहृदयास्तन्नतिपराः स्वस्वकार्यकरणो-त्सुक्यभाजो बभूवुः. चंमकरातिप्रचंडकरोत्करैर्निरस्तां स्ववैरिणीं रजनीपिशाचिनीं विज्ञाय विगत-भया अरण्यनिवासिमृगादिपशवोऽपि निजार्भकादिपरिवारपरिवृताः सूर्योपकारं मन्यमाना इवाधःकृ-तमस्तकास्तृणगणं निर्भयं हृष्टहृदया भक्षयंतिस्म. दिनश्रीरपि तेजःपुंजालंकृतं निरस्तारितमोगणाप्त-विजयमेकातपत्रजगद्राज्यकरणप्रवणं निजनायकं विज्ञायामितानंदकल्लोलोल्लसितचित्ता कासारोद्भ-वप्रफुल्लकमलावलिमिषेण विकासितलोचनैरीक्षांचकार. निशोद्भवतामसनिशाचरोऽपि स्वकीयवैरिणं सहस्रकिरणमुदितं विज्ञाय तत्करनिकरोग्रप्रहारैस्ताड्यमानो द्रुतं द्रुतं पलाय्य स्वसहचरनिशाटना-दियुतः प्राप्तपराभवेण संकुचितांग इव त्रस्यमानो गिरिगहनगह्वरं भेजे. मंगलपाठकैः श्रावितोरुमं-गलगीतश्चित्रसारथिरपि शय्यातः समुत्थाय कृतदेवार्चनाद्यावश्यकक्रिय आस्वादितनानाविधस्वादो-पेतभोजनः, शरीराहितरुचवसनालंकारालंकृतो यानमारुह्य स्वस्वामिप्रदेशिनृपपार्श्वे ययौ. तत्र सभास्थं नृपं प्रणम्य किंचिद्राज्यकार्यालापं विधाय स जगौ, हे स्वामिन्! अस्मदश्वशालायां वेगविनिर्जित-दिनकरस्यंदनरथाश्चत्वारः कांबोजदेशीया हया वर्तंते, अतश्चेद्भवदिच्छा तर्हि तानद्य स्यंदने योज-

यित्वा तत्स्यंदनसमारूढावावां मृगवने क्रीडाविनोदार्थं गच्छावः. एवंविधं स्वहृदयंगमं स्वप्रियसारथेर्वचनं निशम्य राजातीवसंतुष्टो जगाद, भो सारथेऽहमपि तत्स्यंदनारूढो मृगवने क्रीडार्थं गंतुमिच्छामि, अतस्त्वं शीघ्रमेव रथं सज्जीकुरु? अथासभूपादेशश्चित्रसारथिर्निजवांछितार्थसाधनायोत्सुको मनस्यतीवमुदितस्तूर्णं रथं सज्जीकृत्य नृपसमीपे समानयत्. अथ तदारूढौ चित्रसारथिप्रदेशिनृपौ पुरमध्यमार्गेण निःसृतौ स्वप्रतापाक्रांतदिक्चक्रौ जनजनितावनीतलावतीर्णसारथ्युपेतगगनमणिस्यंदनभ्रमौ क्रमेण प्रतोलीद्वारमुपागतौ. अथ सारथिप्रेरितहयाकृष्टो रथः स्ववेगेनोभयपार्श्वस्थविषमभूमिमपि समरेखामाविष्कुर्वन्, दूरस्थवृक्षादीनपि निकटीकुर्वन्, स्वचित्कारनादैर्दिक्चक्रमपि बधिरीकुर्वन्, हयखुरचक्रोत्खातरजःपुंजैरंबरतटमप्याच्छादयन् भूरिभूमिमुल्लंघयांचकार. सारथिभूपावपि रथस्थौ विविधवार्तालापविनोदपरंपरापरायणौ, दूरस्थगिरिशिखरनिर्झरनदीपर्वतादीनपि क्षणमात्रेणोल्लंघयंतौ, कोकिलादिमधुररवश्रवणेनोल्लसितहृदयौ, रथचित्काररवाकर्णनत्रस्यमानार्धचर्वितदर्भांकुरभृदास्योत्प्लवमानमृगार्भकदर्शनाप्तविनोदासक्तहृदयौ, वृक्षाद्वृक्षं प्लवमानप्लवंगमाघातभूमिपतिताम्रादिपक्वफलालिं रथचक्राभ्यां चूर्णयंतौ, विकस्वरस्वकीयकमलालिविलोकनैरनेककासारैर्विलोक्यमानौ,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वायुविकीर्णानेकसुरभिकुसुमोत्करैर्वनश्रिया वर्धाप्यमानौ, पवनप्रेरितकोमलारुणनवांकुरपल्लवांगुलीभि-
स्तरुवराकराहूयमानौ क्रमेण चलंतौ गणधरेंद्रश्रीमत्केशिकुमारचरणारविंदपवित्रितं मृगवनं तौ मनागं
समलंचक्रतुः. इतस्तत्र नातिदूरस्थपठत्पंचशतवाचंयमाननोद्भवजैनसूत्रपाठगभीरध्वनिरनिलकल्लोलप्रे-
रितो निकुंजपुंजपर्णालिमुल्लंघ्य प्रदेशिनृपश्रवणपुटयोरापतितः. वर्षर्तूद्भवघनाघनघनगभीरगर्जनध्वनिं
स्मरन्निव प्रदेशिनृपोऽप्याकस्मिकं निकुंजपुंजादागच्छंतं ध्वनिमेनं निशम्यातीवकुपितश्चित्रसारथिम-
प्युवाच भो सारथे! वाजिरश्म्याकर्षणेन त्वं द्रुतमेवात्र रथं स्थापय? गवेषय चात्र निर्जनवने कस्यायं
ध्वनिर्मम कर्णकोटरे निशिताग्रशरप्रहार इव विशन्मर्मस्थानानि भिनत्ति? एवं मिथ्यात्वकालकूटकव-
लोद्गारनिभां नृपतिवाचं निशम्य चित्रसारथिरप्युवाच, हे स्वामिन्! श्रीपार्श्वप्रभुसंतानीयः केशिकुमारा-
ख्यो गणधरेंद्रः परोपकारैककार्यप्रवृत्तिर्दयार्द्रीभूतांतःकरणोऽत्र वने समवसृतोऽस्ति, तद्विनीतविनेयानां
च शास्त्रपाठध्वनिश्चायं श्रूयते, चेद्भवदिच्छा तर्हि तत्र गत्वा विलोक्यते तत्कौतुकं. एवंविधचित्रसारथि-
वचनाकर्णनानंतरं कौतुकावलोकनाभिलाषी नृपोऽपि तत्र गमनोत्सुको जातः. विज्ञातनृपाभिप्रायः
सारथिरपि मुनीशपवित्रितोपवनंप्रति स्यंदनमप्रेरयत्. अथ नातिदूरं स्यंदनस्थनृपस्तत्र विमुक्तशो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कमशोकतरुतलाधोऽमरनिकरनिर्मितकार्तस्वरारविंदस्थितं विनेयगणमुच्चैः शास्त्रपाठं पाठयंतं गण-
धरेंद्रं विलोक्य मिथ्यात्वपिशाचाधिकृतहृदय इव चित्ताविर्भूतोग्रक्रोधानलोद्भूतधूमघटानिभां वाचं
सारथिं प्रत्यजल्पत्, भो सारथे! जगद्वंचनैककुकर्मकरणप्रवणोऽयं पाखंडिमुंडोऽत्र वनखंडेऽमीषां मुं-
डानां मध्ये किमारटनमारटति? अथवा जाड्यजालावलंबिनो जडा जडजालमेव निजपाखंडजाले
पातयितुं समर्था भवंति. अतोऽहमधुनैवैषां पाखंडिनां पाखंडं प्रकटीकृत्य तन्मतखंडनं च विधायैनं
पाखंडिमंडलमस्माद्वनखंडान्निर्वासयामि. इत्युक्त्वा प्रदेशिभूपालोऽभिमानावेशकीलककलित इव क-
टीतटन्यस्तहस्तः स्थाणुरिव मुनिवरसन्मुखं स्थित्वा जगाद, भो मुने! किमर्थमत्रेदं पाखंडारटनं त्व-
यारब्धमस्ति? तन्निशम्य परोपकारैकतत्परो गणधरेशो जगाद, हे राजन्! कर्माहिदष्टानामंगिना-
मुपकाराय चिंतामणिमंत्रोपमनिजं शुद्धात्मभावप्रकटनपरं धर्मोपदेशं यच्छामि, यत्प्रभावादयं जीवो
नरकाद्यधोगतिगमनोन्मार्गं विमुच्य स्वर्गादिशुभगतिगमनसन्मार्गं लब्ध्वामितशर्मनिबंधनापवर्गं ग-
च्छति. अथैवंविधां मुनीशवाचं निशम्य निपीतमिथ्यात्वोग्रमदिरोन्मत्तचित्तो नृपतिरुवाच, भो मुने!
त्वज्जल्पनानुसारेण यदि नरकस्वर्गादिगतयो विद्यमाना भवेयुस्तदा मम मनोगतसंशयांधत्वं दूरी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुरु? यथा तत्र ज्ञानपरीक्षापि प्रकटीभवेदित्युक्त्वा स यथोचितस्थाने समुपविष्टः. तत्पृष्ठे चित्रसार थिरपि स्वोचितस्थाने समुपाविशत. अथावसरज्ञो गणधरेंद्रो नृपमुद्दिश्य पीयूषसागरतरंगोरणीनिभां वाचमुवाच, हे गुणज्ञावनीपाल! भवन्मानसं स्वभावतो निर्मलमपि यत् स्वर्गनरकाद्यनस्तित्वा-भिप्रायकर्दमावलिप्तमस्ति तज्जिनवचनरचनामृतामलांभोधारया च निरस्ततत्पंकावलेपं दर्पणमिव नि-र्मलीभूतं तत्प्रतिबिंबितस्वर्गनरकाद्यस्तित्वाभिप्रायप्रकटनपरं भविष्यति. आकर्ण्येतिमुनीशवचनोऽव-नींद्रश्चेतसि चमत्कृतो व्यचिंतयदहो नूनमेष महात्मा महाज्ञानी विज्ञायते, यतोऽनेन मन्मनोग-तोऽप्यभिप्रायो मदग्रे प्रकटीकृतः, इति विचिंत्याविर्भूतकिंचिन्मुनीशवचनश्रद्धो धराधिप उवाच, भो मुनीश! पूर्वं मम पितामहोऽतीवमृगयासक्तो मृगाद्यनेकसत्वानां ध्वंसमकरोत, भवदीयाभिप्रायेण च मरणानंतरं तस्य नानादुःखोत्करप्रकटनपरं नरकगमनमेव शरणं. अहं च तस्य जीवतो मम पिता-महस्यातीवप्रेमपात्रमभवं. अथ चाल हिंसाद्यनेकपातकोत्करप्रेरितः स मम पितामहो मरणशरणीभूतो नरकातिथित्वमापन्नस्तत्र यदि परमाधार्मिककृतानेकविधासह्यांगारत्परंपराशरणो भवेत्तदासौ नूनं ततो द्रुतमेवात्रागत्य प्राणेभ्योऽप्यधिकवल्लभं मां हिंसाद्यधर्मान्निवारयेत्, परमद्यावधि तेन तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंचिदपि कृतं नास्ति, अतोऽहं जाने सर्वोऽप्ययं धर्मकरणादिप्रपंचो गगनपुष्पमिव केवलमसत्यवादमेव प्रपोषयति. अथैवं प्रदेशीनृपालोक्तवचनानि निशम्य गणधरेंद्रः किंचिद्विहस्योवाच, भो नृपते त्वत्संशयछेदनायाहं मया कथ्यमानं युक्तियुक्तमुत्तरं त्वं विशेषात्सावधानीभूय शृणु? मनोहरवस्त्राभूषणादिविभूषितांगोपांगं रूपविनिर्जितमन्मथं यौवनलावण्याद्यमितगुणगणाकृष्टाखिलगौरवमदापरिकरं कंचित्पुरुषं तव प्राणप्रियसूर्यकंताभिधमहिष्या सह संभोगपरायणं स्वकीयलोचनाभ्यां विलोक्य त्वं तस्याधमपुरुषस्य कं दंडं कुर्याः? राज्ञोक्तं तस्याधमस्याहं विलंबं विनैव शिरछेदपूर्वकमंतकातिथिं कुर्यां. सूरिवरेणोक्तं हे राजन्! त्वदीयकोपानलज्वालामालाकवलीकृतः स वराकोऽधमस्तदैव स्वकुटुंबमिलनार्थं चेद्घटिकावधिसमयं त्वत्तो याचेत. तदा तदुपरि दयां विधाय त्वया किं तस्य तत्समयः प्रदीयेत? राज्ञोक्तं तस्य क्षणमात्रमपि समयमदत्त्वैव तत्कृतकर्मफलरूपं शीघ्रं मस्तकछेदमेव कुर्यां. सूरींद्रो जगौ हे राजन्! एवमिह कृतानेकहिंसाद्यकृत्यपरंपरस्ते पितामहः पंचत्वं प्राप्य नरकैकशरणीभूतः कृतदुःकर्मानुसारिफलरूपानेकविधासह्यशारीरमानसादिदुःखानुभवैककार्यः पूर्वोक्तलंपटविट इव नरकाधिकारिपरमाधार्मिकैः कथंचनापि क्षणमात्रमप्यमुच्यमानः पराधीनतया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्प्रतिबोधस्पृहयालुरपि स कथंकारमिहागत्य त्वां प्रतिबोधयेत!! एवंविधं युक्तियुक्तं मुनीशवचनं निशम्य हृद्युदितविवेकदिनकरकरापास्ताज्ञानांधकारावकाशोऽवनीपालो जगाद, हे मुनीश! नूनमद्य भवदाननशशांकोद्भवनिर्मलवचनकिरणोत्करेणाद्यावधि कठिनाश्मीभूतमपि मे मानसं चंद्रकांतमणिरिवार्द्रीभूतं. इत्युक्त्वा प्रदेशीनृपो मुनीशं प्रणम्य पुनरपि जगाद, हे मुनींद्र! सदैव जिनधर्मरक्ता दयार्द्रीभूतांतःकरणा च मे पितामही पापालोचनपूर्वकमाराधनापरा पंचत्वं प्राप्तास्ति, सा च भवदीयमताभिप्रायेणाचिंत्यशर्मनिबंधनस्वर्गे गता संभवति. सापि चेह जीवंती ममातीवप्रेमभाजनमासीत्. परमद्यावधि तयापि नाहमत्रागत्य धर्माराधनाय प्रबोधितोऽस्मि, न चास्माद्धिंसाद्यकार्यान्निवारितोऽस्मि, ततोऽहं मन्ये यत्स्वर्गादिकं किमपि नास्ति. इति नृपोक्तं निशम्य गणधरेंद्रो जगौ, भो भूमीश! सुस्नातः कृतमृगमदादिसुरभिद्रव्यविलेपनो देहाहितमनोहारिवस्त्राभूषणो धृतसुगंधोपेतवरकुसुमादिमाल्यो देवार्चनार्थं गछंस्त्वं केनापि चांमालेन चर्मास्थिवसारक्ताद्यशुचिपदार्थसार्थभृते स्वगृहे समागमनाय निमंत्रितः किं गमिष्यसि? राज्ञोक्तमेवंविधेऽशुचिवस्तुभाजने चांडालगृहे तु शतधा निमंत्र्यमाणोऽप्यहं नैव गछामि. मुनिपतिर्जगाद हे भूमींद्र! देवा अप्येवं वचोऽगोचरनाट्या·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेकसुखासक्ता वरसुरभिमाल्यालंकृतदेहा अतीवविषयाभिलाषेण देवांगनासक्तचित्ता मनुष्यजव-संबंधिसर्वस्नेहं विस्मृत्य दुर्गंधाकुलेऽत्र मनुष्यलोके समागमनेच्छामपि नो कुर्वंति. अत एव कारणात्तव पितामह्यपि तत्रानुपमसुखासक्तात्र त्वां प्रतिबोधयितुं नायाति. मुनीशवचनजाताधिकश्रद्धोऽवनीपालः पुनरप्यवदत्, भो वाचंयमेश! तर्हि देहाज्जीवः किं भिन्नोऽस्त्यथवाऽभिन्नः? मुनींद्रो जगौ हे राजन्! जीवस्तु सर्वथा देहाद्भिन्नोऽस्ति. नृपेणोक्तं हे भगवन्नेकदा सामंतसचिवादिपरिवृतस्य सभागतस्य ममाग्रे दंडनायक एकं लोहनिगडनिगडितकरचरणं स्तेनं समानीय प्रोवाच, हे स्वामिन्नयं मनुस्यघातको महाक्रूरकर्माचरणपरः स्तेनो मयाद्य धृतोऽस्ति, अथास्य दंडप्रदाने भवंतः प्रमाणीभूताः. एतन्निशम्यातीवकोपाक्रांतहृदयेन मयोक्तं, भो दंडाधीश! अस्य महाधमस्य पुरुषस्य देहमत्रैव मद्दृष्टौ खंडशो विधेहि? मदादेशकरणैकचित्तेन दंडाधिपेनापि खड्गप्रहारैस्तद्देहस्यानेके खंडा विहिताः, परं मया तत्र क्वापि स्थाने जीवो न दृष्टः. अत एव चाहं ब्रवीमि यद्देह एव जीवः, न तु देहात्स कोऽपि भिन्नोऽस्ति. इति राज्ञोक्तं श्रुत्वा गणधरेंद्रो जगौ, हे राजन्! त्वदीयशंकापनोदाय मया कथ्यमानं निदर्शनं त्वं सावधानतया शृणु?—इत्युक्तेऽवहितहृदयं राजानं प्रति मुनी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शो जगौ—कस्मिंश्चिद्ग्रामे वसंतः पराङ्मुखीभूतकमलालयानिर्वासितास्तद्दीर्घ्ययेव कमलाग्रजांगी·
कृताः केचित्कौटुंबिकाः स्वोदरदरीपूरणाथ काष्टानयनाय सिंहव्याघ्रव्यालाद्यनेकक्रूरप्राणिभयंकरेऽपि
गहनगहने प्रभातसमये जग्मुः. तत्र मध्याह्नं यावदतुलश्रमेण लब्धकाष्टोत्कराश्चंडरश्मिरश्मिस्तोमा·
तितप्तमस्तकाः क्षुत्पिपासाप्रपीडिता भोजननिष्पादनाभिलाषेणाग्निं गवेषयामासुः. पश्यंतोऽप्यभितो
गवेषयंतोऽपि परितो न ते क्वाप्यग्निमीक्षांचक्रुः. ततः क्षुधातुरत्वेनातीवम्लानाननास्ते कमप्युपायम·
लभमानाः परस्परमाननावलोकनैकतत्पराश्चित्तोद्भवातीवचिंतापिशाचीवशीकृतहृदया वटवृक्षाधः स्थि·
ताः. इतः सहस्रभानुभानूत्कराभितप्तकायः कोऽपि बुद्धिमान् पांथो व्रजन् पथश्रमापनोदार्थं तत्रैव
वटवृक्षाधः स्थितः. तत्र म्लानाननानतीवचिंतातुरान्मौनावलंबिनश्च तान् कौटुंबिकपुरुषान् वीक्ष्य द·
यार्द्रीभूतहृदयः स पांथोऽपृच्छत्, भो पुरुषाः! भवदीयमनस्सु कैवंविधा चिंता वर्तते, येन यूयमतीव·
म्लानास्याः संजाताः स्थ. ते प्राहुर्भो पांथ! क्षुधातुरा वयमानीतभोजनसामग्रीका अपि क्वापि व·
ह्निमलभमाना भोजननिष्पादनाभिलाषिणोऽपि चिंतापिशाच्यधिकृतचित्ताः स्मः. एवं तच्चिंताकारणं
विज्ञाय विज्ञानशाली कृपार्द्रीभूतांतःकरणः स पांथः प्राह, भो पुरुषाः! युष्मदवचितेऽस्मिन् काष्टो·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्करे यदरणिकाष्टं वर्तते, तत्सकलमप्यग्निसंभृतमस्ति.

एतत्पांथोक्तं निशम्य स्वयं विज्ञानशालिन इवैनं पांथं ग्रथिलमिव मन्यमाना तद्धास्यं विधाय ते प्राहुः, रे मूढ! अस्माभिरनेकवारं तदरणिकाष्टं खंमशः कृतमस्ति, परं तत्र कदापि वह्निरस्माकं दृष्टिगोचरीभूतो नास्ति. तत्र चानलास्तित्वं ब्रुवन्नूनं त्वं कोऽपि ग्रथिलो विज्ञायसे. तदुक्तं श्रुत्वा गभीरहृदयः पांथो मनसि मनागपि कोपावकाशमप्राप्य विज्ञाततदज्ञानो दयोल्लसितहृदयः पुनर्जगाद, भो कौटुंबिनः! तदरणिकाष्टखंडद्वयं गृहीत्वा यूयं परस्परं घर्षयध्वं? येन तदंतःस्थितोऽग्निः स्वयमेव प्रादुर्भविष्यति. कौतुकावलोकनस्पृहयाद्भुभिस्तैः पांथोक्तवचनश्रद्धानरहितैरपि तथैव कृतं, प्रादुर्भूतश्च तत्रैतश्चमत्कारकारको वह्निः, निष्पादितं च तैर्भोजनं, शामितं च तेन क्षुधोग्रानलज्वालावलिदग्धं स्वकीयं जठरपीठरं, स्वीकृतश्च निजाज्ञानदशाशोचनपूर्वकं पांथोपकारः. एवं हे राजन्ननेन निदर्शनेनाज्ञानविडंबितैस्तैः कौटुंबिकैः खंमशः कृतेऽप्यरणिकाष्टशकले यथा विद्यमानोऽप्यग्निर्न ज्ञातस्तथा त्वयापि खंडशः कृतेऽपि वराकस्तेन शरीरे विद्यमानोऽपि जीवो न ज्ञातः. पुनरपि नृपो जगौ, हे भगवन्! एकदा मया कृतमनुष्यवध एको वराकोऽपराधी जीवपरीक्षार्थं निबिडलोह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पेटामध्ये क्षिप्तः, तथा मुद्रितं च तत्पेटाद्वारं यथाग्नितः संचरन् वायुरपि तत्र प्रवेशं न प्राप्नुयात्. घटिकानंतरं च तत्पेटाद्वारमुन्मुद्य यदा मया विलोकितं, तदा तन्मध्ये स वराको मया जीवरहितो मृत एव दृष्टः, परं पेटामध्यान्निःसरंतं तज्जीवं कथंचनाप्यहं नो दृष्टवान्. तदा मया निश्चितं यद्देह एव जीवः, न तु ततः पृथक्कोऽपि जीवोऽस्ति. राज्ञोक्तं श्रुत्वा वाचंयमेशः किंचित्स्मितं विधाय प्राह, हे राजन्! निश्छिद्रागारगतमनुष्यताड्यमानभेरीझांकारध्वनिर्निःसरणावकाशं विनापि यथा बहिर्गतैर्लोकैरविलोक्यमानोऽपि श्रूयते, तथायमात्मापि देहं विमुच्य गच्छन् लोहशिलादिभिरप्यस्खलितो ज्ञानाख्यदिव्यनेत्रंविना केनापि दृष्टुं न शक्यते. अथ पुनरपि नृपतिरुवाच, हे स्वामिन्नेकदा मया मृगयागतेनैकः केवलं विनोदार्थं प्रोत्तुंगतरुशिखरस्थः पारापतपतत्री धनुर्मुक्तशरेण व्यापादितः, परीक्षार्थं च तत्कलेवरं मयैकस्मिन् कुंभे निक्षिप्तं, तत्कुंभपिधानं च मया तथा मुद्रितं यथा तत्र पवनसंचारोऽपि न स्यात. कियद्दिनानंतरं च मया तत्कुंभपिधानमुन्मुद्योद्घाटितं, तदा तत्पारापतकलेवरं च मया कृमिकुल्याकुलं दृष्टं, निश्चितं च मनसि यद्देहात्कोऽपि नास्ति भिन्नो जीवः. तदा मुनींद्र उवाच भो मेदिनीश! यथाग्निनातीवतप्तेऽयोगोले निश्छिद्रेऽपि वह्निप्रवेशो जायते, तथा त्व-

For Private And Personal Use Only

या मुद्रितकुंभगतपारापतकलेवरेऽपि कृमिसमुत्पत्तिर्ज्ञेया. पुनर्नृपो जगौ भो संयमींद्र! एकदा मयै-को मनुष्यघाती पुरुषः परीक्षार्थं तोलितः, ततः श्वासरोधेन मारितः स एव पुरुषो मया तोलितः, परं तस्य देहतोलनप्रमाणं तु न न्यूनाधिकमभूत. अतोऽहं मन्ये देहाद्भिन्नः कोऽपि जीवो नास्ति. मुनींद्र उवाच, भो नृमींद्र! यथा वायुरहिता वायुसंयुता च तोलिता दृतिर्नो न्यूनाधिकप्रमाणा भवति, तथा जीवरहितो जीवयुतश्चापि देहस्तोलितो न न्यूनाधिकप्रमाणो जायते. पुनरपि नृप उवाच हे भगवन्! भवदुक्तमेतत्सर्वमपि मम सत्यं प्रतिभासते, परमस्ति स कोऽप्युपायः? येनाहं जीवं प्रत्यक्षं नयनाभ्यां वीक्षे. मुनींद्र उवाच भो मेदिनीपते! अस्य कंपमानतृणगणस्य प्रेरको वायुर्ज्ञातोऽपि यथास्माकं चर्मचक्षुषां नो नयनपथमायाति, तथायं जीवोऽपि रूपरहितत्वादस्मादृशां चर्मचक्षुषां नो नयनगोचरीभवति, केवलं केवलज्ञानवतां दिव्यचक्षुषामेव स दृष्टिपथमायाति.

अथैवमपास्तसकलसंदेहः प्रदेशिनृपालो हृदयोदितविवेकभानुप्रबलप्रतापप्रभाभरापगतमिथ्यात्वांधकारः सहसोत्थाय गणधरेंद्रं च त्रिःप्रदक्षिणीकृत्य पंचांगपातं प्रणम्य ललाटबद्धांजलिर्जगौ, हे स्वामिन्! कषायादिलोलकल्लोलकदंबकव्याकुलेऽस्मिन् संसारापारपारावारे स्वात्मसत्यस्वरूपलुंटनैकप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टुमिथ्यात्वझुंटाकेन प्रक्षिप्तस्येतस्ततो विलोड्यमानस्य, पंचाक्षविषयानेकनक्रचक्रमकरादिजलचरनिकरैः पराभूयमानस्याज्ञानांधत्वेनालब्धपारस्य ममाद्य ध्वजादिशुभलक्षणलक्षितं भवच्चरणोरुप्रवहणं करगोचरीकृतं, तदवलंबनेनाविलंबितमेवाहमेनस्यालब्धपारस्यापि संसारपारावारस्यापरपारं प्राप्स्ये. परं कुलक्रमागतमेनं मिथ्यात्वधर्मं मुंचतो मम हृदयं लज्जापिशाची व्याकुलीकरोति. एतन्नृपोक्तं श्रुत्वा स्वकीयशुभ्रोरुदंतालिकिरणैर्नृपतेर्भाविस्वर्गामितसुखानां वर्णिकां दर्शयन्निव मुनींद्रोऽपि मनाग्स्मित्वा प्राह, भो धरणीपते! मयैकं निगद्यमानं निदर्शनं त्वं सावधानतया शृणु? नृपतिर्जगाद स्वामिन् भवदुच्यमाननिदर्शनाकर्णनायाहमवहितोऽस्मि. मुनींद्रो जगाद—

दारिद्र्यपिशाचपराभूतः कश्चिद् ग्राम्यसार्थो द्रव्योपार्जनहेतवे स्वग्रामान्निःसृत्य सिंहव्याघ्रव्यालादिव्याकुलां विकटाटवीमुल्लंघ्य क्रमेणैकं लोहाकरं प्राप्तः. तत्र लोहनिकरं विलोक्य हर्षोत्फुल्लहृदयास्ते तल्लोहग्रंथिं बध्ध्वा स्वशिरस्सूत्पाट्याग्रे चलिताः, क्रमेण च ताम्राकरं प्राप्ताः. तदा तैर्मिलित्वेति विचारितं यल्लोहं स्वल्पमूल्यं, ताम्रं च तदधिकमूल्यमत एतल्लोहं मुक्त्वा ताम्रं स्वीकुर्मः. इति विचिंत्य तैर्मूर्त्तिमद्दारिद्र्यमिव लोहभारं दूरे निक्षिप्य ताम्रभारोंगीकृतः. परं तन्मध्यादेकेनातीवमूर्खपुरु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षेण पूर्वं गृहीतो लोहभारो न मुक्तः, ताम्रभारश्चापि न समादृतः. सार्थपुरुषैर्बहुवारं प्रतिबोधितोऽपि स निजाग्रहं नामुंचत, प्रत्युताकथयच्च बहुकष्टेन लब्धमेनं लोहभारं कथमप्यहं नो मुंचामि. ततोऽग्रे गच्छद्भिस्तैः स्वतेजःस्तोमतिरस्कृतकौमुदीप्रभो रूप्याकरो दृष्टः, प्रमुदितैश्च तैस्ताम्रभारं त्यक्त्वा दारिद्र्यस्य जलांजलिदानपूर्वकं रूप्यभारः संगृहीतः. स जडस्तु तैर्बहूक्तोऽपि स्वकीयं मूर्तिमद्दौर्भाग्यमिव मस्तकोत्पाटितं लोहभारं न तत्याज. ततः क्रमेणाग्रे क्रमद्भिस्तैः सहस्रकिरणकिरणाकर इव कार्तस्वराकरो विलोकितः. तदा बुद्धिमद्भिस्तैः स्वल्पमूल्यं रूप्यभारं त्यक्त्वा स्वसौभाग्याकार इव स स्वर्णभारः संगृहीतः. दौर्भाग्यपिशाचाविष्ट इव स मूर्खस्तु तत्कथनममन्यमानः स्वकीयं लोहभारं नो त्यक्तवान्. पुनरग्रे गतैस्तैर्वज्रवैडूर्यादिमणिरत्नाकरो वीक्षितः, तदा लक्ष्मीदेवीकटाक्षितैरिव तत्कृपोपकारं बहु मन्यमानैरधिकतमद्रविणगणस्पृहयालुभिस्तैः कनकभारमुत्सृज्य वज्रादिरत्नभारः संगृहीतः. स महामूढपुरुषस्तु तैर्बहुवारं प्रबोधितोऽपि निजाभिनिवेशपिशाचपराभूत इव रत्नाकरानादरपरः स्वकीयं लोहभारं न तत्याज. अथ ते सर्वेऽपि पश्चान्निवृत्त्य स्वस्थाने समागत्योपार्जितामितद्रविणा वरभोजनाच्छादनाद्युल्लसितहृदयाः सुखभाजोऽभवन्. स लोहभारवाही मूढपुरुषस्तु पश्चात्तापपरो.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदैव दारिद्र्यातिथीभूतो महाक्लेशपरंपरामाजीवितं सहमानो दुर्ध्यानपरो मृत्वा दुर्गतिं जगाम. अतो भो राजंस्त्वमपि स लोहभारवाही मूढपुरुष इव दुर्गतिप्रदमिथ्यात्वोपेतवंशपरंपरागतनास्तिकधर्मपरित्यागे लज्जानिबंधनमाविष्कुर्वन् पश्चात्तापं माकार्षीः? अथ गणधरोक्तां वाचं निशम्येयत्कालपर्यंतं स्वकृतमहाघोरपापोत्करातिभीत इव कंपमानांगोपांगः प्रदेशिनृपालः कथमपि समुत्थाय ललाटपट्टबद्धांजलिपुटः प्रस्खलद्वचनं जगाद. हे भगवन्! मृगयादिदुर्व्यसनाविष्टहृदयेन मया नूनमियंतं कालमनेकानि पापाचरणान्याचीर्णानि. अथाधुनैवाहं मम तत्पापाचरणोग्रफलप्रदानोत्सुकनरकाधिकारिपरमाधार्मिकैरतीवकदर्थ्यमानमिव मे हृदयं भयेन कंपते, नेत्रे अपि तमःस्तोमाछादिते इव दिग्भ्रमं सूचयतः, पादावपि निबिडायोनिगडनिगडिताविव पदमपि गंतुं न प्रभवतः. अथ तु मम त्वमेव शरणं, अगण्यपुण्यशरण्यस्त्वमेव भवपंकनिमग्नं मां धौरेय इवोद्धर्तुं समर्थः, ध्वजादिवरलक्षणगणालंकृतभवच्चरणप्रवहणमेव संसारार्णवे भ्रमंतं मां तारयितुं समर्थं भविष्यति. हिंसाद्युपेतमिथ्यात्वधर्माचरणेन भाविनरकभयभीतं मां रक्ष रक्ष? अथैवं नरकोग्रोरगविषभयभीतं कंपमानांगोपांगं च प्रदेशिनृपालं विज्ञाय गणधरेंद्रो मणिमंत्रसन्निभवचनैस्तमाश्वासयामास. भो भूपाल! अथ त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विषादं मा कुरु? जिनोक्तवरवचनाचरणोरुस्यंदनारूढस्त्वं पथि नरकाधिकारिपरमाधार्मिकश्वापदपरिवारैरपरिभूयमानः, कषायोत्कटलुंटाकपेटकैरनुपद्रुतः, द्विविधधर्मोरुतुरंगमाभ्यामाकृष्यमाणः, धर्मध्यानोरुशंबलपरिपुष्यमाणः, मार्गश्रमापनोदार्थं स्वर्गादिरम्यभोगोपचितावस्थानेषु निवासं कुर्वन्, अनगारोपदिष्टधर्मोपदेशामृतपानेन संसारदाहोद्भूतपिपासां पराकुर्वन् मोक्षमार्गसन्मुखीभूय क्रमेण सिद्धशिलाख्यं कमनीयं महापुरं प्राप्य चिरोत्कंठिताया अतिरम्यमुक्तिरमाया अविनश्वरं पाणिग्रहणं करिष्यसि. एवं मुनिवरवचस्तुतिसुधोरुधाराधरधोरणयापास्तहृदयसंतापः प्रदेशिनृपालो विनयेन गणधरेंद्रं प्रणम्योवाच, हे स्वामिन्! भवदुक्तो जिनधर्मोऽथ मह्यं रोचते, मिथ्यात्वांधकारांधिते मम नेत्रे भवदीयोपदेशांजनेनाद्योद्घटिते. अथ प्रातरहं रोलंब इव पुनरत्रागत्य भवच्चरणारविंदं च निषेव्य श्राद्धव्रतमकरंदं गृहीत्वा निजात्मानममंदानंदमग्नं करिष्ये.

इति नृपोक्तं श्रुत्वा गणधरेंद्रोऽवादीत, हे राजन्! धर्माचरणविधाने प्रमादं माकार्षीः. अथ मनस्यतीवमुदितो राजा चित्रसारथियुतो गणधरेंद्रं भावेन नमस्कृत्य रथाधिरूढो निजावासे समागतः. ततो नृपश्चित्रसारथिंप्रत्युवाच, भो मित्र! अद्य तव सहायेन मया सुगुरुदर्शनं प्राप्य संसारसा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गरतरणतरंमोपमो जिनधर्मो लब्धः. अथ श्वःप्रभाते त्वया सह स्यंदनारूढोऽहं मृगवने गुरुसमीपे गत्वा सम्यक्त्वमूलानि श्रावकव्रतानि लास्ये. अथ प्रमुदितश्चित्रोऽपि नृपेन विसृष्टो निजावासमाजगाम. नृपोऽपि भोजनादि विधाय सभायामागत्य कृतराज्यकार्यः सायंकाले स्वशयनावासमलंचकार. सूर्योऽपि निजावसानसमयं विज्ञाय प्रचंडप्रभावानपि स्वकरान् प्रक्षीणतेजस्कतया भूमौ लंबयन् मरणभयभीतपुमानिव कंपमानांगः क्रमेणास्तं प्रयातः. पूर्वदिगपि प्रचंडतेजसोऽपि स्वस्वामिनोऽवसानं विलोक्य कुलिनविधवेव तमोविस्तरदंभेन स्वांगे श्यामवर्णशाटिकां परिधाय गिरिझरनिझरवारिदंभेनाविरतमश्रुपातं कुर्वती, निजनिजनीडगमनोत्सुकानेकपतत्रिनिकरकृतारावमिषेण तारस्वरं पूत्कुर्वती स्वहृदयोद्भूतामितशोकमदर्शयत्. स्वकीयारिं दिनकरमस्तं गतं विज्ञाय गिरिगुहादिषु लीनं तमोऽपि घूकादिनिजसैनिकगणोपेतं बहिर्निःसृत्य सर्वामपि महीं स्वायत्तां चकार. चंडभानोश्चिरतरं खरतरकरनिकरनिपातातीवदूनेव महीमहिला कमनीयं निजनायकं शांतकरं सुधाकरं समागतं विलोक्यातीवमुदितेव कौमुदीविस्तरणदंभेनांगे श्वेतशाटिकां परिदधाना गगनविकीर्णतारकोत्करदंभेन मौक्तिकनिकरेण वर्धापयामास. तमोनिशाचरप्रचारोद्भवभयभीता इव सर्वेऽपि देहिनो

For Private And Personal Use Only

निद्रादंभेन मूर्छा प्रयाताः. दिवा सहस्रकिरणेन चुंबनसंयोगादुत्सुककामिनायकेनेव वारंवारं स्वकर-
प्रक्षेपेणोदस्यमानापि सतीव स्वकोशहृदयमनुद्घाटयंती कुमुदिनी निजनायकं सुधाकिरणमागतं
विज्ञाय तदीयातीवकोमलसुखकरकरस्पर्शनोऽतीवमुदितेव कोशोद्घाटनदंभेन हास्यं दधाना स्वांग-
लग्नसलिलबिंदुदंभेन हर्षाश्रूणि मुमोच. निजांगजं निशाकरमुदितं परिणीतकौमुदीवरकन्यकं च वि-
ज्ञाय सागरोऽप्युच्छलल्लोलकल्लोलकैरालिंगनोत्सुक इव रराज. ब्राह्मणो मोदकोत्करमिव गृहमणि-
स्तामसोत्करमाकंठं भक्षयित्वा व्याकुलित इव कंपमानः कज्जलजालदंभेन सकलमप्यमवत. मद-
नानलसंतप्तांगा नवपरिणीता प्रमदा स्वपतिमिलनोत्सुका ललाटतटविरचितकस्तूरिकावल्लीदंभेन
निशां वधापयंतीव शयनावासे समेत्य लज्जया दीपकविध्यापनमिषेण तामसोत्करादरपूर्वकं नूपुरझं-
कारदंभेन प्रकटं दिनश्रियै शापं वितन्वंतीव दृढालिंगनेन निजस्वामिनमतीवानंदमुदपादयत्. स्व-
कीयस्वामिनं पंकजिनीपतिं पवनवेगोच्छलितसरःसलिलकल्लोलांदोलिता कंपमानेव कामुकरजनीकरक-
रस्पर्शं निवारयंतीव दृढनिबद्धस्वकीयकोषद्वारा मकरंदरसलुब्धांतर्निबद्धमधुकरझंकाररवदंभेन वि-
पंतीव तस्थौ. तामसनिशाचरेणापि स्वकीयावसरं प्राप्य गिरिगुहादितो बहिर्निःसृत्य गगनतलोदि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानेकतारकोत्करदशनावलिकलितं करालं स्वाननं विकास्य गलित इव सकलोऽपि दिनकरोद्भवस्तेजःपुंजो विलयं ययौ.

अथ प्रदेशिनृपालोऽपि सुखनिद्रया रात्रिं निर्गमय्य मंगलतूर्यवर्यनिनादाकर्णनगतनिद्रः प्रभाते दिनकरकरनिकरस्पर्शनोद्बितो निजसुहृच्चित्रसारथेरागमनं विलोकयन् वातायने तस्थौ. चित्रसारथिरपि प्रातर्गतनिद्रो निजसुहृन्नृपसम्यग्दर्शनोपेतजिनधर्मावाप्त्युत्सुकोऽविलंबमेव स्यंदनं सज्जीकृत्यानंदप्रेरित इव नृपावासे समाययौ. ततस्तौ द्वावपि स्यंदनारूढौ मुनिवरचरणारविंदनमनोत्सुकौ पथि विविधवार्तालापं कुर्वंतौ नानारण्यवरेण्यकौतुकानि विलोकयंतौ मुनिगणचरणन्यासपवित्रिते मृगवने प्रापतुः. तत्र रथादवतीर्य तौ द्वावपि केशिकुमारगणधरेंद्रं विनयेन प्रणम्य यथास्थानमुपविष्टौ. ॥ इति श्रीजामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालेन विरचिते श्रीप्रदेशिनृपालचरित्रे गद्यबंधे तृतीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

अथ केशिकुमारगणधरेंद्रोऽपि तयोरग्रे धर्मोपदेशं ददौ. ये भव्या दुस्तरसंसारार्णवयानपात्रनिभानां जिनानामर्चनं कुर्वंति, ते देवपालनरेंद्रवन्नियतं कल्याणमालां लभंते. एवं मुनिवरोक्तं वचनं श्रुत्वा धर्माचरणोत्सुकमानसः प्रदेशिनृपालो बद्धांजलिर्जगौ, हे भगवन्! कोऽसौ देवपालः? कथं तेन जिनार्चनं कृतं? का च कल्याणमाला तेन लब्धा? सकलमपि तच्चरित्रं कृपां विधाय मदग्रे प्रकटीकृत्य मामपि धर्माचरणविधौ नियोजयध्वं? गणधरेंद्रोऽपि नृपं तच्चरित्रश्रवणोत्सुकं विज्ञाय जगाद, हे राजन्! शृणु —

उज्ज्वललवणार्णवसलिलकल्लोलमालाप्रक्षालिताखिलकश्मले जंबूद्वीपे भरतचक्रवर्त्येककीर्तिस्थाने भारते क्षेत्रे मध्यखंडेऽनेकजिनागारपरिमंडिता मथुराख्या नगरी वर्तते. तत्र रिपुगणोन्मत्तमातंगकेसरिसन्निभः सिंहरथाभिधो नृपः पुत्रवन्निजप्रजां पालयतिस्म. तत्कोमलकरकमलनिवासैकलालसा कमलालयोन्मुक्तचापल्या कदाचिदपि तन्मंदिरं न जहातिस्म. तस्यां नगर्यां वणिक्कुलवंशमुक्तामणिसन्निभो नृपतिमान्यो बुद्धिविनिर्जितसुरगुरुर्जिनधर्मपरमादरपरो नित्यं जिनार्चार्चनतत्परो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनदत्ताख्यो महेभ्योऽभूत्. तस्य गृहे देवपालाख्य एको गोपालः किंकर आसीत्. स च सर्वदा स्वस्वामिन आज्ञया तद्गवां चारणार्थमरण्यमध्ये याति. अथैकदा तत्र वर्षर्तुः समागतः. घनकज्जलजालनिभा मेघाः परितः समागत्य रक्षस इव तडित्तरलतेजोऽसिपाणयो गभीरगर्जनज्वलनास्त्रोत्करधृतो ज्योतिरिंडं सहस्रकिरणं सपरिवारमाच्छादयामासुः. चंद्रकिरणातीवचंडकरपातैश्चिरमभितप्तां बहिर्निःसृतबास्पावलिमिषेणातीवनिःश्वासान् मुंचतीं विरहातुरां मूर्छितां प्रमदामिवावनीं मंदंमंदमतीवशीतसलिलधाराभिर्मेघः सिंचतिस्म. चिरकालेन देशांतरागतनिजप्रियालिंगनेन कामातुरकामिनीव धरापि नवोद्भिन्नांकुरोत्करणमिषेण रोमांचं प्रकटयंती मंदंमंदं वहज्जलप्रवाहदंभेन क्षणादेव द्रवीभूता. सुरतोद्भवकलहेन चिरमवाङ्मुख्यपि श्यामा निबिडघनगर्जनभयभीता चाटुवचनरचनप्रयत्नं विनैव मदनातुरं भर्तारं दृढमालिंग्य सहसैवामंदमानंदमुत्पादयामास. पथिकहृदयामानविरहानलबहिर्निर्गततापोत्करा इव निबिडगभीरघनगर्जनदंभेन तदंतःकरणानि स्फोटयंत्य इव विद्युतोऽप्यभितः प्रसस्रुः. निजावासकासारगतकमलिन्योऽपि स्वस्वामिनं चंडकरमपि घननिशाचरपराभूतं विज्ञायातीवशोकातुरा इव गलद्घनसलिलदंभेनाश्रुधारा मुंचंत्यः स्वहृदयं स्फोटयंतिस्म. पक्षद्वयविशुद्धा हंसा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि निजमित्रं हंसं जलदरक्षोऽभिभूतं विलोक्य शोकातुरा इव क्रीडापराङ्मुखाः स्वकीयावाससरांसि विमुच्य देशांतरं गंतुकामा इव मानसंप्रति याताः. जलदवर्षणभृत्पुलिना नद्योऽपि कुलटा इव कुलद्वयं विनाशयंत्यः, प्रकटितावर्त्तनाभयः, स्वांगजानपि मत्स्यादीन् दूरमुल्लालयंत्यः, स्वकीयस्वैरगमननिवारकान् महतोऽपि वृक्षपाषाणादीनुल्लसत्स्वकीयकल्लोलकैरुत्सारयंत्यो गतत्रपा इव प्रकटमेव रत्नाकरमालिंगयामासुः. वसुधापि स्वकीयस्वामिनमब्दं विद्युद्गर्जनादिमहाडंबरकलितमागतं विलोक्य नवोद्भिन्नतृणांकुरोत्करदंभेनांगाहितनीलोत्तरीया केकिकेकारवमिषेण मंगलगानं कुर्वंती सत्कारयतिस्म. इतो गोचारणार्थमरण्यगतेन तेन देवपालगोपालेन निबिडं वहज्जलप्रवाहतो निर्धौततटिनीतटात्तत्सौभाग्यमिव प्रकटितं श्रीमदादिदेवबिंबं दृष्टं. विस्मयस्मेरमानसो देवपालस्तां जिनप्रतिमां विज्ञाय लब्धनिधान इवोत्पाट्य विरते च मेघे सरितोऽपरतटे मृद्रेणुमिश्रितामेकां वेदिकां विधाय स्थापयामास. तदुपरि च स वानेयदारुनिर्मितं मंडपं व्यधात. ततोऽसौ भावेन तदर्चनं विधाय स्वचित्ते चेति नियममकरोत, अतःप्रभृति मयास्य देवाधिदेवस्यार्चनं कृत्वैव भोजनं विधेयं.

अथैकदा निबिडाडंबरांधिताखिलदिक्चक्रो वातोत्खातानेकपादपो घनाघनो मुशलधाराभिः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्ताहोरात्रं यावद्ववर्ष. नद्यागतामितजलपूरेण निवारितो देवपालो देवाधिदेवजिनबिंबार्चनासमर्थो गृहीतनियमाग्रही सप्तोपवासानकरोत. अथाष्टमे दिने विरते च जलदे, समस्थिते च नदीपूरे देवपालोऽरण्ये गत्वा जिनबिंबार्चनमकरोत. तदा तन्नियमसंतुष्टस्तद्बिंबाधिष्टायकोऽमरः प्रत्यक्षीभूय तमुवाच, भो देवपाल! अहं त्वज्जिनभक्तितस्तुष्टोऽस्मि, अतस्त्वं वरं वृणु? देवपालेनोक्तं भो सुर! यदि त्वं तुष्टस्तर्हि मह्यं राज्यं देहि? देवेनोक्तमितः सप्तमेऽह्नि त्वमस्य नगरस्याधिपतिर्भविष्यसि. इत्युक्त्वाऽदृश्यीभूते दिवौकसि देवपालोऽपि गेहे गत्वा भोजनमकरोत. अथ सप्तमेऽह्नि तस्यैव नगरस्य सिंहरथाभिधो नृपो दैवयोगेन पुत्ररहितः पंचत्वमीयिवान्. तदा प्रधानपुरुषैर्मिलित्वा नृपनिश्चयकृते पंचदिव्यानि शृंगारितानि. दिव्यानि च तानि नगरमध्ये भ्रामंभ्रामं यत्र स देवपालो गाश्चारयन्नरण्यमध्ये समुपविष्टोऽस्ति तत्रागतानि. तत्र भृंगाराभिषिक्तो देवपालो गजेन निजस्कंधे समारोपितः, छत्रं च स्वयमेव तदुपरि विकसितं, चामराभ्यामपि स वीजितः. ततस्ते प्रधानपुरुषास्तं गजारूढं देवपालं नगरमध्ये समानीय तस्य राज्याभिषेकं चक्रुः. क्रमेण तं देवपालं गोपालं विज्ञाय सर्वेऽपि ते प्रधानपुरुषास्तदाज्ञां न मन्यंतेस्म. तदा खिन्नचित्तो देवपालो दध्यावहो विनाज्ञां ममैतेन जिन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत्तेन राज्येन किं? अतोऽहं जिनाग्रे गत्वा ममैतं व्यतिकरं निवेदयामि. इति विचिंत्यासौ नदिनी-तटस्थे जिनगृहे गत्वा भक्त्या जिनप्रतिमां प्रणम्यार्चनपूर्वकं न्यवेदयत्, हे स्वामिन्! कृपां विधाय त्वया मह्यं राज्यं दत्तं, परं सचिवनागरादयो ममाज्ञां न मन्यंते. अतोऽवकेशिद्रुमनिभेनैतेन निष्फलेन राज्येन किं? एवंविधां तद्विज्ञप्तिं निशम्य तदधिष्ठायको देवः प्रकटीभूयोवाच, भो देवपाल! त्वं चिंतां मा विधेहि? त्वदिष्टितं सर्वमपि कार्यं सफलं भविष्यति. त्वमेकं मृत्पिंडमयं वारणं कारय? तं च विविधालंकारैरलंकृत्य करधृतशरासनयुक्तशरस्तदारूढस्त्वं राजमार्गे गमनागमनं कुरु? स मृन्मयोऽपि गजो मत्प्रभावेण केनाप्यनिवारितो विश्लेषामपि त्वदरीणां भयमुत्पादयन् भ्रमणं करिष्यति, भयभीताश्च ते सर्वेऽपि बद्धांजलयो मुकुटमिव त्वदीयाज्ञां स्वमस्तकेषु धारयिष्यंति. एवं स देवो देवपालमाश्वास्यादृश्यीबभूव. अथ गतचिंतो देवपालोऽपि दिवौकोवचसि श्रद्धानो जिनप्रतिमां प्रणम्य निजावासे समागत्य कुंभकारानाहूय मृन्मयगजविनिर्मितये समादिदेश. तैरप्यचिरमेवैरावणनिभो मृन्मयो गज एको विनिर्मितः, राज्ञे च समर्पितः. अथ तं मृत्तिकाविनिर्मितं स्तंबेरमं विविधालंकारैरलंकारयंतं देवपालनृपालं विलोक्य सचिवादयो राजलोका जहसुः, अहोऽयं देवपा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लनृपालो बाल इव मृन्मयहस्तिनमाभूषणगणैर्विभूषयन्नूनं स्वगोपालत्वोद्भवां मूढतामेव सूचयति. एवं हास्यं कुर्वतां तेषां पश्यतामेव देवपालः करधृतशरासनयुतशरस्तं मृन्मयगजमारुरोह. तत्का लमेव देवाधिष्टितः सोऽनेकपोऽपि सजीवसत्यगजेंद्र इव निजं शुंडादंडमुल्लालयन् दिग्गजानपि भापयन्नितस्ततो राजमार्गे गमनागमनमकरोत. एवं मृन्मयमपि तं गजं चलंतं विलोक्य चेतस्स्व तीवचमत्कृताः सचिवादयो भयभीताः कातरा इवोल्लवंतो दधाविरे. आकर्णाकृष्टशरासनो गजस्कं धारूढो देवपालोऽपि भयेन धावमानान् सचिवादीन् प्रति जगाद, भो भो सचिवादयः! यूयं द्रुत मेव मदीयाज्ञामंगीकुरुध्वं? अन्यथा मदीयोऽयं शरासनमुक्तो दिव्यशरः सर्वानपि युष्मानधुनैव य मातिथीन् करिष्यति. एवं देवपालोदितं वचनं सिंहनादमिवाकर्ण्य ते सर्वेऽपि सचिवादयः शृगाला इव महाक्षोभं प्राप्य भयकंपमानांगा विमुक्तपलायनाः कीलिता इव तस्थुः. देवपालोऽपि देवाधि ष्टितं तं गजं स्थापयामास. भयभीतास्ते सचिवादयोऽपि तदग्रे समेत्य बद्धांजलयः स्वकीयापराधक्ष मायाचनपूर्वकं तं प्रणिपत्य मुकुटमिव तदीयाज्ञां शिरस्सु दधुः. अथ संयमितशरो देवपालोऽपि भयातुरांस्तान् सर्वानप्याश्वास्य तैर्युतो नागरिकैः सविस्मयं विलोक्यमानो, मंगलार्थमद्भुतभूतस्थाल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाणिभिः पौरीगणैर्वर्ध्याप्यमानः, भेरीमृदंगादिविविधवादित्रनादैर्दिग्गणमपि बधिरीकुर्वन्, सुवासि-
नीवनितावृंदैर्गीयमानामानयशोवृंदः, प्लवमानानेकतुरंगमोत्खातरजोगणैर्गगनांगणमाछादयन्, अने-
कानेकपकपोलस्थलगलन्मदवारिनिर्झरैः सूर्याचितशां मेदिनीमभिसिंचन्. स्यंदनस्तोमशिखरलग्नाने-
कपंचवर्णपताकोत्करैरंबरतःमप्यलं चित्रयन्. पदातिपरिवारामितपदपातजानातिभूकंपेन शेषाहेरपि
चेतसि चमत्कारमुत्पादयन्, यौवनरम्यगोपांगनाभिरप्यपांगनेत्रैः सस्पृहं वीक्षितः क्रमेण क्रमंस्तटिनी-
तटे युगादिदेवप्रतिमाविभूषिते स्वनिर्मितकाष्टजिनालये ययौ. तत्र स्वकीयमृन्मयगजादुत्तीर्य जिन-
प्रतिमां च भावेन पूजयित्वा सचिवादिनतपादारविंदः सकलपरिवारपरिवृतस्ततो निवृत्य बंदिवृंदैः
संस्तूयमानो निजालयमाजगाम. ततोऽसौ पूर्वकृतोपकारं संस्मृत्य जिनदत्तश्रेष्टिनमाहूय सचिवमुख्यं
चकार. अथाधिगतजिनदत्तश्रेष्टिश्रेष्टसहायो निर्मितराज्यसुव्यवस्थितिर्नित्यं निजजिनपूजनियमं प्र-
पालयन्, पंचेंद्रियजन्यविविधभोगोपभोगान् भुंजन् देवपालनृपालः स्वसमयं गमयांचकार. क्रमेण
तेन तटिनीवनिताकटीतटालंकारभूतं गगनांगणचुंबिशिखरमंबरतटपथ्याविरतभ्रमणातिश्रांतसहस्रकरकृ-
तनिवासमिव कार्तस्वरवरकलशांकितं, परितो निर्मितानेकगवाक्षगणविलोचनैः सृष्टिसौंदर्यं विलो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कयत्, पंचपर्णपताकाव्यजनजनितातिशीतवातोत्करनिरस्तसंसारतापार्जितप्रानेकभविकनिकरसंतापं श्रीयुगादिदेवमंदिरं परिशीलितशील्पशास्त्रवरशील्पिभिर्निर्मापितं. सन्नीतिपथप्रयाणास्तान्यायमार्गसुखीकृतप्रजोऽसौ धर्माराधनपरः क्रमेणायुःक्षये पंचत्वमाप्य स्वर्गं जगाम. क्रमान्मोक्षमपि स यास्यति. एवं हे प्रदेशिनृपते! देवतत्वविषये मयेदं देवपालनिदर्शनं तव निदर्शितं. सम्यग्धर्मप्राप्तिश्च जीवानां सुगुरोरेव प्रसादाज्जायते, यथा सर्वदानर्थमार्गप्रसक्तो जयघोषपुत्रो सुंदराभिधः सुगुरुप्रसादाद्धर्ममाराध्य प्रांते मुक्तिमहिलापाणिपीडनप्रवणो बभूव.

अथैवंविधां केशिगणधरेंद्रोक्तां घनाघनघनगर्जननिभां वाणीं निशम्य मयूर इवामंदानंदकल्लोलोच्छलितहृदयो मेघसलिलधाराहतकदंबकुसुममिव पुलकितांगः प्रदेशिनृपालः शिरोबद्धांजलिपुटो जगाद, हे भगवन्! कोऽसौ कर्णसुंदरचरित्रः सुंदरः? कथं च तेन रमणीयमुक्तिरमणीरमणत्वं प्राप्तं? तस्य चित्रं पवित्रं सकलमपि चरित्रं कथयित्वा मम श्रवणपुटं पवित्रं कुरुध्वं? तदा गणधरेंद्रोऽपि मिथ्यात्वहरिणगणत्रासकृते कंठीरववररवनिभां वाणीं जगाद. हे नरेंद्र! अनेकजिनवरेंद्रकृषीवलव्रजोप्तबोधिबीजे, जैनागमविस्तीर्णानेकसलिलसारणीधोरणीसिंचिते, द्विविधधर्मवरवृषभयुगलक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्षितेऽस्मिन्नेव भारते क्षेत्रे रत्नपुराभिधं पुरं बभूव. यत्रानेकवणिग्वैरैर्निजविपणेषु विक्रयार्थं प्रकटीकृतान् मणिमाणिक्यादिरत्नोत्करान् विलोक्य रत्नाकरोऽपीर्ष्ययाभितप्तहृदय इव केवलं स्वकीयं मकराकरत्वमेव मन्यमान उच्छलत्कल्लोलकरैः स्वहृदयं सर्वदा कुट्टयतिस्म. तत्र जयवर्माख्यो धराधिपः सन्नीत्या राज्यं कुर्वन् पुत्रवत्प्रजां पालयामास. तस्य नृपस्य प्रबलं प्रतापं निरीक्ष्यासहमाना इवारिनिकरा घूकप्रकरवद्गहनगिरिगह्वरान् भेजुः. तस्यातीवमाननीयो जयघोषाख्यो वणिग्वरस्तस्यां पुर्यां निवसतिस्म. अनारतं रत्नाकरपथप्रयाणप्रवणानेकप्रवहणानीतनानाविधक्रयाणकैस्तत्र व्यापारं कुर्वन्, भूरिद्रव्यं चोपार्जयन्, बहुद्रव्यदानव्ययमंत्रेण च दारिद्र्यपिशाचाभिभूतानेकजनानां दुःखं दूरीकुर्वन्नसावासमुद्रांतं निजकीर्तिं विस्तारयामास. तस्य जगद्विस्तृतातीवयशोभरा सुयशाभिधा वल्लभासीत्. तस्य कार्तस्वरामिततेजःपुंजविराजितमतीवकोमलमुरुयुग्मं निरीक्ष्य त्रपातुरा इव कदलीमाला गहनारण्येऽगण्यतरुगणनिकुंजपुंजेषु निलीना इव वनवासं भेजुः.

अथ स जयघोषश्रेष्ठी निजवंशपरंपरागतं सुगतधर्ममेव निर्मलमुक्ताफलनिभं मन्यमानोऽहर्निशं निजहृदयालंकरणीकरोतिस्म. पंचेंद्रियातुलशर्मलीनौ तौ दंपती विविधसमृद्धिरूपालवालस्थितौ,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधवरस्वादोपेतषड्रसाहारसिक्तौ यौवननववनस्थौ समये व्यतीतेऽप्यवकेशिपादपावित्र स्वकुला धारभूतं पुत्रफलं नापतुः. अथैकदा दिनावसाने कमलिनीमिव सुतानाप्तिचिंतातुरतयातीवम्लानमुखीं निजांगजां सुयशां निरीक्ष्य जयघोषोऽपृच्छत्, हे प्रिये! चंद्रकरकरनिकरपराभूतं दिवा शशांकबिंबमिव किमद्य तवाननं निस्तेजस्कं प्रतिभाति? म्लानीभूतं तव मुखपंकजं निरीक्ष्य मम मानसमरालोऽपि निराशीभूयाद्य खेदं प्राप्नोति. अतस्तव चेतश्चिंताकारणं मह्यं निवेदय? एवं निजप्रेयःपृष्टा सुयशा नयनयुगलगलदश्रुधारोत्करप्लावितोत्तरीया स्खलदक्षरा निजनाथं प्रत्युवाच, हे स्वामिन्! मणिमौक्तिकोत्करोपेतं रत्नाकरनिभमपि त्वां लब्ध्वाप्यानंदकंदोत्पादकं शशांकनिभं पुत्ररत्नं न प्राप्तास्मि. अत एवाहमद्य निरालंबं शोकसागरे निमग्नास्मि. अथैवंविधां निजप्रियावाचं निशम्य जयघोषोऽपि चिंतानिवारणार्थं स्वकीयां गोत्रदेवतामाराधयामास. सापि प्रत्यक्षीभूयोवाच हे जयघोष! तव पुत्ररत्नं भविष्यति, परं स तव परंपरागतं बुधधर्मं त्यक्त्वा जिनधर्ममंगीकरिष्यति. इत्युक्त्वा गोत्रदेवताऽदृश्यीभूता. अथ गोत्रदेवतयोक्तं वृत्तांतं स निजप्रियायै निवेद्य तां चाश्वास्य स्वचेतसीति व्यचिंतयत. नूनमहं येन केनाप्युपायेन पुत्ररत्नं बुधधर्ममुकुट एव नियोजयित्वा तममूल्यमेव विधा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्ये. अथ गोत्रदेवीप्रभावात्सुयशापि रत्नगर्भेव गर्भे पुत्ररत्नं दधाना निजस्वामिनमप्यानंदयामास. संपूर्णे च समये प्राची शशांकबिंबमिव हृदयोदधिसमुल्लासनालं सा पुत्ररत्नं सुषुवे. अमंदानंदोल्लसितमानसो जयघोषोऽपि पुत्रजन्मोत्सवे लक्षप्रदानेन मार्गणगणं संतोषयामास. अथ तं सुतरत्नमतीवसुंदराकारं निरीक्ष्य दंपतीभ्यां प्रमोदेन स्वजनसाक्षिकं तस्य गुणनिष्पन्नं सुंदराभिधानं चक्रे. क्रमेणोल्लंघितबाल्यभावः सुंदरः शशांक इव सकलकलाकलापकुशलः स्वपितृहृदयकुमुदमुल्लासयामास. अथासौ यौवनवनं गतोऽनंगमृगयुशरव्यो मा भूयादिति विचिंत्य पितृभ्यां स एकया कुलीनया सुरूपया च कन्यया सह परिणायितः. स्मृतनिजगोत्रदेवतोक्तवचनो जयघोषो मासौ बुधधर्मं त्यक्त्वा जिनधर्ममंगीकुर्यादिति विचिंत्य तं बुधागमाध्ययनकृते बौद्धनिर्ग्रंथपार्श्वे मुमोच, जातश्च क्रमेणासौ बुधागमोदधिपारगः. अथ सुगतागमवारिधौ सुदृढतरंमिकामिव कामं रममाणां तन्मतिं विज्ञाय गतचिंतो जयघोषो सुनाविक इवामंदानंदं प्राप्तवान्. इतोऽन्यदा युवकयुगलातीवाभिलाषरज्जुपुंजाकृष्ट इव वसंततुसमयस्तत्रागतः. मंजरीपिंजरीभूताम्रतरवोऽरण्यागतवसंतभूपस्वागताय वनदेवतोत्तंभितवंदनमालिका इवाभितो बभुः. पंचमस्वराविष्कृतहृदयोल्लासाः कोकिलगणा इतस्ततो भ्रमंतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विरहातुरपांथानां हृदयानि विदारयामासुः. द्रुमपिशाचपतिः पलाशोऽपि निजावसरं प्राप्याकंठं पीतविरहातुरपथिकपलशोणित इव विकसितारुणवर्णनिजपर्णगणमाविष्कुर्वन् सर्वानपि पांथान् दुर्बलांश्चकार. नवीनागतवसंतनृपतेर्बंदिन इवेतस्ततो भ्रमंतो भ्रमरा निजमकरंदरसलुब्धत्वं प्रकटयंतो काननेऽमंदं गुंजारवं चक्रुः. निर्भरानंदोल्लसितहृदयानां लतामंडपेषु दृढमालिंगितानां युवकदंपतीनां लग्नानि हास्यस्तबकानीव निकुंजेषु कुंदमुचकुंदकुसुमावलयो रेजिरे. भ्रमद्भ्रमरनिकरमिषेणाविष्कृतकटाक्षविक्षेपा वनश्रीरपि यौवनमदोन्मत्तानां युवां मनोमृगाननंगव्याधामोघशरविषयांश्चकार. नवपल्लवाहितशरीरशृंगारास्तरवोऽपि पंचशरशरवारप्रभिन्नहृदया इव कामिनीकटाक्षविक्षेपगंडूषसेकपादप्रहारादिभिः प्रकटितमनोमन्मथविकारा नूनं निजपल्लवांगुलिभिस्तरुणयुगलगणान् वसंतोत्सवायाजूहवन्. प्रफुल्लमालतीलतागणाछादितगहननिकुंजगतं कमपि तरुणं निर्जनत्वेन गतत्रपं निजनवपरिणीतप्रियामुखचुंबनपरायणं निरीक्ष्याविर्भूतोत्कटमदनविकार इव दिनकरोऽपि स्वप्रियां कमलिनीं निजकरैर्निर्भरमालिंग्य परिचुंबतिस्म. मन्मथशरोन्मथितहृदयापि कापि नवपरिणीता कामिनी पतिसंगमोत्कंठितापि लज्जया पराङ्मुखीभूता सौगंध्यलुब्धनिकटभ्रमद्भ्रमराभिभूयमानमुखकमला तद्दंशभ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन सहसैव निकटस्थं चाटुपरायणं निजस्वामिनमयत्नमेव निर्भरमालिंगतिस्म. स्वप्रियाकपोलयुगलवरवर्णचौर्यपरायणं तत्र प्रफुल्लपाटलकुसुमस्तबकं विलोक्य कश्चिद्युवा हृदयाविर्भूतामितेर्ष्ययेव लूनातिस्म. विविधकुसुमसंचयद्युलितलताछादितमंडपेषु निःशंकं सुरतोत्सवासक्तमिथुनानां निःसीमश्रमोद्भवस्वेदबिंदूनामपनोदाय खलु दययेव निजावसरं प्राप्य दाक्षिणात्यो मलयानिलो मंदंमंदं ववौ. पीनोन्नतकठिनस्तनफलां विद्रुमारुणाधरप्रवालां कोमलकरांगुलिनवोद्भिन्नपल्लवां स्मितोरुकुसुमसंचयां कांचिन्नवयौवनप्रमदां निजभर्त्रातिगाढमालिंगितां विलोक्य मदनातुरेव वसंतोत्सवाभिलाषिणी नवोद्भिन्नफलप्रवालपल्लवकुसुमोत्करा ऽऽद्राक्षवरवल्लर्यपि सरसं रसालतरुं स्वकीयं भर्तारमेव मन्यमाना परिवेष्टनमिषेण दृढमालिंगतिस्म. निर्जननिकुंजमध्ये पंचशरपिशाचवशगेन सुरतोत्सवरसासक्तमानसेन युवा निजभर्त्रा स्वकीयगौरपीनोन्नतकठिनकुचयुग्मयोर्विरचितामरुणप्रभां खरनखरपंक्तिमपि सुरतरसास्वादाधिगतामंदानंदतयोरस्तटाहितविद्रुममालामिव मन्यमाना काचिद्रतोत्क्षिता नवयौवनप्रमदा लज्जयेव निजोत्तरीयेणाविलंबितमाछादयामास. सुरतश्रमोद्भवस्वेदबिंदुकदंबकव्याकुलां निजप्रियामालोक्य प्रेमग्रथिलः कश्चिद्युवा कोमलकदलीदलतालवृंतेन वीजयन् स्वप्रियोपरि पततं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्मथोन्मथितसहस्रकरकरनिपातं निवारयन्निव रेजे. माधवीलतामंडपे हेलांदोलितांदोलनोपविष्टया मंदंमंदं वहन्मलयानिललहरीमालाचांतघर्मोद्भवस्वेदबिंदुकदंबकाया श्चर्वितवरकस्तूरीकर्पूरपूर्णतांबूलदलाविर्भूतसुरभिसुरभीकृताखिललतामंडपायाः कस्याश्चित्प्रमदायाः सुधाकरकरनिकरगौरं मुखं वरसुगंधोपेतं साद्याद्विकसितं कमलकुसुममेव मन्यमानः पंचशरशरनिकरनिपातपराभूतकामुक इवाविरतझंकाराखमिषेण चाटुपरो भ्रमरो मुखचुंबनाभिलाषेणाभितो भ्रमन् सत्येव तया कोमलकराभ्यां निवार्यतेस्म.

एवंविधं कमनीयं वसंतं वनमध्ये समागतं विज्ञाय कोकिलकलरवाहूता इवेतरेऽपि युवनागराः स्वस्वकामिनीसुहृद्गणोपेताः क्रीडोत्सवचिकीर्षया सरसरसालादितरुनिचयालंकृतेष्वरण्यनिकुंजपुंजेषु स्यंदनादिवरवाहनारूढाः प्रययुः. स्वमित्रैः प्रेर्यमाणः सुंदरोऽपि वसंतोत्सवाभिलाषेण पुष्पावतंसोद्याने जिगमिषुर्निजजनकस्याज्ञामयाचत. जयघोषोऽवादीद्वो पुत्र! सुखेनैव त्वया वसंतोत्सवाय गंतव्यं, परं तत्र त्वया बुधधर्मानुयायिभिर्विनान्यधर्मिजनानां संगो न विधेयः. पित्रैवं शिक्षितः सुंदरोऽथ स्वसुहृद्गणोपेतो वरयानारूढः क्रीडार्थं पुष्पावतंसोद्याने प्रययौ. तत्र विविधवर्णोपेतानेककु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुमावचयादिक्रीडां कुर्वन् सुहृद्भिः सममनंदानंदमनुभवन् भ्रमर इव भ्रमन् स सुंदरः क्वचिदशोकतरुतलस्थितमग्रभागस्थभविकजनानां संसारतापोच्छेदायोपदेशामृतपानं कारयंतं जैनमुनिमेकं विलोक्य स्वसुहृदोऽपृच्छत्, भो सुहृदोऽत्र रक्ताशोकतरुतलस्थितोऽयं मुनिः किमाख्याति? तत्र गत्वा वयमपि तदाख्यानं शृणुमः. तदा सुहृदोऽवदन् भो मित्र! अयं हि जैनो मुनिर्जिनधर्मोपदेशं प्रयच्छति, पित्रा च ते त्वमन्यतीर्थिसंगमं निवारितोऽसि, अतस्तदुपदेशश्रवणे पितुराज्ञाभंगो न ते श्रेयस्करः. सुंदर उवाच भो सुहृदः! खड्गानलादिदर्शनेन यथा कापि दोषोत्पत्तिर्न जायते, तथास्य मुनेरपि दर्शनं न खलु कस्यापि दोषस्योत्पत्तये भविष्यतीत्युक्त्वासौ समित्रो नातिदूरमशोकतरुतलस्थमुनिसमीपं प्राप्तः. मुनीशोऽपि स्वकीयातींद्रियावलोकेन तं सुंदरं भाविकल्याणं विज्ञाय विशेषेण धर्मोपदेशं ततान. मोहकादंबरीकदंबकातिलुप्तचैतन्या जीवा हितोपदेशदातारं सद्गुरुमप्यवगणय्य कषायादिभिल्लगणैरुपद्रुताश्चतुर्गतिचतुष्पथे भ्रमंतो निःशरणा भवांधकूप एव पतंति. परं सुगुरूपदेशश्रवणौषधापास्तमोहमदिरोत्पन्नास्वास्थ्या भविकदेहिनः कषायहालाहलधारया सिक्तं दुर्गत्येककटुफलप्रदानसमर्थं संसारविषवृक्षं मूलादुन्मूल्याविनश्वरात्यंतिकैकांतशर्मप्रदायाः कमनीयमुक्तिकामिन्याः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संगमं लब्ध्वा शाश्वतानंदपरंपरां प्राप्नुवंति. कषायातिलोलकल्लोलमालाव्याकुले संसारसागरे निःशरणं बुम्डनपराणां संबंधिवर्गोग्रग्राहकुलाकुलहृदयानां प्राणिनां सुगुरूपदिष्टो जिनधर्म एव वरप्रवहणमिव तारणे समर्थो भवति. इत्यादिजिनगुरूपदेशामृतं निपीय सुगतागमोपदेशं विषमिव मन्यमानः सुंदरः स्वसुहृदुपेतस्तत्रोपवने नानाविधवसंतोत्सवक्रीडां विधाय दिनावसाने यानारूढः स्वकीयं गृहं समाजगाम. भोजनानंतरं परमस्नेहपरः पिता सुंदरमपृछत, हे वत्स! त्वयाद्य वसंतोत्सवाय पुष्पावतंसोद्यानं गतेन तत्र किं चित्रं दृष्टं? अथ जनकाज्ञाभंगभीरुतया यावत्स किंचिन्न जल्पति, तावत्तैस्तत्सुहृद्भिर्जैनमुन्युपदिष्टोपदेशश्रवणवृत्तांतो निरूपितः. तत् श्रुत्वा कोपानलातितप्तहृदयो जयघोषो निजाननकुहराध्धूमनिभां वाचमुवाच, रे दुष्ट! बहुशो निवारितेनापि मया कथमिव त्वया पाखंडिजैनगुरूपदेशः श्रुतः? ततो लभस्वाधुनैव मदाज्ञाभंगफलं? इत्युक्त्वा तेनासौ यष्टिमुष्ट्यादिभिस्ताडितोऽपि सुंदरो मनागपि नो कुपितः. ततो जयघोषो जगौ रे दुष्ट! अतःप्रभृति त्वया मदीयाज्ञां विना कदापि वसंतोत्सवाय न गंतव्यं. सुंदरोऽपि किंचिदप्युत्तरमदत्वैव स्वकीयशयनावासे ययौ. गतनिद्रोऽसौ तत्र निजचेतसि चिंतयति, नूनमयं जिनधर्मः सर्ववांछितार्थप्रदानेऽचिंत्यचिंता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मणितुल्योऽस्ति. सुगतोपदिष्टो धर्मस्तु संसारापारपारावारपातनपाषाणसन्निभोऽस्ति. अथात्र बुद्धधर्मांधैकचक्षुषः पितुर्गृहे निवसतो मे जिनधर्मपालनं दुष्करं. अतो देशांतरे गत्वा निजभाग्यपरीक्षणपूर्वकमहं जैनधर्ममाराधयिष्ये. इति विचिंत्य देशाटनकृतनिश्चयोऽसौ निशावसाने देहचिंतामिषेण गृहान्निःसृत्य देशांतरं ययौ. पितृभ्यां बहुधा गवेषितोऽपि यदा स न प्राप्तस्तदा पश्चात्तापपरौ तौ द्वावप्यमितं दुःखमनुभूय कालक्रमेण पंचत्वमाप्य महामिथ्यात्वानिलप्रेरितौ दुर्गतिं प्रापतुः. सुंदरोऽपि देशांतरे लब्धसद्गुरुसंगमो जिनोक्तद्वादशश्राद्धव्रतव्राताराधनपरः, समुपार्जितामितद्रव्यो विहितानेकजिनमंदिरादिशुभकार्यः, क्रमेण लब्धसंयमः, प्रबोधितामितभव्यजनः प्रांते कृतानशनः केवलावलोकमुपार्ज्य शिवसुखभागभूत्. एवं हे प्रदेशिभूपाल! वांतमिथ्यात्वोग्रविषा निपीतसुगुरूपदेशामृतवारा भयंकरभवतृष्णानभिभूता अनेके भव्यांगिनो मुक्तिमहिलासंगभाजो भवंति.

इत्याकर्णितसुंदरसुंदरवरनिदर्शनः प्रदेशिभूपालः स्वकीयचेतसि चमत्कारमापन्नो भूरिप्रमोदभरोच्छ्वसितहृदयो जगाद, हे स्वामिन्! भवदुक्तसुंदरनिदर्शनाविर्भूतं गुरुतत्वं युष्मदीयाननपंकजोद्भवविविधवचनरचनरजःपुंजप्रमार्जिते मम हृदयादर्शे संक्रांतं. अथाहं तीर्थंकरवरगिरिवरोद्भवेन भव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सद्दशगणधरेंद्रास्योत्पन्नोपदेशामृतधाराधरवर्षणाभिवृद्धेन जिनधर्मोत्तमतत्वतरंगिणीप्रवाहेणानादिकालतो निबिडं मम हृदयालवालारूढं मिथ्यात्वविषवृक्षं मूलादुन्मूलयितुमिच्छामि, अतो यूयं पूर्ववत्पुनरपि कृपां विधाय मम जिनधर्मतत्वान्यपि श्रावयध्वं? एवं प्रदेशिमहिपालप्रार्थितो भगवान् केशिगणधरेंद्रोऽपि सुधामधुरया वाचोवाच, हे नृपेंद्र! जिनधर्मतत्वश्रवणस्पृहयालुस्त्वं सावधानतया शृणु? ॥ इति श्रीजामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालेन विरचिते श्रीप्रदेशिनृपालचरित्रे चतुर्थः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

## ॥ अथ पंचमः सर्गः प्रारभ्यते ॥

अथ भगवान् केशिगणधरेंद्रः प्रदेशिनृपालाग्रे जिनधर्मतत्वं प्ररूपयन्नाह, भो महीपते! आर्यक्षेत्रे तीर्थंकरवरमालिकोप्तो, गणधरेंद्रगणास्योद्भवोपदेशामृतवरवर्षणसिक्तो, नानाविधभंगभंगिरचनवरवृत्त्यभिवेष्टितत्वेनापरदर्शनवादिगणमतंगजानपद्रुतः, साधुश्रावकाचारविस्तीर्णद्विशाखो, महाव्रताणुव्रतविविधोपशाखालंकृतः, मनोवाक्कायाद्यनेकभेदभिन्ननानाविधव्रतभंगजालपर्णालिपुंजविराजि-

For Private And Personal Use Only

प्रदेशी-
चरित्रं
८०

तः, विविधस्वर्गशर्मासिकुसुमराजिपरिमंडितः, साद्यनंतसुखैकनिबंधनमुक्तिमहिलासमागमफलप्रदो जिनधर्मवृक्षो गदितोऽस्ति. यदाश्रिता ह्यंगिनः संसारोग्रसंतापानपहृताः कषायादिव्याघ्रगणानभिभूताः शाश्वतमतुलकल्याणावलिनिबंधनं शिवसौख्यं रोहिणीवदचिरेण लभंते. तत् श्रुत्वानंदोद्भवरोमांचितांगः प्रदेशिभूपालो विनयावनतो जगाद, हे भगवन्! का सा रोहिणी? कथं च तया जिनधर्माराधनतः शिवसौख्यं लेभे? एतदुदंतनिवेदनेन ममोपकारं कुरुध्वं? केशिकुमारगणधरेंद्र उवाच, भो नृपते! धनधान्याद्यपरिमितसमृद्धिसंयुतेंगाख्ये देशे गगनांगपरिचुंबितनिकानेकागारपरिवारपरिमंडिता चंपकाशोकाद्यनेकतरुसंचयविराजितोपवनालंकृता चंपाभिधाना पुर्यासीत. तत्र दासीकृतामितारातिशशिभूरिदानाकृष्टानेकभ्रमरयाचकसंचयविस्तारितोरुकीर्तिरमलमौक्तिकोत्कर विराजितः करात्तवरकमलालंकृत उद्दालितामितपापरजःपुंजो गज इव भूरिसत्त्वो मघवाभिधो नृपोऽभूत. तस्याभिनंदितकमलावासा, पुंडरीकाक्षप्रियतमैकप्रीतिपरा, सर्वपौरजनाभिवांछितागमना लक्ष्म्यभिधाना राज्ञी बभूव. तयोर्भास्वरतेजःपुंजपलब्धकीर्तयः, परितो ध्रुवाभिसरणक्रममनुल्लंघयंतः सप्तर्षय इव सप्त पुत्रा अभवन्. तेषामुपरि रूपातिशयन्यक्कृतनाककन्या, कौमुदीव जगज्जनचित्तचकोरनिचयामंदा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंददायिनी, ललाटतटतिरस्कृताष्टमीचंद्रा, जगतत्रयतरुणीविजयार्त्रिरेखालंकृतकंबुकंठी, जगज्जैत्रैक-वीरमारमहीपालनिवासाय पटकुटीसन्निभोन्नतस्तनस्तबकद्वया, मदनानलतप्ततरुणगणशांतये लावण्य-रसपरिपूर्णनाभिमंडलगंभीरकुंभा, मन्मथावनीपालनिवेशनसिंहासनसन्निभोन्नतोरुनितंबमंडला, स्मर-गजेंद्रालानसन्निभोरुवरद्वया, रणत्किंकिणिगणोपेतसुवर्णमंजीरकूजद्धंसविभूषितचरणारविंदद्वयालंकृ-ता, निर्मलशीलाद्यनेकगुणगणालंकारालंकृतांगा, चतुःषष्टिकलाकलापकलितांतःकरणा रोहिण्यभि-धाना तयोः सुतासीत. अथ कुरुजंगलदेशे हस्तिनापुरे वीतशोकाख्यनृपस्य विद्युदिवामितप्रभाल-कृता विद्युत्प्रभाभिधाना राज्यभूत्. तयोरशोकतरुरिव पितृचित्तविहंगमाधारभूतोऽमंदानंदकदंबकप्रदो-ऽशोकाख्यो नंदनोऽभूत्. सकलकलाकलापकुशलं वयोरूपकुलादिगुणगणालंकृतं तं विज्ञाय मघवा नरेंद्रस्तस्मै तां स्वकीयां रोहिणीकन्यां प्रीत्या ददौ. कुमुदोल्लासयत्सावशोकचंद्रकुमारश्चंद्र इव तया रोहिण्या सममनुपमविषयसुखानि भुंजानो निजं समयं गमयतिस्म.

अथान्यदा वैराग्यरसपूरपरिपूर्णांतःकरणो वीतशोकभूपालो निजमनसि संसारासारतां भावयन् स्वीयांगजमशोकचंद्रं योग्यं विज्ञाय राज्ये विन्यस्य श्रीवासुपूज्यार्हतोऽग्रे महाव्रतानि जग्राह. अ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थाशोकचंडधराधीशोऽपि सन्नीत्या राज्यं कुर्वन्नसह्यस्वकीयासिरवितेजसा रिपुवर्गान् घूकानिव सशोकान् विधाय प्रजांभोजपुंजं विकासयन् स्वकीयं लोकबांधवत्वं सफलीचकार. अशोकचंडेण सह यथाकालं विषयसुखान्यनुभवत्यास्तस्याः कुक्षौ नंदनवनोद्भवाः कल्पपादपा इव वांछितार्थप्रदा मनोहरा नव नंदना अभवन्. ततः प्रशस्तलक्षणगणालंकृतांगा रूपादिगुणैर्निर्जितनिर्जरकन्यकास्तस्याश्चतस्रः कन्या अभवन्. अथैकदा तौ दंपती स्वकीयसप्तभौमावासगवाक्षस्थौ नानाविधनगरकौतुकानि विलोकयंतौ निर्भरानंदरसमनुभवंतौ क्रीडां कुर्वातेस्म. तस्मिन्नवसरे लोकपालाख्यस्तयोर्लघुस्तनूजो रोहिण्यंकमलंकरोतिस्म. इतो निजप्रियांगजन्मनो मरणेनातिविह्वला, कराभ्यां निजोरस्तटमतीवकुट्टयंती, श्लथकुंतला, तारस्वरमत्यंतं रुदनं कुर्वती, उत्तरीयपटाच्छादिताननना, मुहुर्मुहुर्मार्गे पतंत्युत्तिष्ठंती च कापि ललना गवाक्षस्थया रोहिण्या राज्या दृष्टा. तदैवाजन्मतोऽननुभूतदुःखा चानन्यस्तरुदना रोहिणी विस्मयं लब्ध्वा निजप्रियमशोकचंडं नृपं पृच्छति, हे स्वामिन्नियं महिला किंप्रकारं गानयुतं नृत्यं करोति? एवं ब्रुवाणां तां रोहिणीं राज्ञीं राज्यसुखमदिरामत्तां निरंकुशं च यथातथा प्रजल्पंतीं विज्ञाय कोपाटोपारुणलोचनोऽशोकचंडावनीपालो जगौ, हे धनयौवनाधिकारादिमदोन्मत्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोहिणि! निजनंदनमरणवियोगेनाक्रंदं कुर्वत्या अस्या वराकाया महिलायाः कथं त्वं हास्यं करोषि? एतन्नृपोक्तं निशम्य पूर्वपुण्यानुयोगेनाननुभूतरुदना विशुद्धहृदया रोहिणी पुनर्जगौ, हे स्वामिन्नेवंविधं रुदनमनया क्व शिक्षितं भविष्यति? तदाभिवर्धितक्रोधेन राज्ञोक्तं रे उन्मत्ते! अधुनैव तवाप्यहमेवंविधं रुदनं शिक्षयामीत्युक्त्वा तेन रोहिण्यंकक्रीडनपरो लोकपालाभिधो बालो निजहस्ते गृहीतः, कंदुकवच्च गवाक्षादुल्लालितः. अथ तं बालं पतंतं विज्ञाय मार्गे गच्छंतः सकला अपि जना हाहारवं कुर्वंतो दुःखभाजोऽभवन्. परं कदाप्यनाकर्णितदुःखशब्दा रोहिणी तु निजं पुत्रं क्रीडनार्थं केनापि गृहीतं मन्यमानातीवानंदितहृदया हास्यविनोदं कर्तुं लग्ना.

इतो रोहिणीपूर्वाचीर्णपुण्यसंभारप्रेरिता पुराधिष्ठायिका देवी तं पतंतं नृपनंदनमाकाशस्थमेव गृहीत्वा सिंहासने च समारोप्य कमलादिकोमलकुसुमैरभ्यर्चयत. विस्मयमापन्ना नागरनिकरा अपि जिनधर्मप्रशंसनपरास्तं लोकपालाभिधं नृपनंदनं लोकपालमिव पूजयामासुः. अशोकचंद्रावनीपालोऽपि हृदि विस्मितो विविधविचारजंबालजालपतित इव मौनमेवालंब्य संस्थितः. इतो नगरनिकटस्थाम्रोद्याने वासवपूज्यश्रीवासुपूज्यतीर्थंकरदीक्षितौ ज्ञानावलोकितजगज्जनादिमानोऽभिप्रायौ रू-

प्यकुंभमणिकुंभाभिधौ वाचंयमवरौ निजचरणारविंदन्यासैर्भूमिभागं पवित्रयंतौ समवसृतौ. आकर्णिततदागमनवृत्तांता निखिला अपि नागरा आनंदोद्भवपुलकांकितांगा निजनिजसमृद्ध्यनुसारेण वस्त्रालंकारालंकृता विविधवाहनोपविष्टा मुनिसन्निधौ संप्राप्ताः. अशोकचंद्रावनीपालोऽपि पदातिहयगजस्यंदनस्तोमपरिवृतो रोहिण्यादिनिजपरिवारयुतो वाचंयमवरयुग्मपवित्रिते आम्रोद्याने तद्वंदनार्थं प्रययौ. तत्र पंचाभिगमनपूर्वकं मुनिवंदनं विधाय यथास्थानमुपविष्टोऽसौ परिवारयुतो धर्मदेशनां शुश्राव. देशनांते भूमीपालो विनयावनतकायः शिरोबद्धांजलिपुटो मुनियुग्मं नत्वा पूर्ववर्णितरोहिणीहर्षस्य कारणं पप्रच्छ. तदा निजनिर्मलावलोकेन करामलकवदवलोकितरोहिणीपूर्वभववृत्तांतस्तयोरेको मुनिरवदत, भो भूमिपाल! पुरात्रैव पुरे वस्तुपालाभिधोऽवनीपालो बभूव. तस्य वसुमतीनाम्नी पट्टराज्ञ्यभवत्. तत्र पुर्यामपरो धनद इव स्वकीयामितद्रविणदानपरिपूरितार्थिजनवांछितार्थो धनमित्राभिधानः श्रेष्ठी बभूव. तस्य प्राणेभ्योऽप्यतिवल्लभा साक्षाद्धनस्य देवी लक्ष्मीरिव धनदेव्यभिधा प्रियासीत्. रतिमन्मथयोरिव विविधविषयसुखान्यनुभवतोस्तयोः कालक्रमेणैका सुता समजनि. परं पूर्वकृतामितपापोदयसंचयालिंगितेव सा जन्मत एवानिष्टदुर्गंधपराभूतांगी बभूव. अथ यथा यथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा वयसा ववृधे, तथा तथा तदीर्ष्ययेव तद्देहाविर्भूतोऽसह्यदुर्गंधोऽपि वृद्धिं प्राप. दुस्सहदुर्गंधोपेतां
तां तारुण्यारण्यगतामपि विषव्याप्तां विषधरीमिव मत्वा सर्वः कोऽपि दूरतस्तत्याज. तत्पित्रा तत्पाणि-
ग्रहणार्थं बहवोऽपि युवनराः प्रार्थिताः परं तां विषव्याकुलां विषवल्लीमिव मत्वा सर्वेऽपि पराङ्मुखा
जाताः. इतोऽन्यदा तत्रैव वसुमित्राख्यश्रेष्ठिनो वसुकांताभिधप्रियाकुक्षिसमुत्पन्नः श्रीषेणाभिधः सुतो-
ऽभवत. क्रमेण कालानलकवलीभूतजननीजनकोऽसौ श्रीषेणस्तारुण्यारण्यगो मन्मथव्याधशरनिक-
रपराभूतो जनकार्जितं सकलमपि द्रविणं वेश्यादिदुर्व्यसनेषु व्ययीकृत्य निरर्गलं चौर्यकारं चकार.
अथान्यदा परद्रविणापहारपरायणोऽसौ राजपुरुषैर्दृढं निबध्यावनीपालाय समर्पितः. कोपाटोपोत्कटा-
ननोऽवनीपालोऽपि भृकुटिभंगभीषणस्तस्य वधार्थमादिदेश. इतो विदिततदुदंतो धनमित्रश्रेष्ठी वि
नयेन राजानं विज्ञप्य भूरिद्रव्यार्पणेन तं श्रीषेणममोचयत्. ततोऽसौ तं श्रीषेणं निजनिकेतने स-
मानीय महोत्सवेन तां निजां दुर्गंधां कन्यां पर्यणाययत. तदनंतरमगुरुचंदनादिवरसुगंधद्रव्योरुधूप-
धूपिते, कुंदमुचकुंदादिकुसुमस्तोममघमघायिते, कमलकोमलवरतूलतल्पालंकृतपल्यंके शयनावासेऽ-
सौ तौ दंपती मुमोच. अमंदानंदकल्लोलोल्लसितहृदयोऽयं श्रीषेणोऽपि मारविकारप्रेरितो यावदलंका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राकरालंकृतांगां पल्यंकगां तामालिंगितुमुद्यतोऽनवत्तावत्तदंगप्रादुर्भूतदुर्गंधानलज्वलज्ज्वालाजालव्या-
कुल इव दूरमपससार. निजांशुकांचलाच्छादितनाशिकोऽसौ विषव्याकुलायाः सर्पिण्या इव तस्या अ-
तीवभीतो वानर इव गवाक्षत एव सहसोत्प्लुत्यारण्ये जगाम.

अथ तं निजनाथं गतं विज्ञाय सा दुर्गंधा स्वल्पजलपल्वलगता मिनीव कमलातिकोमलतु-
लतल्पेऽपि तिलतिलायमाना, कथमपि सुखलेशमप्यलभमाना, अतिदीर्घोष्णनिःश्वासशुष्काधरपुटा,
मुहुर्मुहुर्निजदौर्भाग्यमुपालंभयंती, नयननिर्गलदश्रुधारपरिप्लावितोत्तरीया, धाराधरधाराहतकमलिनीव
म्लानमुखी, श्लथीभूतस्तनस्तबककुंतला तारस्वरेण व्यलपत्. अथ ज्ञाततद्वृत्तांतो धनमित्रश्रेष्ठी विल-
पंतीं तां निजतनयां कथमप्याश्वास्यावदत्, भो पुत्रि! अस्मिन् संसारे सर्वेऽपि संसारिणः कृतकर्मा-
नुसारेण सुखदुःखान्यनुभवंति. अथ त्वं वृथा खेदं मा कुरु? भोगांतरायकर्मोग्ररोगागदोपमं सदैव
सुपात्रदानवितरणपरायणा मदीयनिकेतने सुखं तिष्ठ? येनागामिनि जन्मनि त्वं स्वर्गादिसौख्यपरं-
परां प्राप्स्यसि. एवं निजजनकाश्वासिता सा दुर्गंधापि स्वांगदुर्गंधनिबंधनं पूर्वाचरितभोगांतरायकर्मैव
मनसि निश्चित्य नित्यं जिनेश्वरप्रतिमार्चनपरायणा, सुपात्रजैनमुनिभ्यः प्रासुकैषणीयाहारादि प्रय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्वंती, नानाविधतपोऽनलतापास्थिचर्ममात्रावशिष्टशरीरा, तत्तपोऽनलमहिम्नापातिव्याकुलानंगेनाप्यप-
राभूता निजसमयं गमयतिस्म. अथान्यदा चंपकाशोकजंबूजंबीरनारंगाम्रकदल्याद्यनेकतरुनिकरनि-
वारितचंद्रकरकरनिपाते पुरोपांतावनितलालंकारभूते जनमनोनंदने नंदनाख्योपवने चतुर्विधज्ञानो-
पेतो भव्यचित्तचकोरामंदानंदप्रदो मुनिचंद्राभिधो वाचंयमेंद्रः समाययौ. मुनिवरचरणारविंदन्यासप-
वित्रितां नंदनोद्यानभूमिकां विज्ञाय हृदमातातिमुत्प्रवाहप्रेरित इवोद्यानपालकोऽपि कुसुमफलोत्कर-
भृत्करसंपुटो द्रुतमेवात्रावनीपालसन्निधौ संप्राप्तः. तत्र धात्रीपतिपार्श्वे फलपुष्पादि विमुच्य ललाटप-
ट्टबद्धांजलिपुटोऽसौ नंदनवने मुनिचंद्रमुनिवरागमनं न्यवेदयत. आकर्ण्यैतद्वरवृत्तांतोऽवनीपालोऽ-
प्युद्यानपालाय प्रमोदसंचयरोमांचितांगो भूरितुष्टिदानं प्रदाय चतुरंगसैन्यसमृद्धिसंयुतो वरवस्त्राभूष-
णभूषितांग उद्याने मुनिपार्श्वे ययौ. धनमित्रोऽपि स्वकीयसुतया दुर्गंधया समेतो निखिलनागरनि-
करैः सह मुनिवंदनाय नंदनारामे समेतः. मुनीशोऽपि भविकरोलंबमालामंदानंदप्रदां मधुरमकरंद-
रससन्निभां धर्मदेशनां ददौ. देशनांते धनमित्रश्रेष्ठी विनयावनतकायो मुनिचंद्रं मुनिपतिं नत्वापृ-
च्छत, हे भगवन्! ममानया तनयया पूर्वभवे किमेवं दुर्निवारं दुष्कर्माचीर्णं यदुदयादियमत्र जन्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्याजन्मत एव विषवल्लीव सकलजननिकरविद्वेष्या दुर्गंधदेहाभूत्? एतत् श्रेष्ठिवचनमाकर्ण्यारण्यगताम्रतरुरिव परोपकारकरणप्रवणो मुनिचंडोऽपि मुनिवरः सरसमधुररसालफलरससन्निभां वाचमुवाच, हे श्रेष्ठिन्! शृणु—

सौराष्ट्रमंडलमंडनरैवताचलसन्निधौ निर्धौतपापपंकपौरपरिवारपरिमंडितं वैरिवारदुर्गमं जीर्णदुर्गाभिधं नगरमासीत्. तत्र निजप्रचंडदोर्दंडमंडलवशीकृतानेकमंडलेश आखंडल इवाखंडप्रतापो धात्रीपत्यभिधानो भूमिपालोऽभवत्. तस्य सिंधुरिवाधोगमनस्वभावा, कौटिल्यसलिलाशया, कुलद्वयभ्रंशनशीला, निजजनकमहीधरादमृतगणं लब्ध्वा तु विमुक्तमर्यादा सिंधुमत्यभिधाना राज्ञी बभूव. अथान्यदा तौ दंपती विपिनश्रीदर्शनाय रैवताद्रिं गतौ. तत्र क्रीडनोत्सुकया महीमहेलया तारकोरुकंदुकजिहीर्षया प्रलंबिता निजकरा इव रैवताचलोत्तुंगशिखराणि रेजुः. तत्रारूढा जंबूजंबीरनारंगाम्रकदल्याद्यनेकपादपाः सज्जना इव कोकिलादिकलरवैः सकलपांथातिथीनाहूय स्वकीयघनघटोरुछायाप्रदानेन तत्पथश्रममपास्य सुरभिवरकुसुमोत्करवितरणेन सत्कृत्य चामृतस्वादूनि सरसोरुपक्वफलानि तेभ्यो ददुः. अनेकनिर्झरझरदमलसलिलपानापास्तपथश्रमपांथोत्करवितीर्णाशीर्वादस्तबका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इव स्थाने स्थाने निकुंजेषु निजवर्णवर्णसौगंध्यसौंदर्याकृष्टानेकजननयनहृदयाः पाटलादिपुष्पपुंजा-स्तत्र रेजुः. अरण्योद्भवतृणगणप्राशनपरिपुष्टांगा निर्मलनिर्झरजलपानसंतुष्टहृदया मुग्धहरिणगणा निजनिर्दोषपोतादिपरिवारपरिवृता इतस्तत उत्प्लवंतस्तत्र केषां हृदयेष्वानंदं नोत्पादयामासुः? परितो विकीर्णरम्यगैरिकोत्कराऽरुणरागरंजिता गिरितलभूमिर्धृतकौसुंभवसना, साक्षाद्देवताऽङ्गनेव श्रीरिव, न वोद्भिन्नदर्भसंदर्भमिषेण रोमांचकंचुकितांगा, कुंदमुचकुंदादिकुसुमोत्करैः प्रकटं हास्यं प्रकटयंती, प-रितो वायुविकीर्णविविधपुष्परजःपुंजमिषेण कटाक्षप्रक्षेपं वितन्वंती, झरन्निर्झरसलिलावर्त्तदंभेन नि-जनाभिमंडलं प्रकटयंती, पक्काम्रादिफलावलिपदेन स्वकीयस्तनस्तबकानाविष्कुर्वंती, तुंगगिरिशृंगनि-पतद्घनपाषाणोद्भवभीषणध्वनिमिषेण विरहातुरानेकपथिकहृदयस्फोटं चकार. अथ निजप्रियायुतो-ऽवनीपालो रैवताचलवरशिखरेषु भ्रमन् क्रीडाविनोदं कुर्वन्नेकोत्तुंगगिरिशृंगादवतरंतं, निजतपस्तेज-सा सहस्रकरकरनिपातमपि तिरस्कुर्वंतं, मलाविलैकवसनमध्यामैकध्यानाधिरूढहृदयं, चर्मास्थिमात्रा-वशेषशरीरं, अंगशुश्रूषणपराङ्मुखत्वेन मलक्लिन्नाशेषगात्रं, कषायादिश्वापदसंचयैरनपद्रुतं, प्रशांत-मूर्तिं मासोपवासिनं मुनिमेकं ददर्श. तं दृष्ट्वा प्रमुदितांतःकरणो नरेंद्रोऽचिंतयदहो धन्योऽयं मुनि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मम सद्भाग्यपरंपराप्रेरित एवाद्य नयनगोचरीभूतः. ध्वजादिरम्यलक्षणलक्षितैतत्पादारविंदप्रवहणं नूनं तदाश्रितानां देहिनामपारसंसारपारावारतारणाय समर्थं भविष्यति. इति विचिंत्यावनीपालः प्रमोदभरपुलकितांगो विनयेन तं मुनिं नमस्कृत्य मासोपवासवरपारणार्थं निमंत्र्य स्वसार्धं निजगृहं समानयत्. अथ सा दुष्टा सिंधुमतीराज्ञी मलक्लिन्नांगवस्त्रोपेतं तं मुनिं विलोक्याचिंतयदरे यथायं पाखंडिमुनिर्बहिर्मलिनोऽस्ति, तथास्य हृदयमपि मलिनमेव संभाव्यते. अतोऽहमस्य पाखंडिन एवंविधमाहारं यच्छामि यथासौ पुनर्मम गृहं नैवागच्छेत्. इति विचिंत्यात्यंतकुटिलाशयया तया दुष्टया मासोपवासिनेऽपि तस्मै मुनिवराय विषोपमं कटुतुंबीफलशाकं प्रतिलाभितं. अनीहो वाचंयमोऽपि तमाहारमादाय स्वस्थानमीर्यासमितिसमेतः समेत्य तेन विषोपमकटुतुंबीफलाहारेणाप्यपरिम्लानहृदयो निजोदरविवरमपूरयत. तदनंतरं परिणततद्विषरसव्याकुले तद्देहे दुस्सहा वेदना प्रादुर्भूता. परं क्षमोपशांतांतःकरणोऽसौ मुनिवरो स्वकृतवेदनीयकर्मोदयं हृदि संभाव्य कोपलेशमप्यकुर्वन् सर्वजीवयोनिं क्षामयित्वा मिथ्यादुष्कृतं ददान आराधनापूर्वकमर्हदादिचतुःशरणमादृत्य निजायुःशेषं पूर्णीकृत्य समाधिना विबुधालयसंगमभागभवत.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतो महातपस्विवाचंयमेंद्राकालमरणतोऽतीवखिन्नहृदयैर्भविकनागरनिकरैः क्रियमाणं तदूर्ध्वदेहिकं विलोक्य स्फटिकवत्स्वच्छाशयोऽवनीशः संजातसंभ्रमो जातशंको निजसेवकान् पप्रच्छ. भयभीतचित्तैस्तैरुक्तं हे स्वामिन्! मासोपवासी भवांबुनिधितरणतारणसमर्थो महातपस्वी यो मुनिवरो भवद्भिः पारणार्थं निमंत्र्यात्रानीतः, स युष्मत्प्रियया सिंधुमत्या केनापि हेतुना समुद्भूतेर्ष्ययैव विषप्रायकटुतुंबीफलशाकाहारेण प्रतिलाभितः, तदशनाशनेनातीवपीडितोऽपि वाचंयमेंद्रो मनसि मनागपि कोपसंभावनामकुर्वन्नाराधनापर एकोऽपि पंचत्वमधिगत्यामरालयं जगाम. तेन चातीवखिन्नहृदया इमे नागरास्तच्छरीराग्निसंस्कारं कुर्वंति. स्वसेवकोक्तमेनं वृत्तांतं निशम्य संजातातीवहृदयसंतापः पंचानन इवात्यंतकोपाटोपोत्कटाननोऽनेकविडंबनपूर्वकं वातग्रथिलीभूतां शृगालीमिव तां दुष्टां सिंधुमतीं राज्ञीं स्वदेशान्निष्कासयामास. अथैवं भूपेन निष्कासिता सा सिंधुमती स्थाने स्थाने मुनिघातिनीयं महापापिष्टेति जननिकरैरतीवनिंद्यमाना, निजापवाददुःखेनात्यंतं मनसि खिद्यमाना, स्वकीयायुःशेषं पूर्णीकृत्यातीवदुःखपरंपराभिव्याप्तां नरकावनिं जगाम. तत्राधमपरमाधार्मिकविहितामितवेदनामनुभूय, कालक्रमेण च ततो निःसृत्य समीरप्रवाहप्रेरितास्वामिकयानपात्रमिव भवांबुधौ चिरं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःशरणं भ्रांत्वा किंचित्कर्मलाघवात्सा तत्र धेनुर्जाता. तत्र कथमपि कस्यचिदाननान्नमस्कारमहामंत्रमाकर्ण्य तमेवाहर्निशं निजभाषया रटंत्यकामनिर्जरोरुघनेन पूर्वोपार्जितपापस्तोमशैलमभंजयत्. ततो मृत्वा पूर्वाचीर्णतद्दुष्कर्मविशेषयोगेनेयं तव सुता स्वदेहदौर्गंध्यव्याकुलीकृताखिललोका दुर्गंधाभिधाना जातास्ति. एवं मुनिवरोक्तं निजसुतोदंतमाकर्ण्य विस्मितमानसो धनमित्रो विलापपरां निजतनयामाश्वास्य विनयेन वाचंयमेंद्रं नमस्कृत्यापृच्छत, हे भगवन्! युष्मादृशा महामुनयोऽस्मिन् जगति खलु निःकारणमेव परोपकृतिकर्मतत्परा भवंति. अतोऽस्याः परिदेवनपराया वराकाया मम तनयाया अवशिष्टमपि दुष्कर्म यथा नष्टं भवेत्तथा कमप्युपायं कृपां विधाय यूयं प्रकटीकुरुध्वं? तन्निशम्य कृपार्द्रकोमलचेता मुनींद्रो जगाद भो कल्याणि! त्वमत्र विषादं मा कुरु? त्वया शुक्लपक्षे रोहिणीदिने श्रीवासुपूज्यजिनेश्वरप्रतिमार्चनपूर्वकं निर्जलं चतुर्थभक्ततपो विधेयं. एवं सप्तमासाधिकधात्रीधरोन्मितवत्सराणि यावत्तत्तपो विधायाभिवर्धितभावेन तदुद्यापनं कर्तव्यं. ततो द्रव्यानुसारेण जिनपूजनपूर्वकं चित्तौदार्येण चतुर्विधसंघभक्तिसाधर्मिकवात्सल्यादि विधेयं. एवं हे भद्रे! शिवानुपमप्रासादारोहणसोपानपरिपाटिनिभरोहिणीतपोविधानेन त्वमपि सुगंधधरेंद्रवन्निःसंदेहं सुरभिशरीरा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भविष्यसि. एतन्मुनिवरोक्तमाकर्ण्य सा दुर्गंधापि परमप्रमोदोत्फुल्लहृदया नयनयुगलविनिर्गलत्संम· दाश्रुधोरणीदंभेन मनोगतामितखेदपरंपरां बहिरुत्सारयंती विनयेन नियोजितकरद्वयोवाच, हे भग· वन्! कोऽसौ सुगंधधरेंद्रः? कथं च तेन सुखसंततिः संप्राप्ता? तस्य निखिलमप्युदंतामृतं प्रकटयि· त्वा संसारतापपरितप्तांगीं मामुपशांतां कुरुध्वं? करुणार्णवतुल्यो मुनींद्रोऽपि तस्या उपकारार्थं ज· गाद, भो कल्याणि! दुष्कलादिभयंकरश्वापदस्तोमापनोदाय सिंहतुल्ये सिंहपुराख्ये रमणीये पुरे दुर्जयारिनिकरकरटिविकटघटोच्चाटनपटुसिंहसन्निभः सिंहसेनाभिधो भूधवो विविधकलाकलापकलितो निष्कंटकं राज्यं करोतिस्म. तस्य स्वदेहातिवर्णनीयवर्णप्रभातिरस्कृतातिरमणीयामररमणीगणा शी· लालंकारालंकृतांगा स्वर्णप्रभाभिधा राज्यभूत्. विविधपंचेंद्रियजनितामितसुखमग्नयोस्तयोरनुक्रमेणैकः सुतः समजनि. परं पूर्वाचरितदुष्कर्मयोगेनाजन्मतोऽपि तस्यांगे सकललोकसमूहातिगर्हणीयोऽतीव· दुर्गंधः प्रादुर्बभूव. अथ तद्वय·सहाभिवर्धितातीवदेहदौर्गंध्यदूरीभूता निखिलापि तरुणतरुणीधोरणी तारतारुण्यगतमपि तं कथमपि नेच्छतिस्म. निजप्रियतमतरुणतनयस्यापि तथाविधामसह्यावस्थां हृदि विभाव्य पित्रोर्महामनोरथतरुः स्वांतोत्पन्नाचिंत्यचिंतानलज्वालावलिजालेन समूलमेव ददाह. इतो·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽनेकभविकलोकमरालावलिप्रमोदोत्पादनवरपद्मनिभो मोक्षपद्मालयैकनिवासरूपपदपद्मः श्रीपद्मप्रभाभिधो जिनेंद्रो निजचरणारविंदन्यासैर्निखिलमपीलामंडलं पावनीकुर्वन् सिंहपुरान्यर्णे पुष्पावतंसारण्ये समवसृतः. जगत्त्रयजनजनितवंदनं तं जिनेंद्रं वनपालमुखात्तत्र समवसृतं विज्ञाय सिंहसेनोऽवनीशः प्रमोदसंचयरोमांचितांगो निजतनुजामितपौरपरिवारपरिवृतस्तद्वंदनार्थं सकलर्द्धिसमृद्ध्या उपवने ययौ. तत्र तं जिनेंद्रं त्रिप्रदक्षिणापूर्वकमभिवंद्य स व्युत्पन्नकविजनहृद्यपद्यैरस्तवत. स्तवनानंतरं स यथास्थानमुपविष्टश्चातक इवातीवहृष्टो जिनेंद्राननसमुद्भवामुपदेशाम्बुधारावरघोरणीमाकंठं निपीय भवनिदाघोद्भवामितसंतापपरंपरां विलयं निनाय. ततोऽधिगतावसरोऽवनींद्रो जगत्त्रयेंद्रं जिनेंद्रं प्रणम्य विनयावनतकायोऽपृच्छत, हे भगवन्! ममैतस्य तनयस्यासह्यदेहदुर्गंधकारणं निवेदयित्वा शल्यवन्मदीयांतःकरणविदारिणीं मम शंकां यूयं दूरीकुरुध्वं? एवंविधानि तद्वचांसि श्रुत्वा करुणार्णवो जिनेंद्रोऽपि घनस्तनितगम्भीरध्वनिना तत्पूर्वभवचरित्रं जगौ—

गगनांगणचुंबिनि नीलाचलोत्तुंगशृंगे कश्चिदेको महामुनिर्लब्धस्वकीयानुपमज्ञानौषधीगणनिरस्तपूर्वानुचितानेकसांसारिकविडंबनपारदोत्करो निजस्वांतोरुकुंडप्रकटितनानाविधतपोऽनलज्वाला-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वलिजालेन प्रज्ज्वालितानेककर्मेंधनो दुर्लभशांतरसमिश्रितां स्वमस्तकोरुसंपुटस्थितामविनश्वरशर्मानंदप्रदां कल्याणपरंपरां साधयन्नासीत्. निसर्गतो हिंसैकदुष्कार्यकरणपरायणा तद्गिरिगह्वरकृतनिवासा व्याघ्रसिंहादिपशवोऽपि परमशांतरसैकमूर्तिसन्निभतन्मुनिनयनयुगलपीयूषकुंभप्रभावामृतधाराधरधोरणयभिषिक्ताः स्वकीयं नैसर्गिकमपि हिंस्रस्वभावं परित्यज्य मूर्तिमंतः शांतरसा इव विलोक्यंते. तन्महामुन्यनुपमतपःप्रभावपराभूतो न च कोऽपि व्याघ्रस्तेषां परातवं विघातुमलंभूष्णुरभूत्.

इतश्च संधितातिनिशितशरशरासनकरः क्रूराध्यवसायाधिवासितांतःकरणः कश्चिल्लुब्धको निर्भयं निःशंकं विचरतां, तन्मुनिप्रभावेण च प्रशांतचेतसां तेषां गिरिशृंगविपीनवासिनां श्वापदानां वधार्थं समागतः. परं तन्मुनिमाहात्म्येन निष्फलीभूताखिलप्रयत्नोऽसौ क्रोधांधलीभूतः कायोत्सर्गस्थितं तं वाचंयमेंद्रं जीवंतमेव तृणकाष्टानलज्वालाजालैर्जज्वाल. मुनींद्रोऽपि मनागपि मनसि क्लेशलेशमप्यननुभवंस्तस्य कोपतप्तस्यापि व्याघस्योपरि कृपामृतरससंचयमेव सिंचन् क्षपकश्रेणिमारूढः शुक्लध्यानपरायणोंतकृत्केवलित्वेनाविनश्वरमुक्तिमहिलालयं जगाम. मुनिविघातको लुब्धकश्च निखिललोकवृंदैरतीवनिंद्यमानो बुभुक्षाक्षामकुक्षिः क्वचिदप्यलब्धनिवासावकाश आयुःशेषे व्यतीतेऽ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यंतापद्दुःखव्याकुलां सप्तमीं नरकावनिं जगाम. ततो निःसृत्य चिरकालं संसारे हिंस्रश्वापदादिदुर्योनिषु भ्रांत्वा कथमपि मनुष्यजन्म लब्ध्वा गोपालत्वं लब्धवान्. तत्रान्यदासौ कस्यचिद्वणिजोंते चिंतामणिमिव नमस्कारमहामंत्रं लब्ध्वा तदेवारटन्, गवां चारणार्थं पशुरिव चारण्ये भ्रमन् दैवयोगात्तत्रैव गिरिशृंगे समारूढो दवानलदग्धः पंचत्वमाप. ततोऽसौ पूर्वविहितमुनिघातजातदुष्कर्मावशेषपरंपरापराभूतस्तवायं दुर्गंधस्तनूजो जातोऽस्ति. एवं पूर्वं निजांगजार्जितस्य दुष्कर्मण उग्रं विपाकं श्रुत्वा संजाताऽमितस्वांतोद्वेगो भूमीशो जिनेशं प्रणम्य तत्कर्मापगमोपायं पप्रच्छ. जिनेंद्रोऽप्युवाच भो भूमिपाल! अनेकविधदुष्कर्मगिरिशृंगभंगाभंगुरवज्रनिभं, कषायोन्मत्तवारणनिवारणवारणारितुल्यं रोहिण्याख्यं तपोऽस्ति. तत्तपःसमाराधनप्रभावेण तवास्य तनयस्य दौर्गंध्यं मणिमंत्रप्रभावेणोरगोग्रविषमिवाविलंबं विनाशं यास्यति. अथ स दुर्गंधकुमारोऽपि श्रीपद्मप्रभप्रभुमुखान्निजदुर्गंधापगमोपायं निशम्य सहसाधिगतनिधानो रंक इव प्रमोदपूरपूरितांतःकरणो जिनेश्वरं नत्वा निजजनकजननीसमेतः स्वालयं समेत्यात्यंतभावपुरस्सरं रोहिणीतपः समाराधयामास. क्रमेण तत्तपोऽतिशायितामितप्रभावतस्तच्छरीराधिष्ठितं दौर्गंध्यं मयूरध्वनिश्रवणाधिगतसाध्वसं भुजंगमवृंदमिव दूरतो नष्टं. ततस्त्रिकर-

For Private And Personal Use Only

णशुद्ध्या तेन कुमारेण तद्व्रतोद्यापनं कृतं, तत्प्रभावेण च प्रत्युतास्य शरीरं कमलकोमलं प्रवरसुगंधोपेतं संजातं. ततोऽसौ परिणीतानेकमनोहरराजकुमारीगणो विविधसुखान्यनुभवन् जिनधर्माराधनपरो जनकेन निजराज्ये स्थापितः सुगंधनृपाल इति जगति प्रसिद्धोऽभवत्. क्रमेणायुः पूर्णीकृत्याधिगतनाकनिर्जरत्वस्ततश्च्युतः प्राग्विदेहे पुष्कलावतीविजये पुंडरीकिण्यां नगर्यां स विमलकीर्त्याख्यनृपस्य पद्मश्रीनाम्न्या महीष्याः कुक्षितोऽर्ककीर्त्यभिधानस्तनयोऽभवत्. क्रमागतं निजं राज्यं भुक्त्वा मुनिपार्श्वेऽपवर्गप्रदं संयमं स जग्राह. तत्र प्रतिकूलानुकूलानेकपरीषहारिवर्गं क्षमाखड्गेन निपात्य नानाविधतपोविधानपरायणः प्रांते कृतसंलेखनो मृत्वासावच्युतनाविषे जगाम. तत्र वचोऽतिगं दिव्यसुखं भुक्त्वायुःक्षये च च्युत्वा स गजपुरे नगरे वीतशोकनरेंद्रस्य त्वमेवाशोकचंद्राभिधस्तनयोऽजनि. सा दुर्गंधापि मुनिवचनविहितश्रद्धा गृहं समेत्य रोहिणीतपो विधाय शुभमनोभावेन तद्व्रतोद्यापनं चकार. तत्तपःप्रभावतश्च सापि निजदेहदौर्गंध्यमपाकृत्य सुरभिशरीरा बभूव. ततः सा शुभध्यानेन पंचत्वमाप्य सुरालयमलंचकार. ततश्च्युत्वा सा चंपापुर्यां श्रीवासुपूज्यजिनेंद्रतनूजमघवाभिधनृधवस्य लक्ष्म्यभिधानमहिषीकुक्षितः प्रादुर्भूता रोहिण्यभिधानेयं तव राज्ञी बभूव. एवं हे रा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जन्! द्वाभ्यामपि युवाभ्यां पूर्वभवे भावपुरस्सरं तद्रोहिणीव्रतमाराधितमस्ति, तत्प्रभावेण चात्र युवां द्वावपि परस्परं प्रेमपरायणौ सुखसागरविलासमनुभवथः. रोहिण्या चानया ततो विशेषेणानुमोदितं, तेन हेतुना सेयं स्वप्नेऽप्यत्र दुःखनामापि नानुभवति. अथैवं वाचंयमेशोक्तं निजपूर्वभववृत्तांतमाकर्ण्य हर्षातिशयेन घनाघनघनधाराहतकदंबकुसुमयुगलमिवातीवरोमांचितांगौ जातौ. अथ विगतशोकोऽशोकनरेंद्रः पुनरपि मुनींद्रं प्रणम्योवाच हे भगवन्! ममानया रोहिणीप्रियया पूर्वभवे ननु किमेवंविधः पुण्यपुण्यसंभारः समर्जितः? येनास्याः सकलकलाकलापकुशला रूपातिरेकनिराकृतामरकुमारा अष्टौ तनयाः संजाताः? मुनीशोऽप्यवनीशवचांस्याकर्ण्य परोपकृतिकृत्यविन्निजवचनरचनवचनातिगगर्जनध्वानैर्निखिलामप्यारामभूमिं संध्वानयन्, माधुर्यरमातिशायिवचोभंगाकृष्टारण्यगहरिणगणानपि स्तंभयन् बभाषे. उत्तुंगवरतोरणमनोहरवीतरागानेकागारनिकरराजिविराजितायां मथुरायां नगर्यां निर्धनाग्रण्यग्निशर्माख्यो द्विजो वसतिस्म, तस्य सावित्रीनाम्नी केवलं शीलैकालंकारालंकृतांगी गेहिनी बभूव. दारिद्र्याधिष्ठितं तद् गेहं परितः पतितप्रायं, जीर्णारण्यतृणगणैराच्छादितं, वर्तुलानेकबिलकृतामितमूषकस्तोमनिवासं, तंतुवायनिकेतनमिवानेकलूतातंतुजालावलिकृतवितानं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पतितशटितप्रायभित्त्युद्भूतानेकविवरेषु चटककरटाद्यनेकनीडजकृतनीडनिवासं, चतुःकोणाद्यनेकस्थानेषूत्करीभूतकचवरपुंजं, जालाद्यभावेन सहस्रकरकरनिपाताभिभवपलायितांधकारेणेव कृतनिवासं, त्रुटितस्फुटितप्रायस्थालिमृद्भाजनैकदेशसमूहमरण्यानीतगोमयखंडगणपुंजराजिविराजितांगणमासीत्.

कमलाग्रजाप्रेरितः सोमिशर्माद्विजोऽप्याप्रभातन्मध्याह्नं यावन्नगर्यामटन्ननेककृपणजनगणासह्यदुर्वाग्विलासान् सहमानः, कथंचिदधिगतानेकविधस्वल्पानितुच्छधान्यकणान् संग्रहीकृत्याभितः प्रतच्चंण्डकरकरनिपाताभिभूतो निजगृहमायाति. संतोषाद्यनेकगुणगणालंकृता तत्प्रिया सावित्री दारिद्र्यपिशाचाधिष्ठितमपि तं समागतं भर्तारममरमिव मन्यमाना भिक्षाटनातिश्रांतस्य तस्य स्नानादिशुश्रूषां करोति. स्वभर्त्रा भिक्षानीतं कर्करजःपुंजमिश्रितं च तन्नानाविधधान्यसंचयं व्युत्पन्नकविवरपंक्तितोऽर्धविदग्धपंडितंमन्यगुंफितग्रंथप्रबंधमिव विशुद्धीकृत्य संस्कृत्य च सा स्वस्वामिनं भोजयति. तद्भोजनानंतरं चावशिष्टमन्नं सा संतोषपरा पतिव्रता भुनक्ति. एवं दारिद्र्यपिशाचाधिकाराधिष्ठितगृहव्यापारयोस्तयोर्दंपत्योः कथंचित्कियानपि कालोऽतिचक्राम. छिद्रेष्वनर्था बहुलीभवंतीति जनवाचं सत्यां कुर्वत इव तयोः क्रमेण साक्षाद् दारिद्र्यसंतानमूर्तय इव शिवशर्मादयोऽष्टौ तनयाः संजाताः. वस्त्रक्रयार्थं

For Private And Personal Use Only

द्रव्याद्यभावेनात्तदैगंबरसंयमैरिव तैस्तनयैर्व्याकुलं तन्निकेतनमाशांबरसाधुकुटिरनिभमाभाति. अथ तस्य निर्धनस्यापि द्विजस्य तेऽष्टावपि तनयाः केनचित्परोपकारिणर्षिणाध्यापिताः. ततस्ते कमलालया तिरस्कृता अपि तदीर्ष्ययेव तत्सपत्नीभूतया सरस्वत्या सत्कृता इव सकलकलाकलापकुशला वेदादिशास्त्रांभोधिपारगाः संजाताः. अथ तेऽष्टावपि भ्रातरो मातापित्रोर्मरणे संजाते निःशरणा भ्रमंतः कथमपि दुःपूरोदरविवरपूर्तिं कुर्वाणाः क्रमेण पाटलीपुराख्यनगरं प्रापुः. तत्र पुरपरिसरवरारामेऽनेककार्तस्वरालंकारालंकृतांगा वरचीवरनिकरविभूषितदेहा नानाविधस्यंदनहयादिवाहनारूढा अमरकुमारा इव क्रीडापरायणा नृपतिसचिवतनयास्तैर्दृष्टाः. एवं पद्मसद्मनिवासमयोरुराज्ञया सत्कृतान्, नानाविधविनोदपरंपरापरायणांस्तान् कुमारान् विलोक्य तेऽष्टावपि विद्वांसो द्विजतनया निजमनस्सु विचारयामासुः, अहो! नूनममीभिः पूर्वभवेष्वचिंत्यः पुण्यसंचयः संचितोऽस्ति. तत्पुण्यप्रभावप्रेरितया च लक्ष्मीमहेलयेहेमे नूनं कटाक्षिताः संति. अस्माभिस्तु पूर्वभवे न किंचित्पुण्यमर्जितं. तेनात्रापि वयं कमलाग्रजया निर्भरं समालिंगिताः स्मः. तदागामिनि भवे शर्माभिलाषुकैरस्माभिरत्रानेनासारेण देहेनापि शुद्धो धर्मः समाराधनीयः. इति विचिंत्यात्मदुःखगर्भितवैराग्यैस्तैर्ज्ञानक्रियोपेतैकजैनमु-

निपार्श्वे दीक्षा गृहीता. तत्र समधीतद्वादशांगागमा विविधतपोऽनुष्ठानविधानेन सकलमपि कश्मलमपाकृत्याधिगतासमसुवर्णशुद्धस्वभावाः प्रांते संलेखनां विधायायुःक्षये समाधिना तेऽष्टावपि पंचत्वमाप्य सुरालयसंगभाजोऽभवन्. तत्रानेकाप्सरःस्तोमैर्निषेव्यमाणा नानाविधाविंयसुखसंचयविलासं विलस्यायुःक्षये ततश्च्युत्वा ते सर्वेऽपीमे तवांगजा अभवन्. पूर्वाचरितनिरतिचारचारित्रप्रभावेण तेऽत्रापि नानाविधशर्मानुभवंतो निजसमयं गमयंति. एवंविधां चेतश्चमत्कारकारिणीं मुनिवाणीं निशम्यातीवहृष्टोऽशोकचंद्रभूपालः पुनरवादीत, हे भगवन्! अस्या रोहिण्या उदरोद्भवानामासां सुतानामपि पूर्वभवसंबंधं करुणां विधाय निवेदयध्वं? मुनिरपि निजज्ञानेन धर्मवृद्धिं विज्ञायोवाच, भो नरेंद्र! नित्यं विहरमाणार्हच्चरणारविंदपावनीभूते प्राग्विदेहे समूहीभूतनिशाकरकरनिकर इव. कुमुदप्रदकुमुदप्रकर इव, महीमहिलोदरविवरप्रकटीभूतानुपमरूप्यराशिरिव, विहरमाणतीर्थंकरातिनिर्मलपुंजीभूतयशोराशिरिवोतिशुभ्रतेजःपुंजराजिविराजितो वैताढ्याख्यो महीधरोऽस्ति. तत्र निजातिवेगविनिर्जितगरुडवेगो गरुडवेगाभिधानोऽनवद्यविद्याविशारदो विद्याधर आसीत. तस्य कमलविलोचना मनोहारिरूपविनिर्जितामरांगना च कमलाख्या महिष्यभवत्, तत्कुक्षिसंभवाश्चतस्रो दिक्कुमार्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यानुपमरूपविनिर्जितानंगप्रियाः पद्मश्रीप्रमुखाः कन्यका अभवन्. लावण्यविनयाद्यनेकगुणगणालंकृताश्चतस्रोऽपि कन्यका अन्यदा क्रीडाविनोदार्थं नानाविधकुसुमफलावलिझुलितानेकतरुनिकरविराजिते पुष्पाकराख्योपवने ययुः. कुंदादिसुरभिकुसुमवरमाल्यालंकृतकंठनालास्ताः कन्यकाः सममेव निःकरुणेन कुसुमास्त्रेण निजनिशितशरैस्ताडिता इव रेजिरे. अथ सागंध्याकृष्टानेकरोलंबकदंबककृतझंकारारवैराहूता इव ताः सर्वा अपि पुष्पावचयाद्यनेकविचित्रक्रीडाः कुर्वं यत्तत्रागतत्रिदशकुमार्य इव केषां यूनां मनांसि कुसुमास्त्रनिकरैर्न बिभेदुः? एवं क्रीडापरायणास्तास्तत्र भ्रमंत्योऽरुणनवपल्लवैकाशोकतरुतले साक्षान्मूर्तिमंतं शांतरसमिव नासाग्रन्यस्तनयनयुगलमाजानुप्रलंबितकरद्वयं, मोहोत्कटसुभटं निहंतुमिवैककरधृतधर्मध्वजोरुमुद्गरं, स्वकायेऽपि निर्ममत्वधरं. कायोत्सर्गोरुध्यानपरायणं मुनिमेकं ददृशुः. तं दृष्ट्वा लघुकर्मतया मनःशुभपरिणामेन ता विचारयामासुर्नूनमयमनगारः प्रवहणमिव स्वयमपि संसारार्णवं तरन्नन्यानपि तस्मात्तारयितुं समर्थः संभाव्यते. इति विचिंत्य ताः सर्वा अपि तच्चरणारविंदं वंदित्वा तस्य समीपे तस्थुः. मुनिरपि पारितकायोत्सर्गो धर्मलाभत्वष्ट्रग्रं संसारोरगोग्रविषविनाशाय मणिमंत्रानुपमौषधनिभं धर्मलाभं ताभ्यो ददौ. ततस्ताः सर्वा अपि यो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्या विज्ञाय सोऽपि भवार्णवोत्तरणतरंडनिभां धर्मदेशनां ताभ्योऽयच्छत. ताः सर्वा अपि मनसि धर्मो-
रुरहस्यं संभाव्य शंकारहितामुनिवरपार्श्वात्सौभाग्यपंचमीव्रतं जगृहुः. अथ ता मुनिं नत्वा शुभवासना-
वासितस्वांता गृहमुपेत्य तत्सौभाग्यपंचमीव्रतमुपवासैर्निरतिचारमाराधयामासुः. अथैकदा निजोत्तुंगप्रा-
सादगवाक्षस्थितास्ताश्चतस्रोऽपि कन्यका वर्षर्तुप्रारंभकाले लोकलीलां पश्यंतिस्म. इतस्तामसराक्षसः
स्वकीयारेश्चंद्रकिरणस्यावकाशदानपरायणं गगनमंडलं कज्जलश्यामलातिघनघनाघनावलिमंडलै-
राच्छाद्य कर्णस्फोटिस्फारनिबिडगर्जनपरो निशाणोत्तीर्णातितेजःपुंजविराजिसौदामिनीखड्गं वाहयन्
सकलांगिवर्गं भयभीतं चकार. मन्मथोत्कटसुभटातिपीडितविरहातुरागणितगृहिणीगणनयनाविर्भूता-
मिताश्रुश्रेणिप्रवाहप्रवर्धितवारिनिकर इव जलधरोऽपि मुशलधाराभिर्वर्षन् चिरं स्वविरहानलज्वाला-
वल्यभितप्तां निजां महीमहेलामसांत्वयत. अतिमनोहरवर्णनीयपंचवर्णालंकृतकलापालंकृतांगाः कला-
पिनोऽपि कलाकलापकलितोरुनर्तका इव घनाघनघनगर्जनमृदुमृदंगारवानुयायि नर्तनं कुर्वंतः केषां
हृदयेषु हर्षाह्लादं नोत्पादयामासुः? परितोऽभिपतन्मेघधाराभिहतहृदयविशीर्णा निजप्रियाः पंकजि-
नीर्विभाव्य विशुद्धोरुपक्षद्वयाः सन्मानसोरुगमाभिलाषिणो हंसनिकरास्त्वत्यंतं दूना इव देशांतर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रथाणं व्यधुः. इतो दुर्दैवयोगेन विलोकनीयलोकलीलालोकनैकचित्तानां तासां निर्दोषाणां चतुर्णामपि कन्यकानां मस्तकोपरि विकरालकालपलाशेन निशितविद्युदसिप्रहारो दत्तः. तेन ताश्चत्वारोऽपि पंचत्वमाप्य शुभाध्यवसायपरा अमरालयमलंचक्रुः. तत्र दिव्यसुखान्यनुभूयायुःक्षये च्युत्वेमास्तव वरेण्यपुण्यभाजो रोहिणीराज्याः कुक्षिसरस्यां हंस इव प्रजाताः. एवं मणिकुंभमुनींद्राननामृतकुंभनिःसृतां वचनामृतधारामाकंठं श्रवणांजलिभ्यां निपीय शंकापंकापगमेनातीवसंतुष्टहृदयोऽशोकचंद्रावनीपालो रोहिण्यादिनिजपरिवारपरिवृतो निजगृहं ययौ. मुनींद्रावपि निजावबोधसहस्रकिरणकिरणप्रकरैर्भव्यांबुजानि प्रबोधयंतावज्ञानतिमिरनिकरं च निराकुर्वंतौ. परदुर्वादिवादनिशाटनानामुत्कटसंतापमुत्पादयंतौ भुवि विहारं चक्रतुः. अथैकदा पौरागण्यानिवर्ण्यपुण्यपुण्यगणगुणाकृष्ट इवानेकवासवपूज्यः श्रीवासुपूज्यजिनेश्वरो निजचरणन्यासैर्महीमंडलं पवित्रं कुर्वन् परिवारपरिवृतो गजपुरपुरपरिसरागममलंचकार. प्रभुपादांभोजरजःपावनीभूताः सर्वेऽप्यारामतरवः पत्रप्रवालपुष्पफलादिभरैर्नम्रा प्रभुप्रणामोत्सुका इव संजाताः. विस्मयापन्नो वनपालोऽप्यवनीपालाग्रे गत्वा जिनागमनोदंतख्यापनेन तं वर्धापयामास. सदैवाशोकोऽशोकचंद्रावनीपालोऽपि तस्मै वनपालाय निजामंदा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंदख्यापनार्थमर्थसार्थं वितीर्य स्वकीयसकलर्द्धिसमेतो रोहिणीतनयादिपरिवारवारपरिवृतो जिनचरणांबुजपावनीकृतेऽशोकादिवरपादपगणाकीर्णे निजारामे ययौ. तत्र चतुर्निकायनिर्जरनिकरनिर्मितोरुसमवसरणांतर्गतसिंहासनस्थितं जिनेश्वरं त्रिप्रदक्षिणपूर्वकं नमस्कृत्यामंदानंदोल्लसितस्वांतो मेदिनीपालः परिवारयुतो यथास्थानमलंचकार. प्रभुरपि संसारामितनापपरिहारपरायणां, बोधिबीजांकुरोत्पादनसमर्थां, मिथ्यात्वरजःपुंजप्रशमनैकप्रवणां, अनेकभवोपार्जितामितकर्ममलप्रक्षालनदक्षां देशनामृतधाराधरधोरणीं ववर्ष. प्रशांताखिलमोहसंतापोऽवनीपो नीपोवोत्फुल्लहृदयो हृदयालवालसमुत्पन्नोरुवैराग्यांकुरो नंदनगणसमेतो निजप्रियारोहिणीयुतः शिवारोहणवरारोहिणीनिभां दीक्षां जग्राह. जिनचंद्रोऽपि परिवारयुतो भव्यकुमुदविबोधनकृतेऽन्यत्र विजहार. अथाशोकचंद्रराजर्षिरपि निरतिचारं संयमं प्रपाल्य रोहिण्यादिपरिवारयुतो निर्मलकेवलालोकेन सर्वथा मोहांधतमसं निरस्यानेकभव्यगणांश्च प्रबोध्य शिवावासमासादयामास.

एवमतिपवित्रं रोहिणीचरित्रं प्रदेश्यवनीशाग्रे प्रकाश्य केशिमुनीशोऽवदत्, भो नृपाल! एवं प्रथमाणुव्रतपालने मया निदर्शितं रोहिणीनिदर्शनं निजहृदयादर्शे त्वया निधेयं, यदाराधनतस्त्वम-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पि रोहिणीवदपवर्गारोहणसमर्थो भविष्यसि. वाचंयमेश्वरवचोऽमृतधाराभिधौतांतःकरणकश्मलः प्रदेशिनृपालोऽमलसुधाधोरणीनिभां वाचमुवाच, हे भगवन्! सर्वज्ञदर्शितनिदर्शनादर्शमंत्रांतं मम हृदयकमलं दृष्टांताधिष्ठितद्वितीयाणुव्रतदिनकरकरनिकराविष्करणेन विकाशयध्वं? मुनींद्रोऽपि निर्जितमोहकुंभींद्रकुंभस्थलाधिगतामलमौक्तिकावलिमिव निजश्वेतोरुदंतपंक्तिं दर्शयन्नाह, भो मेदिनीश! द्वितीयाणुव्रत पालयता सुश्राद्धेन स्थूलमृषावचनं कदापि न कथनीयं. मृषावादरजःपुंजमलिनीकृताननो वसुधाधीशोऽपि वसुनृपो जगज्जनैर्निंद्यमानो नानाविधबंधननरकावनिं जगाम. तत श्रुत्वा प्रदेश्यवनीशोंजलिं विधाय जगाद, हे भगवन्! कोऽसौ वसुनरेंद्रः? कथं च सोऽलीकवचोवादेन नरकावनिं ययौ? एतत्सर्वोदंतं निवेद्य भवदनवद्यवच पीयूषधारया ममापि द्वितीयाणुव्रतोरुपादपं नवपल्लवोल्लसितं कुरुध्वं? गणधरेंद्रोऽपि जगाद हे राजन्! धनधान्यादिविविधसंपत्पूरपरिपूरिते डाहलाख्ये देशे विक्रयार्थं व्यापारिवणिग्वरविपणोत्करीभूतामलशौक्तिकेयप्रकरप्रकटितमत्याभिधाना शुक्तिमत्याख्या नगरी वर्तते. तत्र सज्जनमनःकुमुदाकरामंदानंदप्रदानशीलोऽभिचंद्रनामा धरणीधवो बभूव. तस्याबाल्यादपि सत्यवादैकरसासक्ततया प्रमोदिताखिलपौरपरिवारः सन्नीतिरीतिरतो निजाति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शायिरूपविनिर्जितामरकुमारो मारविकारविरहितश्च वसुकुमाराख्यस्तनयोऽभूत. अथ तत्रैव पुर्यां वेदाद्यनवद्यविद्याऽपारपारावारपारगः करुणारसैकमारणिप्रवरप्रवाहार्द्रीभूतांतःकरणो विस्तीर्णातिशुभ्रयशोराशितिरस्कृतक्षीरकदंबकश्च क्षीरकदंबाख्य उपाध्यायवरो महाविद्वान् ब्राह्मणो निवसतिस्म. तस्यैकः कलाकलापकल्लोलिनीप्रादुर्भावैकपर्वतनिभः पर्वताख्योंऽगज आसीत्. अथ तस्योपाध्यायस्य पार्श्वे वरविद्याध्ययनैकतत्परमानसो मानससर इवातिनिर्मलीभूतांतःकरणो नारदाख्यो ब्राह्मणतनयो विद्याध्ययनं करोतिस्म. तेन सार्धं राजनंदनो वसुकुमार उपाध्यायांगजः पर्वतश्चापि विद्याभ्यासं चक्रतुः. एवं ते त्रयोऽपि सहाध्यायिनो विद्याध्ययनपरा निजसमयं गमयंतिस्म. अथैकदा गृहांगणगतमंचकोपरि सुप्तोऽसौ क्षीरकदंबाचार्यो निशीथे जागरितो गगनांगणप्रादुर्भूतामेवंविधामाकस्मिकीं वाचं शुश्राव, अस्योपाध्यायस्य सन्निधौ विद्याभ्यासं कुर्वतां त्रयाणामपि कुमाराणां मध्यादेक एव स्वर्गामुकोऽस्ति, परौ च द्वौ नरकं गमिष्यतः. अथैवंविधामाकाशवाणीमाकर्ण्यातीवविस्मित उपाध्यायः खेदं प्राप्य स्वचेतसि चिंतयामास, हा हा मदग्रेऽतिपवित्रवेदाभ्यासं कुर्वतामप्येषां त्रयाणां मध्याद् द्वौ तु नरकगामिनौ, दुर्निवार्योऽयं खलु कर्मणां विपाकः! अथ खलु हिंसापिशाचीपराभूतहृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयानां प्राणिनां खलु नरकावटपतनमेव मरणांते शरणं, करुणार्द्रीकृतस्वांतानामंगिनां च त्रिदश विलासिनीविलासोल्लसितामितशर्मोपभोगो मरणानंतरं सुलभ एव प्रतीयते. अत एषां मध्यात्कः खलु नंदनवनोद्भवकल्पतरुरिव सुमनःश्रीविराजितो भविष्यति? कौ चातिनिंद्यमहानरकाभितापभाजौ भविष्यतः? इत्येषामहं परीक्षणं विधाय क्षणं मम मानसोद्भवशंकाशल्यं दूरीकुर्वे. इति विचिंतयतस्तस्य विरतायां रात्रौ तत्परक्षणक्षणवितरणायेव कर्मसाक्ष्यपि स्वोदयावसरं निरीक्ष्य निजारितमसं निहंतुमिवोदयाचलोरुदंतावलेंद्रमारुरोह. अथ स्नातविहितदेवार्चन उपाध्यायो निध्याय निशोदंतं निजविनेयत्रयाणां परीक्षार्थं पिष्टमयकुर्कुटत्रयमकरोत्. ततोऽध्ययनार्थमागतानां तेषां त्रयाणामेकैकं पिष्टमयं कुर्कुटं दत्वा तेन बुद्धिमतोपाध्यायेनोक्तं भो शिष्याः! केनाप्यदृष्टमेनमेकैकं पिष्टमयं कुर्कुटं निहत्य समागत्य च तत्पिंडो मह्यं समर्पणीयः. गुरुवचसि संशयलेशमप्यदधानास्ते वसुपर्वतनारदास्त्रयोऽप्येकैकं कुर्कुटमादाय नगरतो निर्गत्य बहिर्दूरदेशे गहनवनांतर्गताः.

अथ तेषां वसुपर्वतकौ तु परितो विजनं वनं निरीक्ष्य गुरुवचनरहस्यमजानानौ स्वपिष्टकुर्कुटयोः पिंडं विधाय द्रुतमेव गुरुसमीपमागत्य तत्पिंडं गुरवे समर्पयामासतुः. अथ नारदस्तु गुरुदत्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं पिष्टमयं कुर्कुटं गृहीत्वैकांतगहनवननिकुंजे निर्जनस्थाने गत्वा विचारयामास, अहो! करुणारस-
सागरोऽप्यस्मद्गुरुः पिष्टमयस्याप्यस्य कुर्कुटस्य वधार्थं कथमादेशं दद्यात? अहो! ज्ञातं खलु मया,
गुरुणा हि तथोक्तमस्ति, यथा चैनं कोऽपि न पश्येत्तथास्यैकांते वधः कर्तव्यः. अथैनं पिष्टमयं कु-
र्कुटमादौ त्वहमेव पश्यामि, परितः समारूढास्तरवोऽपि पश्यंति, तर्वादिषु स्थिता विहगादिजंतवोऽपि
पश्यंति, तथैव निजनिर्मलकेवलावलोकविलोकितलोकालोकसचराचरसकलस्वरूपाः केवलिनस्तु स-
र्वत्रापि विलोकयंति. अतो निश्चीयते खलु यत्कृपालुगुरुणास्य पिष्टमयस्यापि कुर्कुटस्य वधार्थमादेशो
दत्त एव नास्ति, किंचाहमपि बुध्ध्या निश्चिनोमि यदेनं पिष्टमयं कुर्कुटमप्यपराधं विना कथं हन्मि?
इति विचिंत्य नारदस्तु तमहत्वैव ततो गहनवनाद्विनिवृत्य निजगुरोस्तस्य क्षीरकदंबोपाध्यायस्य स-
मीपे समागत्य तं पिष्टमयं कुर्कुटं तथैव नतिपरः समर्पयामास. तदा पूर्वमेव गुरुसमीपमागतौ वसु-
पर्वतौ तु तिरस्कृतगुरुनिर्देशस्य नारदस्य हास्यं चक्रतुः. अथ क्षीरसागरगंभीरः क्षीरकदंबोपाध्यायो
विनयोपेतं निजविनेयं नारदं करुणामृतार्द्रचित्ततया त्रिदशालयगामिनमवगम्य प्रमोदपुलकितांग-
स्तमालिंग्य प्रशशंस. शेषौ द्वौ वसुपर्वतकौ तु निष्करुणहृदयौ पठितमूर्खौ च विज्ञाय मनस्यतीव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खिन्नस्तर्जयामास. अथ पलितछलेन जराभिभूतोऽसौ क्षीरकदंबोपाध्यायो निजहृदि संसारासारतां भावयन् शुभभावेनापवर्गगमनैकनिबंधनं चारित्रं जग्राह. अथ तत्स्थानस्थितस्तत्सुत उपाध्याय इव ब्राह्मणबालान् पाठयतिस्म. नारदोऽपि गुरुविरहोद्विग्नमानसस्ततो निःसृत्य निजग्रामं ययौ. अथाभि-चंद्रधराधीशोऽपि स्मृतनिजपूर्वजपरंपराचारः शिरःप्रकटितश्वेतशिरोरुहछलेन जरया प्रकटं निजात्मानं ह-स्यमानं विज्ञाय सुगुरोर्निकटे स्वर्गापवर्गोरुलक्ष्मीविलासिनीविलासेछया संसारांभोधितरणवरयानपा-त्रनिभं संयमं गृहीतवान्. तत्पट्टं चापि तत्तनयो वसुकुमारोऽलंकुर्वन् सन्नीतिगुणाकृष्टां सकलामपि वसुधां स्वायत्तां चकार. मृषावादपरित्यागरूपं द्वितीयं श्राद्धव्रतं सावधानमनसा परिपालयन्नसौ वसु-वसुधाधीशो निखिलायामपि वसुधायां सत्यवादीति लब्धोरुबिरुदः प्रसिद्धो जातः. अथान्यदा कोऽ-पि भिल्लोऽनेकोत्तुंगशिखरायितस्तंबेरमकदंबकाकुलितायां विंध्याटव्यां शरासनधृतातिनिशितशरो मृगं विलोक्य तद्वधार्थं शरमेकं मुमोच. परं श्रुतांभोधिपारगविदुषा दत्तोत्तरेण दुर्वादिविहितप्रश्नमिव त-द्बाणमंतरैव केनापि पदार्थेन स्खलितं. एवं सहसोद्भवशरस्खलनेन तत्स्वांतसमुत्पन्ना चिंता शल्यमिव तं व्यथयामास. ततः कृतनिरीक्षणोऽसावंतरालस्थितामेकां सज्जनस्वांतमिव निर्मलां स्फटिकोपल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिलां ददर्श. अथ रजःपुंजप्रमार्जितादर्शवन्निर्मलां तां स्फटिकशिलां दृष्ट्वा स भिल्लः स्वमनस्येवं व्यचिंतयत्, अहो स्खलितमदीयशरेयं स्फटिकशिला वसुनृपासनयोग्यास्ति. इति विचिंत्य स नगरमध्ये गत्वा प्रछन्नं वसुवसुधाधिपतेस्तदुदंतं द्रुतं कथयामास. वसुनरेंद्रोऽपि तद्वृत्तांतमाकर्ण्यातीवानंदितहृदयस्तस्मै भूरिद्रव्यं वितीर्य विंध्याटवीतस्तां स्फटिकोपलशिलामानाययत. ततः शिल्पकलातिकुशलैः शिल्पिभिस्तस्याः शिलाया अतिमनोहरं सिंहासनपीठं प्रछन्नं सोऽकारयत्. तस्योपरि च स्वकीयं मणिमाणिक्याद्यनेकरत्नखचितं कार्तस्वरविष्टरं न्यस्य तदुपरि च स्वयं निषीदति. तदा तत्स्फटिकोपलपादपीठमजानाना लोका वदंति, यत्सत्यवादित्वप्रभावेणास्माकं वसुराज्ञः सिंहासनं निरालंबमेवांबरांगणे तिष्ठति. सत्यव्रतपरायणस्य वसुवसुधाधिपतेर्वशीभूता विबुधास्तत्सिंहासनं निरालंबमेवाकाशे धारयंतीति तत्कीर्तिर्जगति विस्तृता. अथैकदा पूर्वविहितसहाध्ययनस्मृतप्रीतिगुणाकृष्टो नारदो भ्रमन् वसुदेवसद्मनीव पर्वतगृहे समागतः. तत्र विप्रछात्रगणाग्रे ऋग्वेदपाठं प्रयछन् पर्वतस्तेन दृष्टः. तत्राजैर्यष्टव्यमिति वेदसूत्रस्य मेषैर्यष्टव्यमिति पर्वतेनार्थे विहिते सति नारदः कर्णौ पिधाय शांतं पापमित्युक्त्वा पर्वतंप्रत्युवाच, हे भ्रातरस्माकं गुरुणा त्वजशब्दस्य त्रिवार्षिका जीर्णा व्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हय इत्यर्थः प्रोक्तोऽस्ति, परं तस्य मेषा इत्यर्थस्तु कदापि नैव कथितोऽस्ति. अतस्त्वमपि गुरूक्तमर्थं स्मृतिपथमानीय वृथा पापोपदेशेन मा निजात्मानं नरकावटे पातय? अथ पर्वतोऽपि तदुक्तमेवाजशब्दस्य सत्यार्थं जानन्नपि चपलमेव कदाग्रहपिशाचाभिभूतो मिथ्याभिमानमदिरोन्मत्तचित्तश्चाजल्पत. भो नारद! तव स्वांते मिथ्यैव भ्रांतिर्जातास्ति. गुरुणा त्वजशब्दस्य मेष एवार्थः कथितोऽस्ति. नारदोऽवादीत् हे भ्रातस्त्वं कदाग्रहाभिभूतः शास्त्रसत्यार्थविलोपेन लोकद्वयविरुद्धं कथं करोषि? नारदोक्तवचोघृतधाराभिषिक्तः पर्वतहृदयकुंडोद्भवकोपानलो मिथ्याभिमानेंधनाभिवर्धितस्तन्नयनगोलकौ तापेन विद्रुमारुणवर्णौ चकार. ततोऽसौ तत्कोपानलज्वालावलिनिभां वाणीमास्यविवराद्गुदीर्णवान्. रे नारद! सृतमथ वितंडावादेन, आवयोर्मध्ये स्वस्वपक्षव्यलीकत्वे जिह्वाछेदपणोऽस्तु. किं चावयोः सहाध्यायी वसुनृपो महासत्यवाद्यस्ति, स चावयोर्न्यायं सत्यापयिष्यति. स्वकीयसत्यवचनविश्वस्तेन नारदेनापि तत्तथैव स्वीकृतं. अथ नारदस्तु स्वकार्यकृते पुरविपणश्रेण्यां ययौ, तदा तनयस्नेहातिविह्वला पर्वतजननी पुत्रपार्श्वे समागत्याश्रुपूरपरिपूर्णनयनोवाच, हे वत्स! निजप्राणध्वंसकारिपणकरणतस्त्वया सुष्टु न विहितं. मयापि त्वत्पितुः सन्निधावजशब्दस्य जीर्णधान्यरू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पोऽर्थः श्रुतोऽस्ति. ततो हे वत्स! अधुनापि त्वं नारदपार्श्वे गत्वा तं क्षामय? असत्यं वचो हि सर्वरोगमूलाजीर्णवत्प्राणिनं विनाशयति. निजजननीवाचं निशम्य पर्वतोऽवादीत्, हे मातः! त्वदुक्तं सर्वमपि सत्यं च पथ्यमस्ति, परं वांतान्नमिवैकवारं मुखोद्गीर्णं वचः कथमहं पुनर्मुखे प्रक्षिपामि? किंच देहिनैकवारमवश्यमेव मर्तव्यमस्ति, अतोऽहं मृत्युतो न बिभेमि. अथैवं निजांगजवाचं निशम्य, तं च कदाग्रहग्रहग्रस्तं विज्ञाय वत्सवात्सल्यप्रेरिता माता तनयजीवितेच्छया वसुवसुधाधिपसन्निधौ गता. नरेंद्रोऽपि तां गुरुपत्नीं समागतां विलोक्य जननीमिव मन्यमानः सिंहासनात्समुत्थाय विनयावनतः प्रीतिप्रेरितः प्रणम्य यथास्थानं न्यवेशयत्. ततोऽसौ बद्धांजलिस्तामुवाच, हे मातरद्य त्वया नूनं निजचरणारविंदन्यासैर्मम सदनं पवित्रितं, अथ निजागमनहेतुप्रकटनपरां वचःपीयूषधारां वर्षित्वा चातकयुगलमिव चिरकालादतीवतृषातुरं मम कर्णयुगलं तृप्तं कुरु? एवं विनयोपेतानि नृपतिवचनानि निशम्य पर्वतमातापि हर्षरोमांचितांगी त्वं चिरं जीवेत्याशिषा तं प्रमोद्योवाच, हे वत्स तव सहाध्यायिभ्रातरं पर्वतं यथाहं जीवंतं पश्यामि तथा कुरु? केवलं तेनैवैकेन हेतुनाहमत्रागतास्मि. तत् श्रुत्वा विस्मयापन्नो वसुवसुधाधीश उवाच, हे मातर्गुरुपुत्रोऽयं पर्वतस्तु तीर्थरूपो मे गु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुरेवास्ति, ततो यमातिथित्वं स्वीकुर्वन् कः खलु तस्योपरि द्वेषधारणोत्साहं वहति? कः खलु मम कोपानलज्वालावलौ पतंग इव निजप्राणसंदेहमभिलषति? अथैवंविधां नृपवाचमाकर्ण्य सकर्णया जरत्या नारदपर्वतयोः सकलोऽपि वादपणोदंतो नृपतये निवेदितः. ततो गद्गदकंठया तयोक्तं हे वत्स! अथ पर्वतजीवनं तवाधीनमेवास्ति, अतो मह्यं त्वं पुत्रभिक्षां देहि? एवंविधां गुरुपत्नीवाचं निशम्य निजव्रतभंगभिया कंपितहृदयो वसुनरेंद्रो वज्राहत इव विलुप्तचैतन्यो जातः. कियत्समयानंतरं लब्धचैतन्योऽसौ जगाद, हे मातर्गुरुवचनविलोपेन कूटसाक्ष्यप्रदानेन च प्राणिनां निःशरणं नरकांधकूपपतनमेव निर्दिष्टं. किंच वसुवसुधाधीशः सर्वदा सत्यवाद्यस्तीति जगति विस्तृतं निर्मलं मम यशोवितानमसत्यप्रलापानलज्वालया भस्मीभूतं भवेत्. आसमुद्रांतमंबरैकोत्तरीयांबरालंकृतदेहा, नानाविधसुगंधोपेतानेककुसुममकरंदसुरभीभूतभूतलभ्रमणशीला परमप्रिया मम कीर्तिर्महेलापि परहृन्मुखीव वितथवचोदुर्गंधगंधिलांगं मां त्यक्त्वा स्वयमपि विनाशं प्राप्नुयात. अतो हे मातर्ममोपरि कृपां विधाय मा मामसत्यप्रलापांजनमलिनं कुरु? एवंविधं नृपोक्तं निशम्य तया विदग्धया जरत्या स्वमनसि विचारितं, नायं नृपो विना युक्तिं मदीयोक्तं करिष्यति, इति विचिंत्य तयोक्तं हे वत्स!

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलमलीकवचनमात्रतः प्रथमव्रतवरप्राणातिपातरक्षणेन तव गुणगणाकृष्टा महत्पुण्यपुण्यपरंपराति-
रंजिता मुक्तिकमला स्वयंवरेव त्वां वरिष्यति, किंच तदलीकवचनोद्भवं सर्वमपि पापमहं स्वीकरोमि,
अतस्तच्चिंतयाप्यलं तव. एवं स्वार्थसाधनैकपरया तया जरत्या वंचितो वसुवसुधाधीशोऽपि तदाग्रहा-
त्तद्दाक्षिण्यप्रेरितो विस्तृतनिजयशःकीर्ती अप्यवगणय्य नरकावटपतनस्पृहयाद्भुरिव तद्वचनममन्यत.
अथ प्रभाते वसुवसुधाधवस्य जगद्विस्तृतां सत्यवचनप्रतिज्ञां परीक्षितुमिव कर्ममाड्यपि क्ष्माप इव
स्वकरनिकरं विस्तारयन्, जंतुजातामितमोहनिद्रां तिरस्कुर्वन्, स्वकीयामितवसुप्रदानेन जगज्जंतूना-
ममिताह्लादमुत्पादयन्, प्रोत्तुंगोदयाचलाभिधकनकसिंहासनोपरि समुपविष्टो जगद्राज्यव्यापारमलंच-
कार. अथ नारदपर्वतौ द्वावपि निर्णयार्थमेव स्वस्वपक्षं निवेदयितुं नृपसभामलंचक्रतुः. तयोर्द्वयोरपि
पक्षं श्रुत्वा मध्यस्थसभासदो वसुवसुधाधीशं विज्ञपयामासुः, हे स्वामिन्! भवत्सत्यवचनगुणाकृष्टेयं
वसुमती स्वयंवरेव त्वां परिणीतास्ति, आबाल्यतोऽपि तव सत्यवादसमुद्भूता कीर्तिवल्लरी जगन्मंड-
पविस्तृता जंतुजातामितसंतापसंहारिणी संजातास्ति. अतो जगदंगिगणकल्याणैककांक्षिणा त्वया
यथेयं तव कीर्तिलताधिकविस्तारं प्राप्नुयात्तथानयोर्न्यायः कर्तव्यः. अथैवं सचिवादिसभ्यैर्विज्ञप्तोऽव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नींद्रोऽसत्यप्रलापोद्भवदुर्यशोभीतो मनाक्कंपितहृदयो बभूव. परं पुनः पर्वतमात्रा प्रोत्साहितोऽसावजश- ब्दस्य मेषार्थमकथयत्. इतो वसुभूपालासत्यप्रलापानलज्वालावलिदग्धेव सा सलिलनिमग्ना त्रिद- शालयाधिष्ठिता स्फटिकोपलपीठिका सहसैव स्फुटिता. प्रोत्तुंगशैलशिखराग्रतः कल्पांतकालोद्भवभूकं- पप्रलोठितगंडशैलवद्वसुवसुधेंद्रोऽपि नरकायोगतिगमनकामुक इवाविलंबमेव स्वकीयसिंहासनाद् भूमौ पपात. इहापि तस्यालीकवचनविषद्रुमफलप्रदानोत्सुक इव राज्याधिष्ठायकदेवोऽपि सहसैव तत्राग- त्य भूमिपतितं वसुनृपालं तथा चपेटया जघान, यथासौ गतचैतन्यो रंकवद्भूमौ लुलोठ. असत्य- प्रलापोद्भवपापसंतापाततप्त इव स्वः ।वनिर्मलस्तस्यात्माप्यलीकप्रलापमलीनं तं तत्याज. एवं पंचत्व- मापन्नो वसुनृपालः कूटालापप्रभावेण सप्तमनरकावनिं ययौ. पर्वतोऽपि जननीयुतो निखिललोकै- र्निंद्यमानः पराभवपरंपरयोद्विग्नस्तन्नगरं विमुच्य क्वचिद्देशांतरे गतः. कूटसाक्ष्यप्रदानेन वसुनरेंद्रोऽपि निजासनात्पतित्वा पंचत्वं प्राप्त इति जगदुद्भवां तदकीर्तिं निशम्य लज्जितयेव तस्य कीर्तिमहेलया- प्यात्मघातो विहितः. एवं भो प्रदेशिनृपाल! वसुनरेंद्रनिदर्शनं हृदि संभाव्य सुगतिगमनाभिलाष- वता जनेन सर्वदालीकवचनपरिहारो विधेयः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गणधरेंद्रोक्तवसुनृपालनिदर्शनाकर्णनातिहृष्टः प्रदेश्यवनीशो बद्धांजलिर्जगौ, हे भगवन्! त्वदुक्तनिदर्शनजलप्रवाहेण निर्मलीभूते मम हृदयादर्शे द्वितीयश्राद्धव्रतमथ सम्यग् संक्रांतं. अथ पुनरपि ममोपरि कृपां विधाय तृतीयं श्राद्धव्रतं सनिदर्शनं निदर्शयत? गणधरेंद्रोऽप्युवाच हे राजन् परपदार्थग्रहणात्मकादत्तादानपरिहारेण तृतीयं श्राद्धव्रतं परिपालितं भवेत. तत्पालनेन च जनः परशुरामवल्लोकद्वयेऽप्यमितसौख्यपरंपरां प्राप्नोति. तत श्रुत्वा नृपोऽवादीत्, हे भगवन्! कोऽसौ परशुरामः? कथं च सोऽदत्तादानपरिहारेण सुखसंततिं संप्राप्तः? तस्य सकलमप्युदंतं निवेदयित्वोत्पथगामिनं मां सार्थवाह इव सत्पथगामिनं कुरुत? गणधरेंद्रोऽपि घनाघनगर्जनातिगभीरवाण्या नृपमनोमयूरं नर्तयन्नुवाच, हे राजन्ननेकनदसलिलामितप्रवाहपरिधौताखिललोककश्मलौघे पांचालाख्ये जनपदे कांपिल्यपुराभिधं रम्यं पुरमस्ति. यत्र प्रोत्तुंगानेकप्रासादगवाक्षस्थितानेकगौरपौरांगनाननपंकजालिपरिमंडितगगनांगणं निरीक्ष्य प्रमाणवादिनोऽपि स्वकीयाकाशपुष्पनिदर्शनमलीकमेव मन्यमानाः स्वचेतस्सु चमत्कृताश्च क्षणं तूष्णीभावमेव भेजुः. तत्र विक्रमाक्रांतानेकरिपुनृपपत्नीनयनविनिर्गलदश्रुश्रेणिजलपरिपूर्णकुंडकृतस्नानातिविस्तृतयशोभरो विक्रमाभिधो भूधव आसीत. तस्य शी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लभूषणभूषितांगा रूपविनिर्जितनिर्जरांगना वसुंधराख्या राज्ञी बभूव. तस्य नृपस्य धनुर्विद्यातिनि- ष्णातहृदयोऽपरः पांडवीयोऽर्जुन इवार्जुनाभिधः सचिवोऽभूत. तस्यास्यकरचरणतिरस्कृतपंकजा देव- कयाख्या वल्लभाभवत. तयोः सकलकलाकलापकुशलः साहित्यरसालरसालंकारालंकृतांतःकरणोऽन्य- कार्तस्वररत्नाद्यलंकारपराङ्मुखो राजकार्यादिविमुखस्वांतः परशुरामाभिधस्तनय आसीत्. साहित्यसा- रैकरसिकस्य तस्य मानसे गृहराज्यव्यापारकार्यैणोत्कटकंटकेनेव शल्यायितं. अथैवं स्वकीयं तं तन- यं सर्वथैव गृहकार्यादिविमुखं विज्ञाय हृदि खिन्नस्तस्य जनकोऽर्जुनसचिवो रहसि समाहूयाकथयत्, भो वत्स! संसारव्यवहाराज्ञानेन नराणां व्याकरणाध्ययनं केवलं व्याधिकरणमेव ज्ञेयं, यतो बुभु- क्षितानामुदरविवरं व्याकरणरसेन न पूर्यते, न च तृषातुराणां साहित्यपेशलरसामृतधारया तृडपनु- यते. प्रायो रसवत्या सरस्वत्यातिगाढप्रेमभरेणालिंगितो जनः सापत्न्येर्ष्ययेव लक्ष्म्या तिरस्कृतो भ- वति. अतो भो वत्स! त्वं सरस्वतीसंगं विमुच्य गृहव्यापारं चांगीकुरु? येनाचिरादेव सर्वप्राणिप्रा- र्थितया लक्ष्मीमहेलया प्रेमकटाक्षपूर्वकं त्वं गाढं समालिंगितो भविष्यसि. लक्ष्म्या सम्यग् समालिं- गितो जनश्च तदचिंत्यमाहात्म्यतो वशीभूतैरिव नृपादिसकललोकैः परिपूज्यमानोऽमानमानसौख्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परंपरामधिगच्छति. एवं पित्रा बहूक्तोऽपि सरससरस्वत्या वशीकृत इव तदासक्तस्वांतः परशुरामो गृहादिव्यापारपराङ्मुख एवासीत. विविधकविवरविनिर्मितामितरसालंकारालंकृतकाव्यरसास्वादैर्भ्रांत इवासौ भोजनसमयातिक्रमणमप्यवगणयतिस्म. सरस्वतीकंठाभरणा अनेके महाकवयस्तदीयकाव्यरसास्वादगुणाकृष्टा इव दूरदेशादपि समेत्य राजानं सचिवसंचया इव तं परिवेष्ट्य विविधकाव्यविनोदेन प्रीणयंतो निजसमयं गमयंतिस्म.

अथैकदा नृपेन स्वकीयोऽनेकमणिमाणिक्यमौक्तिकादिमंडितो रत्नहारो भांडागारे रक्षणार्थं तस्मै स्वार्जुनसचिवाय समर्पितः. मंत्रिणापि स हारो निजतनयाय परशुरामाय समर्प्योक्तं, भो वत्स! त्वयायं हारः सम्यग् रक्षितो राजभांडागारे स्थाप्यः, इत्युक्त्वा सचिवस्तु राजसभायां संप्राप्तः. परशुरामस्तु तं हारं पार्श्वे संस्थाप्य गूढतत्वार्थतर्कशास्त्रविचारैकाग्रचित्तो जनानां गमनागमनं न वेत्तिस्म. इतश्चौर्यकलाकलापकुशलः कपटनाटकैकपटुः कालीसुतनामा सचिवसेवकस्तं हारं करलाघवेन जहार. साहित्यरससागरे मीनवल्लीनः परशुरामस्तु हारं संहरंतं तं सेवकं न ददर्श. अथ कियता कालेन गवेषयतापि परशुरामेण स हारो निर्भाग्येन निधिरिव क्वापि न लब्धः. अथ सायं समेतः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सचिवो हारापहारं विज्ञाय दंदशूक इव निःशूकोऽतीवकोपारुणलोचनो विषोद्गारसन्निभां वाचं पुत्रं-प्रत्युवाच. रे दुराचार! रे मूढशिरोमणे! रे निर्लज्ज! साहित्यैकरसमदिरोन्मत्तचित्तेन त्वया नृप हारमप्यरक्षता स्वकीयं सकलमपि कुटुंबं प्राणसंदेहदोलाधिरूढं कृतं. सरस्वत्येकरसाकुलस्त्वं विप्लव-कारिजलप्रवाह इव कुलद्वयं विध्वंसयन् सकलमपि स्वपरिवारमापदपारपारावारपातनैकसमर्थो जातः. अथ मा दर्शय मे त्वदीयं वदनं, मदीयगृहाच्च त्वं दूरं प्रयाहि? एवं पुत्रं निर्भर्त्स्यार्जुनसचिवश्च्यु-तफालः पंचानन इवातीवम्लानास्योऽथाहं नृपस्य किमुत्तरं दास्य इति चिंतातुरो निजगेहांतरं य-यौ. अथ पित्रेति तर्जितः परशुरामोऽपि निजप्रमादेन हारापहारं विज्ञाय मनस्यतीवखिन्नो निशा-यां त्यक्तनिजनिकेतनो मानभ्रष्टपंचानन इव गहनं वनं विजहार. एवं निशायामेव क्रमान्यां क्रा-मन् क्रमेण तद्गहनं वनमुल्लंघ्य प्रातः प्रभाकर इव दीप्तदेहकांतिः परशुराम इंद्रपस्थाभिधं पुरं संप्रा-प्तः. तत्राम्रजंबूजंबीरकदंबाशोकादिविविधवृक्षशीतलच्छायाविनिवारितचंद्ररश्मिरश्मिनिकरे कुसुमोद्या-ने पथश्रमापनोदार्थं संस्थितः. तत्र नातिदूरे सुकुमालरक्तपल्लवविराजितेऽशोकवरतरुतले जंगमती-र्थमिव संस्थितं, सूत्रस्वाध्यायैकध्यानपरायणं, मूर्तिमंतं शांतरसमिव स्पृहणीयाननं धर्मयशोऽभिधं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिवरं ददर्श. तं दृष्ट्वातीवप्रमुदितः परशुरामो विनयेन नत्वा पप्रछ, हे भगवंस्तरुणीगणस्पृहणीय-तारुण्यकलितेन, रूपविनिर्जितमन्मथेनापि भवता देहामितक्लेशप्रदं तपःकष्टं कथं समादृतं? तत श्रु-त्वा मुनींद्रोऽपि मोहनिद्राविद्राविणीं निजकथां कथयामास. हे भद्र! मम निर्वेदकारणं त्वं साव-धानतया शृणु?—

तगरागुर्वाद्यनेकसुरभिद्रव्यसुरभिभूताखिलमहेभ्यहर्म्यायां तगराभिधाननगर्यां नृपतिमान्यस्य दानाद्यनेकगुणगणालंकृतस्य दत्ताख्यश्रेष्ठिवर्यस्य धनाख्योऽहं सुतोऽभवं. राकाशशांक इव सकल कलाकलापकलितः कुमुदोल्लासैकमानसोऽहं पित्रा रोहिण्येवैकया सुकुलोद्भवकन्यया सह घनधन-व्ययेन महोत्सवपुरस्सरं परिणायितः. रत्या पंचेषुरिव तया सह यौवनैकफलीभूतपंचाक्षविविधसुखा-न्यनुभवन् नानाविधव्यापारेण द्रविणोपार्जनपरो लक्ष्मीपुंजं समर्जयं. अथ कियत्कालानंतरं निर्घृ-णेन कालेन जनको मे कवलीकृतः. पितृपंचत्वयोगेन हताशोऽहं शोकपिशाचग्रासीकृतो व्यापारा-दिपराङ्मुखोऽभवं. एवं मामालस्यदास्यमापन्नं विज्ञाय भगवती कमलासना देवी तिरस्कारयामास. भांडागारस्थापितं निखिलमपि मम धान्यं कुपितेनेव दुष्टेनानलेन भस्मीकृतं. व्यापाराय द्वीपांतरप्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याणार्थं प्रवणीकृतानि नानाक्रयाणकसंभृतानि मम पंचापि प्रवहणानि प्रोच्छलत्कल्लोलजालेन ग्रथिलीभूतेनेव सलिलनिधिना निजोदरे कवलीकृतानि. दायादैरिव तस्करनिकरैर्मम गृहं प्रविश्य सकलमपि द्रविणं गृहीत्वा कृपयेव साधुरिवाहं निष्परिग्रहः कृतः. भोक्तुं स्थितस्यापि मम पात्राणि लब्धपक्षाणीवोड्डीयांबरे ययुः. अथाहमकृताहारस्तपोधन इव निजगेहाद्विनिःसृत्य क्षुधानीवकृशांगो वनमध्ये गतः. तत्र तपस्तेजःपुंजनिरस्ताखिलकश्मलो ज्ञानांभोनिर्मलीकृतनिजस्वांतः कायोत्सर्गस्थितश्चंपकोरुतरुतलस्थितोऽतीवप्रशांतमूर्तिर्मुनिरेको मया दृष्टः. विधिना मुनिमेनं प्रणम्य निखिलमपि निजोदंतं निवेद्य विनयेन मया पृष्टं, हे भगवन्! पूर्वभवे मया किं दुष्कर्मोपार्जितं? येन ममेदृशी गतिर्जाता? तदा करुणामृतार्द्रीभूतांतःकरणोऽनगारोऽपि स्वकीयवचःसुधारसधाराभिर्दुःखसंतापतप्तहृदयं मां सिंचन्निवोवाच, हे भद्र! पूर्वभवे त्वया परकीयमदत्तं द्रव्यं गृहीतं, तत्कर्मोज्जृंभितमेतत सकलं तव विडंबनं ज्ञेयं. एतन्मुनिवचनं निशम्य भयकंपितहृदयेन मयोक्तं, हे भगवन्! पूर्वभवे कथं मया परद्रव्यापहारः कृतः? तं निखिलमपि मम पूर्वभवोदंतं निवेदयित्वा मम हृदयसंतापं यूयं दूरीकुरुत? तदा ज्ञानैकनिधिर्वाचंयमोऽपि निजवचःपीयूषधाराभिर्धाराधरधोरणीमप्यधरीकुर्वन्नाह. अ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेकोत्तुंगशिखरनिकरालंकृतार्हत्प्रासादश्रेणिचित्रितांबरांगणायां कौशांब्याख्यनगर्यां पूर्वभवे त्वमेको निजकुलपरंपरागतजैनधर्माराधको वणिग्वरोऽभवः. अथैकदा साधुमुखाद्धर्मरहस्यं श्रुत्वा त्वया भावेन श्राद्धव्रतान्यंगीकृतानि. क्रमेण कियता कालेन वटद्रुम इव त्वमपि पुत्रपुत्र्यादिपरिवारपरिवृतः संजातः. क्रमेण च तान् सुतांगजादींस्तारुण्यसंगतान् विलोक्य तद्विवाहचिंता तव चेतसि समुत्पन्ना. तद्विवाहार्थं द्रविणोपार्जनैकलालसेन त्वया पूर्वगृहीतश्राद्धव्रतानि क्रमेण शिथिलीकृतानि. विशेषेण विस्मृततृतीयव्रतेनेव त्वया कूटतोलमानैर्ग्राहकवंचनं विधाय द्रविणोपार्जनं कृतं. कियता कालेन ज्ञातत्वदीयकूटचेष्टितेन यमेनेव नृपारक्षकेण त्वं धृतः. नृपकृतामितद्रव्यदंडस्त्वमनालोचितपापभरः क्रमेण दुर्ध्यानपरो मृत्वा किल्बिषदेवोऽभवः. ततश्च्युत्वा त्वमिह दत्तश्रेष्ठिगृहे पुत्रत्वेन समुत्पन्नः. पूर्वं गृहीतव्रतखंडनतोऽदत्तादानतश्च तवेह सकलमपि द्रव्यं नष्टं. संसारे सर्वेऽपि प्राणिनः स्वकृतकर्माण्यनुभवंति, अतोऽधुना त्वं खेदं मा कुरु? एवं मम श्रवणप्रणालिकाप्रविष्टमुनीशोपदेशामृतशीतलधारया धनादिप्रणाशातीवदुःखसंतापसंतप्तं मम हृदयमुपशांतं. अथ लब्धजातिस्मरणोऽहं साक्षादिव पूर्वभवं स्मृत्वा संसारोद्विग्नः कृतांजलिपुटो मुनीशमप्रार्थयं, हे भग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्! कृपां विधाय संसारसागरतरणतरंमनिन्नं संयमं मह्यं समर्पय? कृपानिधिर्मुनीशोऽपि मां योग्यं विज्ञाय संयमालंकारदानेनालंकारयामास. तदादितोऽहं निरतिचारं संयमं पालयन् धरणेंद्रानुज्ञया कायोत्सर्गादिधर्मध्यानपरो नानाविधतपोविधानैकपरायणो महीमंडले विचरामि. एवं गन्नीरघनघनाघनगर्जनतुल्यां मुनींद्रवाचं निशम्य मंत्रिपुत्रः परशुरामोऽपि मयूर इवामंदानंदपरंपरां संप्राप्य ललाटतटबद्धांजलिपुटो मुनीशंप्रति विज्ञपयामास. हे भगवन्! ममोपरि कृपां विधाय तृतीयं श्राद्धव्रतप्रवहणं च समर्प्य सांयात्रिक इव त्वमस्मादपारसंसारपारावारतो ब्रुमंतं मां निस्तारय? मुनींद्रोऽपि तं योग्यं विज्ञायादत्तादानविरमणरूपं तृतीयं श्राद्धव्रतं तस्मै प्रदायान्यत्र विजहार.

अथ परशुरामोऽपि गृहीततृतीयश्राद्धव्रतसबलशंबल इंद्रप्रस्थनगरमध्ये जगाम. इतस्तन्नगरवास्तव्यो जयदेवाख्यश्रेष्ठी नगरमध्ये भ्रमंतं तं परशुराममिंगिताकारेण सज्जनं विज्ञाय निजगृहे समानयत. जयदेवेन भोजनाछादनादिसत्कृतः परशुरामस्तस्य गृहे निवसन्निजसमयं गमयतिस्म. तदीयसाहित्यगायनवादित्रवादननृत्यादिकलाकलापातीवतुष्टस्य जयदेवस्य परशुरामेण सह दुग्धोदकनिन्नं परमं सौहार्दमन्नवत्. अथैकदा तौ द्वावपि सुहृदौ ग्रीष्मर्तौ जलक्रीडाकरणेछया पुष्करनि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करविराजितायां, हंसमिथुनाशनयोग्यविकीर्णविततबिसतंतुसंततिमिषेणामितमौक्तिकमालालंकृतायां, परितः सुवर्णसोपानपंक्तिपरिवृतायामनेकयुवकयुवतीगणैर्जलक्रीडायै परिणिषेवितायां, तटालंकरणीभूतचंडकिरणानेकतीव्रकिरणगणातिसंतप्तजंबूनारंगाम्रादितरुनिकरैर्जलप्रविष्टनिजप्रतिबिंबमिषेण स्नानकरणोत्सुकैरिव परितो निषेव्यमाणायां पुष्करिण्यां प्रविष्टौ. तत्र जलक्रीडोत्सुकमानसैरनेकयुवकनागरनरनारीनिकरैः पुष्करिण्यमलसलिले निजबाहुभिर्विलोड्यमाने प्रोच्छलदच्छशुभ्रसलिलबुद्बुदसीकरनिकरा निजस्थानागतानेकनागरातिथिसार्थातिथ्यविधानोत्सुकया जलदेवतया विकीर्णाः पुष्पप्रकरा इव रेजिरे. मन्मथोन्मादप्रथिलीभूतेनेव निजप्रेयसा शृंगिकोत्क्षिप्ता अमलजलबिंदवो यौवनोन्मादमत्तायाः प्रमदायाः पीनोत्तुंगकठिनकुचकुंभोपरि निहितामलमौक्तिकमाला इव शुशुभुः. उच्छलत्सलिलकल्लोलैः परिप्लावितांगा रक्ताधरपल्लवा प्रकटोरुस्तनस्तबकफला शुभ्रोरुदंतपंक्तिकुसुमभरालंकृता वापीजले तरंती काचिदंगना जंगमा मोहनवल्लरीव रेजे. पुष्करिण्यगाधसलिले तरन् मारविकारप्रेरितः कश्चिद्युवा जलब्रुडनभयभीत इव विमुक्तलज्जो निजयुवतीप्रमदोरुस्तनकलशालंबनं कराभ्यां दृढं गृहीत्वा वापीतटं संप्राप्तः. वापीसलिले तरंती काचित्प्रमदा पृष्ठस्थितां भृंगश्यामां निज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कबरीमपि धावंतीं जलसर्पिणीमिव मन्यमाना भयातुरेव प्रयत्नं विनैव नातिदूरे जलस्थितं निजभर्तारंप्रति धावित्वा तं दृढमालिंगयामास. काचित्प्रमदा निजास्यकरचरणशोभाविजित्वरीं पुष्करिणीजलोत्कीर्णां पद्मिनीं हृदयसमुद्भूतेर्ष्ययेव क्रीडाकृते लुलाव. युवतीजनपीनस्तनस्तबकैस्ताड्यमानं निश्चेतनमपि पुष्करिणीजलं मारविकारप्रेर्यमाणमिव निजोच्छलल्लोलकल्लोलकैस्तस्या निखिलमपि कदलीदलकोमलांगं दृढमालिंगयामास. जलक्रीडासक्तयुवकमिथुनोत्क्षिप्तसलिलामितकल्लोलैः समुद्भूतपराभवेणोड्डीयमानान् निजप्रियान् हंसवरान्निरीक्ष्य विरहातुरा इव कमलिन्यः कंपमानांग्यो गलत्सलिलसीकरनिकरमिषेणाश्रुधारां मुंचंत्यो निजव्यथां प्रकटयामासुः. वापीजलक्रीडैकमानसत्वेन सलिलावगाहनावसरोऽपास्तांतरीयवस्त्राया निजप्रेयस्याः प्रकटीभूतं पृथुलतरं नितंबबिंबं निरीक्ष्य हृदयोद्भूतमन्मथोद्रेकविह्वलीभूतस्तन्नितंबं तुंबिफलमिव मन्यमानः कराभ्यां तदालंबनं विधाय जलमज्जनभयविमुक्त इव कश्चिद्युवा तत्र जलक्रीडापरायणो बभूव. अथ जयदेवयुतः परशुरामोऽपि तेषां युवकनागरिकमिथुनिकराणां नानाविधजलक्रीडां विलोक्य परमप्रमोदं लभमानः पुष्करिण्यमलसलिले स्नानं विधाय परिहितोरुवस्त्रो वापीतटमलंकारयामास. इतो निरलंकारां युवतीमिव, प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तितकुसुमां नवमालतीलतामिव, दिनोदये शशांकलक्ष्मीमिव च महर्घ्योरुरत्नजटितकनकमुद्रारहितां
शून्यां निस्तेजस्कां च निजांगुलिं निरीक्ष्य जयदेवः शोकपिशाचग्रस्त इव विछायवदनो बभूव. दि-
नश्रीनिस्तेजस्कीकृतपांडुपलाशपत्रनिभशशांकबिंबवन्म्लानवदनं निजसुहृदं जयदेवं निरीक्ष्य परशु-
रामोऽपि खेदपरंपरापराभूतोऽवदत, भो मित्र! धाराधरोग्रधाराधोरणीनिहतं कोमलकमलकुसुममिव
कथं तव वदनं विछायम्लानं विलोक्यते? अथैवंविधं निजसुहृद्वचो निशम्य जयदेव उवाच, हे
मित्र! रत्नजटितमुद्रारहिता ममेयमंगुली भ्रष्टकुसुमा नवजातिलतेव निःश्रीका दृश्यते. न जानेऽहं
क्वेयं मम मुद्रिका पतिता? तेनैव हेतुना मम हृदये खेदः समुद्भूतोऽस्ति. एवं स्वसुहृद्वचनमाकर्ण्य
निजवचोऽमृतधारया तस्य हृदयसंतापं दूरीकुर्वन् परशुराम उवाच, हे मित्र! त्वं मनागपि स्वमनसि
संतापं मा कुरु? जलक्रीडानंतरं वापीतटोपागतस्य तव करांगुलितोऽधुनैवात्र पतितेयं त्वदीया बहुमू-
ल्या मुद्रिका मया लब्धास्ति. अत एनामंगीकृत्यानया च तव पल्लवकोमलामंगुलिमलंकृत्य चेतश्चिं-
तामपाकुरु? इत्युक्त्वा परशुरामेण सा मुद्रा निजसुहृदे जयदेवाय समर्पिता. जयदेवोऽपि तया नि-
जांगुलिमलंकृत्यातीवहृष्टहृदय उवाच, भो मित्र! नूनं त्वादृशैरेव सज्जनैरधुनापीयं वसुंधरा रत्नगर्भा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निगद्यते. इत्यादिबहुविधां परशुरामस्य प्रशंसां विधाय तौ द्वावपि सुहृदौ पथि नानाविधकौतुकानि विलोकयंतौ, वार्ताविनोदेन च परमाह्लादमनुभवंतौ निजस्थाने समायातौ. अथैकदा तौ जयदेव-परशुरामौ नानाविधविद्याविनोदवार्तां कुर्वंतौ निजगृहांगणे समुपविष्टावास्तां.

इतः स हारहर्ता कालीपुत्रो दासो दैवयोगेन हारविक्रयार्थी तयोः पार्श्वे समायातः. वेषपरावर्तनतश्च स परशुरामं नोपलक्षयामास. जयदेवेनागमनकारणं पृष्टोऽसौ हारं दर्शयित्वा तन्मूल्यमयाचत. जयदेवोऽपि नानाविधरत्नजटितं तं बहुमूल्यं हारं दृष्ट्वोवाच, भो पुरुष! अयं हारस्तु नृपतेर्योग्योऽस्ति. इतः परशुरामस्तु तं कालीपुत्रं हारं च सम्यगुपलक्ष्य जयदेवस्य कर्णे सकलमपि हारापहारप्राग्वृत्तांतं न्यवेदयत. समासादिततद्वृत्तांतेन जयदेवेन तस्मै पृष्टं, भो पुरुष! कुत्रास्ति तव निवासस्थानं किं च तवाभिधानं? कालीपुत्रेणोक्तं हे श्रेष्ठिन्! कांपिल्यपुरं मम निवासस्थानं वर्तते, ततश्च कालीपुत्राभिधो वणिगहं हारविक्रयार्थमत्रागतोऽस्मि. एतन्निशम्य जयदेवेनोक्तं भो कालीपुत्र! इमं मत्पार्श्वसंस्थितं मदीयं सुहृदं त्वमुपलक्षसे? अयं हि कांपिल्यपुरनराधिपमंत्रिपुत्रः परशुरामाभिधोऽस्ति. अथैवंविधं जयदेवश्रेष्ठिवचनमाकर्ण्य तरलतरदृष्ट्या च परशुराममपि सम्यगुप-

For Private And Personal Use Only

लक्ष्य स स्तेनशिरोमणिः कालिसुतः क्षणं वज्राहत इव मौनमेव समाश्रितः. ततः स्तैन्यकलाप्रवी-
णोऽसौ क्षणत एव निर्जंगिताकारं सुसंवृत्यानभिज्ञवत्परशुरामंप्रत्युवाच, भो सत्पुरुष! कस्त्वं? कुत्र
च तव निवासस्थानं? मया तु त्वं न कदापि दृष्टोऽसि? तदा परशुराम उवाच, भो मूढ! अल्पैरेव
दिनैः किं त्वयाहं विस्मृतः? मम पिता कांपिल्यपुरनृपस्य सचिवोऽस्ति, अहं च तत्पुत्रः परशुरामो-
ऽस्मि. त्वं च तदा मदीयगृहे दास आसीः. एवंविधमुदंतमाकर्ण्य विज्ञायवदनोऽपि कालीसुत उवा-
च, भो सत्पुरुष! त्वदुक्तं सकलमप्यलीकं वर्तते. अथ जयदेवेनोक्तं भो कालीपुत्र! सृतमेतेन
विवादेन, अथ त्वं सत्यं वद? कस्यायं हारः? कुतश्च त्वया लब्धः? कालीपुत्र उवाच भो जयदे-
व! अहं रोहाख्यनृपस्य नियोग्यस्मि, तुष्टेन तेन नृपेन च पारितोषिकपदेऽयं हारो मह्यं दत्तोऽस्ति.
द्रव्यार्थी चाहं तद्विक्रयायात्रागतोऽस्मि. परशुरामः कालीपुत्रंप्रत्युवाच, रे दुष्ट! किं त्वं सर्वथैवासत्यं
प्रजल्पसि? कांपिल्यपुरनृपसत्कोऽयं हारस्त्वया मदीयगृहादपहृतोऽस्ति. इति निशम्य कोपाकुलचि-
त्तः कालीपुत्रो जयदेवंप्रत्युवाच, भो भद्र! मदीयमेनं हारं त्वरितं त्वं मह्यं समर्पय? अन्यत्र गत्वा
कस्मैचित श्रेष्ठिवराय दत्वा मनोवांछितं द्रव्यं गृहीष्यामि. त्वादृशा ह्येनं हारं गृहीतुमसमर्था एव.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालीपुत्रेणेत्युक्तोऽपि जयदेवो हारं तस्मै नार्पयामास. अथ ताभ्यां गृहांगणान्निष्कासितः काली- पुत्रस्तु महाकोपाटोपोत्कटाननो द्रुतं तन्नगरनृपपार्श्वे गत्वा निजहारोदंतमकथयत. नृपोऽपि जयदे- वपरशुरामौ समाकार्य हारवृत्तांतमपृछत्. तदा परशुरामेण मूलादारभ्य हारस्य निखिलोऽप्युदंतो नृ पाग्रे प्रकटीकृतः. तदा नृपेण जयदेवायोक्तं भो जयदेव! तं हारं त्वमत्र समानय? यथाहं तं वि- लोकयामि. जयदेवेनापि तूर्णं समानीय हारो नृपाय दर्शितः. अथ नानाविधामूल्यरत्नजटितं तं हारं विलोक्य लोभपिशाचाभिभूतो नृपो हारग्रहणेछया कालीपुत्रंप्रत्युवाच, भो कालीपुत्र! यदि त्वं निर्दोषोऽसि तदा त्वं सलिलपूर्णवाप्यंतःस्थितां चंभिकां पद्मसंचयैः समर्चय? नृपोक्तं श्रुत्वा धृ- ष्टोऽसौ स्तेनस्तु मकरादिरुद्रजलचरोपद्रवयुतायां वाप्यां प्राविशत. प्रविष्टोऽसौ च जनसमक्षं तत्क्षण- मेव चंभिकया कोपेन मारितो मृत्वा नरकावनिं ययौ. अथ लोभाभिभूतो नरेंद्रः परशुराममपि नि- जनिर्दोषत्वप्रकटनाय चंभिकार्चनार्थमादिशत्. सोऽपि नृपादेशं प्रमाणीकृत्य सुस्नातः परिहितोरुवस्त्रो नमस्कारं हृदि स्मरन् वाप्यां प्राविशत्. इतस्तन्नियमप्रभावेणाकृष्टा परिहृष्टा जलदेवी द्रुतमेव तत्र प्रकटीभूय लोकसमक्षं परशुरामंप्रत्युवाच, हे वत्स! त्वं मनसि मनागपि खेदं माकार्षीः. अथ देवी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतसहायः साहसैकनिधिः परशुरामोऽपि वापीतः पद्मपुंजं गृहीत्वा चंडिकामर्चयामास. ततोऽसावतीवविस्मितनागरैः सस्पृहं विलोक्यमानः प्रशस्यमानश्च वापीतो बहिरागात्. अथैवंविधं पुण्यपरंपरसमुद्भूतं परशुराममाहात्म्यं विज्ञाय हृदयोदितविवेकज्ञानुनिरस्तहारग्रहणाभिलाषतमिस्रो भूमिपालश्चिंतयति, नूनं मत्कृतान्यायसमीरेण दिगंतविस्तृता मम कीर्तिदीपिका विलयं यास्यति, पुरलोकाश्च मां लोभाभिभूतमन्यायकारिणं च विज्ञाय दुस्सहां मम निंदां करिष्यंति. इति विचिंत्य नृपोऽपि प्रसन्नवदनो जनसमक्षं परशुरामप्रशंसां विधाय तस्मै तं महर्घ्यं हारं समर्पयामास. परशुरामोऽपि नृपं प्रणम्य हारं च समादाय प्रमोदभरपूर्णहृदयः सुहृदा सह निजस्थाने समागतः. अथ कियद्दिनानंतरमश्रुश्रेणिपूर्णनेत्रेण जयदेवसुहृदा विसृष्टः परशुरामो हारसमेतो निजनगरे समागत्य निजजनकचरणारविंदयोः प्रणनाम. हारसंबंधिनिजसकलोदंतनिवेदनपुरस्सरं च स हारं पित्रे समर्पयामास. विज्ञातैतद्वृत्तांतैर्नृपादिनिखिललोकैरतीवप्रशस्यमानः परशुरामो निरतिचारं निजव्रतं पालयन् विस्तृतस्वकीर्तिलतया च महीमंडलमंमंडपमाच्छादयन् प्रांते चाराधनापूर्वकं कालं कृत्वा स्वर्गं लब्ध्वानेकनाकिनारीनिकरस्पृहणीयो बभूव. एवं तृतीयव्रतपालनमाहात्म्यसूचकं परशुरामनिदर्शनं निगद्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकेशिकुमारगणधरेंद्रः प्रदेशिनृपालंप्रत्युवाच, हे नरेंद्र! एवं मदुक्तं परशुरामनिदर्शनं हृदि सम्यग् संभाव्य त्वयापि सर्वदा तद्व्रताराधनपरेण भाव्यं. प्रदेशिनृपालोऽपि प्रमोदपूरपूरितांतःकरणो ललाटतटबद्धांजलिपुटो गणधरेंद्रं प्रणम्योवाच, हे भगवन्! तृतीयश्राद्धव्रतसमाराधनमाहात्म्यनिदर्शकं निदर्शनं हृदि सम्यग् धृत्वाहं भवत्कृपया सम्यक् तदाराधनं विधास्ये.

अथ चतुर्थश्राद्धव्रतविस्तरश्रवणामृतपानार्थं तृषातुराविव मम कर्णावतीवसमुत्सुकौ वर्तेते, अतस्तद्विस्तरं कथयित्वा ममोपर्युपकारं कुरुत? अथैवंविधां नृपवाचं निशम्य केशिकुमारगणपतिरपि तदुपकारचिकीर्षया घनाघनघनवर्षणसन्निभनिजध्वनिसुधाधोरणीभिरभितो विकीर्णमोहरजःपुंजमुपशामयन्निवोवाच, हे राजन्! चतुर्थब्रह्मव्रतसन्नाहालंकृतदेहिनं जगज्जंतुजाजयसमर्थोऽपि पुष्पेषुसुभटो नोपद्रवितुं समर्थो भवति. मारविकारातिरेकाकृष्टाः प्राणिनो वधबंधनादिदुस्सहवेदनाभिभूताः प्रांते महांधकारे वचनातिगघोरदुःखपरंपरापरिपूर्णे नरकावटे पतंति. रमणीयस्वरूपां मुखमधुरां कुटिलहृदयाशयां किंपाकफलवल्लीमिव वारांगनां सेवितुं को धीमानत्र समभिलषेत? अतीवमैथुनपरिसेवनतः समुद्भवा मूर्तिमंतः पापपुंजा इव कंपस्वेदश्रममूर्छाभ्रमग्लानिबलक्षयराजयक्ष्मरोगादयोऽ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेका आपदः समुद्भवंति. वैद्यकलाकुशलैरप्यगदंकारैरसाध्यो विदुषामपि हृदयोन्माथसमर्थो मन्मथज्वरो नानाविधशीतोपचाराणामप्यगम्यः प्रांते देहिनां देहं विनाशयति. निर्मलशीलालंकारालंकृता मनुजा इहापि स्पृहणीययशःकीर्तिकमलादिसमुद्भवममितं सुखसंचयं समासाद्य परत्रापि वचोऽतिगशर्मभाजनसुरांगनास्पृहणीया भवंति. यथा शीलालंकारालंकृतः सुरप्रियाभिधो द्विजः परस्त्रीत्यागयोगेन परमोत्कृष्टशर्मपरंपरां समवाप्य सुराणामपि प्रियो बभूव. अथैवं मुनीशमुखकमलोद्भवं चतुर्थव्रतब्रह्मचर्योरुमाहात्म्यसूचकमुपदेशमकरंदं निपीय चंचरिक इव समासादितपरमप्रमोदः प्रदेशिनृपालो गणधरेंद्रचरणारविंदयोर्निजमस्तकं निधाय कृतांजलिर्जगौ, हे भगवन्! कोऽसौ सुरप्रियः? कथं च तेन ब्रह्मव्रताराधनेन सुखसंततिः संप्राप्ता? तस्य निखिलमपि सरसमुदंतं प्रकटीकृत्य मम हृदयाह्लादमुल्लासयत? अथैवंविधां परमप्रमोदसूचकां प्रदेश्यवनीशवाचं निशम्य केशिकुमारगणधरेंद्रोऽपि मेघगंभीरनिजध्वानेन प्रदेशिनृपालमनोमयूरमुल्लासयन्, मोहोग्रपंचाननंप्रति भयमुत्पादयन्नुवाच, तीर्थंकरजननादिकल्याणकारिकल्याणकोरुप्रभावेण निरस्ताखिलेतिसंभवसंतापे, जिनेशोपदेशसुधाधारातिसिक्तोरुभव्यक्षेत्रे मगधाख्ये जनपदे, मनोरम्यानेकहर्म्यालिपरिमंडितं, मनोहरफलप्रदा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नसमर्थामिताम्रादितरुनिकरपरिमंडितारामपरिवेष्टितं, निकटस्थोत्तुंगवैभारगिरिदंभेन निजर्द्धिनिर्जितनिखिलनगरनिकराधिगतयशःस्तंभेन विराजितं राजगृहाभिधं नगरमासीत, तत्र जैनधर्ममर्मज्ञः, पापभीरुतया दुर्गतिगमनविमुखः, संतुष्टयेव लक्ष्मीदेव्यापि सत्कृतः, सत्यप्रियवचश्चतुरो यज्ञप्रियाभिधो विप्रो वसतिस्म. तस्य स्वकीयरूपातिशयतिरस्कृतामरांगना, महार्घ्यनिर्मलशीलालंकारालंकृतदेहा, सकलकलाकलापकलिता, पतिभक्ता च यज्ञयशाभिधाना गृहिण्यासीत. तत्कुक्षिसरोराजहंससन्निभो निजोरुरूपेणापरमन्मथ इव निखिलनगरनारीनिकरप्रियः सुरप्रियाभिधस्तयोः सुनोऽभवत. वरेण्यतारुण्यारण्यगं निजतनयं विज्ञाय जगज्जंतुजातजिघांसकलक्ष्यपरपुष्पशरव्याधशरव्यशंकया जनको रूपगुणगणालंकृतयैकया द्विजकन्यया सह शुभदिने शुभमुहूर्ते तस्योद्वाहमकारयत्. सुरप्रियोऽपि जननीजनकसेवापरो नानाविधपंचेंद्रियसुखान्युपभुंजानो निजसमयं गमयतिस्म. तदनुपमरूपयौवनं निरीक्ष्य निखिलनगरनारीनिकराः स्त्रीस्वभावेन क्षोभं संप्राप्य मारविकारप्रेरितास्तत्संगममभिलषंतिस्म. परं पूर्वकृतपुण्यप्रभावेण जितेंद्रिययोगीव सुरप्रियो निजवस्त्रादि संकोचयन् पथि व्रजंस्तत्सन्मुखमपि नालोकयतिस्म.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथैकदा स सुरप्रियद्विजोत्तमः कस्मैचित्प्रयोजनाय पुरबहिस्तिलकोद्याने गतः. तत्रानिलोल्ल सन्निजकोमलपल्लवांगुलिभिस्तमाह्वयंत इव जंबूजंबीरनारंगाम्रादितरुवर आतिथेयविधित्सयेव सज्जा ना इव पक्कोरुसरसफलावलिभिः सत्कारयामासुः. इतस्तद्गहनविपिननिवासिनी काचिद्वनदेवता मानसोन्माथिमन्मथमिव तं निरीक्ष्य मारविकारप्रेरिता तत्प्रियोरूपं विधाय तत्सन्मुखं समागत्य संभोगार्थं प्रार्थयामास. सुरप्रियोऽपि साक्षात्तां निजप्रियां विलोक्य चेतसि चमत्कृतो जगाद. हे प्रिये! नानाविधश्वापदादिसमाकुलेऽस्मिन् गहने वने त्वमेकाकिनी कथं संप्राप्ता? सापि कटाक्षविक्षेपेण प्रकटं मनोभवविकारं दर्शयंत्युवाच, हे स्वामिन्! भवद्विरहानलविदग्धा गेहे स्थातुमसमर्था तृणपूलीवानंगानिलप्रेरिताहं त्वत्संगमामृताभिलाषयात्र समागतास्मि. अतो मम हृदयतृणकुटीरदहनपरं मदनानलमविलंबमेव संभोगामृतधारया त्वमुपशामय? अथैवं निर्लज्जं मारविकारं प्रकटयंतीमनुचितां च निजप्रियावाचं निशम्य संदेहदोलाधिरूढचित्तः सुरप्रियो दध्यौ. सतीशिरोमणिर्मम प्रिया प्राणांतेऽप्येवंविधां निर्लज्जां वाचं न वदेत्, न चाप्येकाकिन्यत्रागछेत्, न चाप्येवंविधं मन्मथविकारं प्रकटयेत्. अतो मम शीलपरीक्षणकरणविचक्षणा नूनमियं काप्यमरी विद्याधरी वा मम प्रियारूपं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधायात्रागता संभाव्यते. इति विचिंत्य सुरप्रियस्तु तदुपसर्गनिवारणार्थं तत्रैवाशोकतरुतलाधो मुनिरिव नमस्कारध्यानयुतः कायोत्सर्गेण संस्थितः. अथ सा वनदेव्यपि तं सुरप्रियं निर्विकारं विज्ञाय निजं रूपं प्रकटीकृत्योवाच, भो सुरप्रिय! तव शीलगुणाकृष्टाहं वनस्यास्याधिष्ठात्री देवी त्वदुपरि प्रसन्नास्मि, अतस्त्वं मनोवांछितं वरं याचस्व? सुरप्रियोऽपि कायोत्सर्गं पारयित्वा देवीचरणारविंदे प्रणम्योवाच, हे वनदेवते! यदि त्वं ममोपरि संतुष्टा, तर्हि वद? यदतः परं कियन्ममायुर्वर्तते? देव्यपि निजावधिज्ञानेनालोक्याकथयत, हे सुरप्रिय! अतःपरं केवलं मासैकपर्यंतं तव शेषमायुर्वर्तते, इत्युक्त्वा तस्य कंठे दिव्यं रत्नहारं निधाय सा वनदेवतांतर्दधौ. अथ सुरप्रियोऽपि निजनिकेतने समेत्य निजप्रियायै सकलमप्युदंतं गदित्वा पित्रोरनुज्ञां लब्ध्वा प्रियायुतो मुनिपार्श्वे संयमं गृहीत्वा नानाविधतपोऽनुष्टानैः संलेखनापूर्वकं निजशेषायुः संपूर्णीकृत्य शुभध्यानपरो मृत्वा देवलोके ययौ. ततश्च्युत्वा मनुजत्वमासाद्य संयमं च लब्ध्वा मुक्तिलक्ष्मीनिलये च गत्वा स शाश्वतामितशर्मभाग भविष्यति. अथैवंविधं गणधरेंद्राननचंद्रोद्भवं सुरप्रियनिदर्शनामृतं निपीय चंद्रकांतमणिरिवार्द्रहृदयः प्रदेशिभूपालो जगौ, हे भगवन्! अतःपरमहमपि सुरप्रिय इव स्वदारसंतुष्टश्चतुर्थं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहिव्रतं समाराधयिष्यामि. अथ हे भगवन्! परिग्रहपरिमाणरूपपंचमाणुव्रतविस्तरमपि सनिदर्शनं निदर्शयितुं ममोपरि कृपां कुरुत? मुनींद्रोऽपि स्वाननचंद्रोद्भवया चारुवचश्चंद्रिकया तच्चित्तचकोरमाह्लादयन्नुवाच, भो नृपाल! नानाविधधनधान्यादिपरिग्रहग्रहणैकचित्तो मनुजः संतोषपराङ्मुखो लोभपिशाचाभिभूतो ग्रथिल इव पर्यटन्नानानर्थकदर्थनसार्थसमर्जनसमर्थो भवति. यदुक्तं—भ्रांत्वा देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं । त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ॥ भुक्तं मानविवर्जितं परगृहे साशंकया काकवत् । तृष्णे देवि विडंबनेयमखिला निःशंकितं त्वत्कृता ॥ १ ॥ उत्खातं निधिशंकया क्षितितलं ध्माता गिरौ धातवो । निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संसेविताः ॥ मंत्राराधनतत्परेण मनसा नीता स्मशाने निशा । प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुंच मां ॥ २ ॥ अतोऽत्र परत्रापि निस्सीमसुखस्पृहयालुभिर्जनैः सकलवांछितपदार्थसार्थप्रदः संतोषचिंतामणिरेव स्वीकर्तव्यः. इच्छानिवृत्तिपराङ्मुखो मनुजो हि धरणवदनेकापत्परंपराभाजनं भवति. एवंविधमुनीशवचोऽमृतधारासिक्तः प्रदेशिनृपालः कदंबपुष्पमिव पुलकितांगो जगौ, हे भगवन्! कोऽसौ धरणः? कथं च स लोभाभिभूतः कदर्थनसार्थं संप्राप्तः? तन्निखिलमपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निदर्शनं दर्शयित्वा लोभोरगोग्रगरलव्याकुलं मां गारुडिक इव निस्सीमसुखभाजनं कुरु? अथैवं-विधां नृपालविज्ञप्तिमाकर्ण्य गणधरेंद्रोऽपि पंचानन इव निजध्वानैर्मोहगजेंद्रं वित्रासयन् जगाद, भो प्रदेशिभूपाल! अनेकोत्तुंगगिरिशृंगमुकुटायितानेकोरुजिननिकेतने महाराष्ट्राभिधजनपदे स्थाने स्थाने प्रकटायितकांचनैः स्वाभिधानं सफलीकुर्वदिव कांचनपुराभिधं नगरमासीत्. तत्र विनिर्जिता-खिलारातिततिस्त्रिलोचनाभिधो नरेंद्रः परमसुखेन राज्यं पालयतिस्म. तस्य क्षीरनीरवत्परमप्रीतिपात्रं क्षेमादित्याभिधः सुहृदासीत्. तस्यानेकगुणगणालंकृता रूपलावण्यविनिर्जिताप्सरोगणा साक्षाद्गेहल-क्ष्मीरिव वसुंधराभिधा गेहिन्यभूत. तयोराननश्रीविनिर्जितराकाशशांको नागरनिकरनेत्रचकोरामंदा-नंदप्रदो धरणाख्यः सुतोऽभवत्. अथैकदा स क्षेमादित्यो नगरबाह्योपवने गतो रसालैकरसालतरो-रधः कायोत्सर्गध्यानस्थं मूर्तिमंतं शांतरसमिव मुनिमेकं ददर्श. मुनिं दृष्ट्वा भावोल्लसितपुलकोत्कर-कवचेन लोभोग्रसुभटारिप्रहारतो निजात्मरक्षणं कुर्वन्निव तच्चरणारविंदं नत्वोचितस्थाने स समुपा-विशत. मुनिरपि पारितकायोत्सर्ग उपसर्गवर्गविदारणसमर्थधर्मलाभाशिषा तमुल्लासयामास. ततोऽ-सौ मुनिस्तं योग्यं विज्ञायोपदेशयतिस्म. भो सत्पुरुष! महारंभोपेतपरिग्रहलोभप्रवहणारूढः प्राणी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानाविभ्रमोद्दोत्पादकानेकपदार्थसार्थभीषणोच्छलत्कल्लोलैरुच्छालितः संसारसागरे ब्रुडन् हृदयस्थेच्छा निरोधतुंबिकयैव तार्यते. एवंविधं गुरूपदेशामृतं निपीयापास्ताधिकद्रव्यादितृष्णः क्षेमादित्यो गुरुतः परिग्रहपरिमाणव्रतं जग्राह. ततोऽसौ विनयेन गुरुं नत्वा निजगेहे समागत्य निरतिचारं स्वं व्रतं पालयतिस्म. अथ तारुण्यवरेण्यांगः क्षेमादित्यनंदनो धरणो मकर इव लोभांभोनिधावुच्छलन्नेकपापारंभासक्तो केवलमर्थार्जन एव कुशलो बभूव. एवं निजतनयं द्रव्यार्थमनेकपापारंभप्रसक्तं विज्ञायैकदा तं निजपार्श्वे समाहूयावदत, हे वत्स! भूरिपरिग्रहान्विताश्चक्रवर्तिनोऽपि षट्खंडराज्यलीलामपि निःसारां विज्ञाय तृणवत्त्यक्त्वा संयमं गृह्णंति. अतस्त्वं द्रव्यार्जनैकलोलुपः कथमनेकधा पापकार्याणि करोषि? एवं पित्रा बहुधोपदिष्टोऽपि धरणो निजाग्रहं न जहौ. अथ कदाग्रही धरणो पितुरुपदेशमनादृत्य भूमिपालं सेवयतिस्म. अथैकदा पुरोपांतोद्याने समागत एकः सिंहः कृषिवलादीनुपद्रवतिस्म. उपद्रुतैः कृषिवलैर्विज्ञप्तो नृपः सिंहमारणार्थं धरणाय समादिशत. द्रव्यलोलुपो धरणोऽपि नृपादेशं संप्राप्य द्रुतमेव सिंहहननार्थं विपिने ययौ. तत्र गत्वा शरोत्करैर्हरिं निहत्यासौ धरणो नृपपार्श्वे समेतो नृपाद्बहुसन्मानं भूरिद्रव्यपारितोषिकं च लेभे. एवं सिंहघाताल्लब्धपारितोषिको धरणो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितुरग्यर्णे समागत्य द्रव्यराशिमढौकयत्. परमादृतपरिग्रहपरिमाणव्रतेन पित्रा तद् द्रव्यं न समादृतं. अथ पितुः सन्मानमलब्ध्वा दूनो धरणो निजगृहिणीयुतः पृथग्गृहे संस्थितः, नृपाजसेवां च प्रकुर्वन् क्रमेण कुबेर इव कोटिद्रव्याधिपतिर्जातः. अथ निजपरमप्रीतिपात्रं धरण एकदा नृपेण कस्मैचित्कार्यार्थं प्राभृतयुतश्चोलनृपालपार्श्वे गंतुं समादिष्टः. भूरिद्रविणलोलुपो धरणोऽपि जलेंधनधनधान्यादिसामग्रीं प्रगुणीकृत्य प्रवहणं च पूरयित्वा जलनिधौ प्रयाणं चकार. इतस्तदभाग्यतोऽर्धमार्गे संवर्तकमहावायुर्ववौ, कल्पांतकालोन्मत्ता जगज्जंतुकवलीकरणोत्सुका राक्षसा इवातीवश्यामा मेघनिकराः परितो गगनांगणमाछादयामासुः. ब्रह्मांडभांडस्फोटसमर्था घनगर्जनध्वनयो दिग्मंडलमपितः पूरयंतिस्म. यमकिंकरनिकरकरगतासय इवायुग्रतेजःपुंजविराजितास्तडितः परितः स्फुरंतिस्म. अतीवोर्ध्वमुछलज्जलकल्लोलाः कंडुकमिव महदपि धरणप्रवहणमितस्ततः प्रोछालयंतिस्म. एवमुछलत्सलिलकल्लोलैर्मुहुर्मुहुस्ताड्यमानं तत्प्रवहणं भग्नं. जनगणसमेतं च जलनिधितले संप्राप्तं. लोभैकपिशाचवशंगतो धरणस्तु पूर्वकृतकिंचित्सुकृतानुयोगेन संप्राप्तफलको जलकल्लोलोपद्रुतः कियद्दिनैर्जलधेस्तटं संप्राप्तः. तत्र वने परिभ्रमन् निजलोभभावं निंदन् पश्चात्तापपरो जैनमुनिसमागमं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लब्ध्वा गृहीतपरिग्रहपरिमाणव्रतो निजनिकेतनं क्रमेण संप्राप्तः. क्षेमादित्योऽपि निजतनयं दृढपरिग्रहपरिमाणव्रतिनं विज्ञाय संतुष्टहृदयस्तस्मै गृहभारं समर्प्य स्वयं गृहीतसंयमः कालेन समाधिना पंचत्वमाप्य सुगतिं जगाम. अथ कियता कालेन पुनर्लोभपिशाचाभिभूतो धरणो निजव्रतमखंडयत्. प्रांते भग्नव्रतोऽसौ मृत्वा दुर्गतिं गतः. एवं केशिगणधरेंद्राननाद्धरणनिदर्शनं निशम्य प्रदेशिनृपालोऽपि परिग्रहपरिमाणव्रतं शुद्धभावेन जग्राह. ॥ इति श्रीजामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालेन विरचिते गद्यबंधे श्रीप्रदेशिनृपालचरित्रे पंचमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ षष्ठः सर्गः प्रारभ्यते ॥

अथैवं केशिगणधरेंद्रमुखाद् सनिदर्शनशेषश्राद्धव्रताधिकारं समाकर्ण्य प्रदेशिनृपालः शुभभावप्रेरितस्तानि जग्राह. एवं गृहीतद्वादशव्रतः प्रदेशिनृपालो गणधरेंद्रं नत्वा परिवारयुतश्च स्वगृहे समागत्य निरतिचारं व्रताराधनमकरोत्. निरंतरं याचकेभ्यो धाराधर इव वसुधारां वर्षन्, अष्टमीचतुर्दश्यादिपर्वतिथिषु गृहीतपौषधस्त्रिकालं च जिनार्चनं कुर्वन् शुद्धयोगत्रिको गुरुभक्तिं समाचरन्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स जिनधर्मोद्योतं करोतिस्म. अथैवं धर्मध्यानैकलीनो नृपो निखिलान्यपि राजकार्याणि त्यक्तवान्. एवं राजानं धर्मैकध्यानपरं नानाविधतपोविधानशुष्कशरीरं च विज्ञाय निजतीव्रविषयाभिलाषापरिपूर्णतया तदुपरि द्वेषं वहंती सूरिकांता राज्ञी तन्मारणोपायमचिंतयत्. अथ सा निजपुत्रं सूर्यकंतं समाहूय नृपमारणार्थं समादिशत्. एवं निजमातुर्दुष्टाभिलाषं विज्ञाय चेतसि खेदं समापन्नः सूर्यकंतस्तु मनागप्युत्तरं न ददौ. अथ सा साक्षाद्राक्षसीव दुष्टा सूरिकंता राज्ञी स्वयमेव राज्ञे विषमिश्रितं भोजनं ददौ. कृतस्नानजिनार्चनो नृपालो भोजनावसरे भोजनशालायां समागत्य दुष्टराज्ञीचेष्टामजानंस्तद्विषमिश्रितं भोजनमत्तिस्म. भोजनानंतरं सकलांगपरिणतविषज्वालाल्याकुलहृदयः प्रदेश्यवनीशो राज्ञीचेष्टितं विज्ञाय तदुपरि मनागपि द्वेषभावमधारयन् निजांतसमयं च विज्ञाय पौषधशालायां ययौ. तत्र स भूमिं प्रतिलिख्य कृतदर्भसंस्तारकः पूर्वाशाभिमुखः समुपविश्य पंचांगस्पृष्टभूमितलो निजधर्माचार्यं केशिगणधरेंद्रं मनसि निधाय नमस्कृतवान्. तदनंतरं समालोचितनिजव्रतातिचारः प्रत्याख्यातचतुर्विधाहारोऽर्हदादिचतुःशरणमंगीकृत्याराधनापूर्वकं शुभभावेन देहं त्यक्त्वा सौधर्मदेवलोके सूर्याभाख्ये विमाने तदधिपतिः सूर्याभाख्यो देवोऽभूत्. इत्युक्त्वा श्रीवर्धमानजिनेंद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इंद्रभूतिंप्रत्युवाच, भो इंद्रभूते! स एव सूर्याभसुरो भक्तिभावपुरस्सरं नाट्यादि विधाय निजसमृद्धिं च दर्शयित्वा निजस्थाने ययौ. अथेंद्रभूतिर्जिनेश्वरं प्रणम्यापृच्छत, हे भगवन्! कदा स सूर्याभसुरो मोक्षं गमिष्यति? भगवानुवाच भो इंद्रभूते! स सूर्याभसुरो देवलोकाच्च्युत्वा महाविदेहक्षेत्रे सुरपुराभिधपत्तने राजमान्यस्य धनदाख्यश्रेष्ठिनो गृहे रूपसौभाग्यसंपन्नोऽनेकगुणगणालंकृतः कलाकलापकुशलः कमलालंकृतपाणिपद्मो जिनधर्मैकमानसो दृढप्रतिज्ञाख्यः पुत्रो भविष्यति. प्राप्ततारुण्योऽपि विषयपराङ्मुखः स कथंचित्पित्रोराज्ञां समवाप्य धर्मघोषाख्यकेवलिनः पार्श्वे दीक्षां गृहीष्यति. चिरकालं संयमं च प्रपाल्य शुक्लध्यानपरः केवलज्ञानमवाप्यानेकभव्यसत्वान् प्रतिबोध्यासौ मोक्षं गमिष्यति. ॥ इति श्रीजामनगरनिवासिपंडितश्रावकहंसराजात्मजहीरालालेन विरचिते गद्यबंधे श्रीप्रदेशिनृपालचरित्रे षष्ठः सर्गः समाप्तः. ॥ श्रीरस्तु ॥

———

अथ ग्रंथकारप्रशस्तिः—अत्रास्ति जामनगरं नगरं गरिष्ठं । यस्मिञ्जिनेशनिलयोपरिगा पताका ॥ ऋद्धिं पुरस्य किल दर्शयितुं नृलोकं । लोलानिलेन लुलिताह्वयतीव रेजे ॥ १ ॥ तत्रौश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातिवणिजां मुकुटोपमस्तु । वंशो बभूव किल लालणनामधेयः ॥ तद्वंशमौक्तिकनिभोऽत्र बभूव
चेभ्यः । श्रीवर्धमान इति नाम विमंडितो वै ॥ २ ॥ विरचितमिह तेन मंदिरैक—मधिगततुंगत
या तिरस्कृताद्रि ॥ अगणितवसुना जिनेशबिंबैः । प्रवरतरैः परिमंडितं मनोज्ञम् ॥ ३ ॥ तस्य को-
टिध्वजस्याथो—ऽभूत्सुपुत्रः कलान्वितः ॥ नाम्ना जगडुशाहश्च । पापसंतापवर्जितः ॥ ४ ॥ तस्याभू-
च्छनभाजस्तु । पुत्रो गोवर्धनाह्वयः ॥ धनधान्यैश्च संपूर्णः । पुत्रादिपरिवारभाक् ॥ ५ ॥ अभूत्तस्य
सुतश्चारु—र्नाम्ना वलभजित्खलु ॥ कच्छदेशे हि मंत्रित्वं । प्राप्तं तेन ततादरम् ॥ ६ ॥ दृष्ट्वा तस्य
च चातुर्यं । भूमिपालोऽर्पयद्वराम् ॥ वर्षके सततं लक्ष—मुद्रिकादायिनीं तदा ॥ ७ ॥ श्रेष्ठिनोऽभू-
त्सुतस्तस्य । तुल्यस्तेन कलान्वितः ॥ चारुस्तु लालचंद्राख्यो । राज्यमानेन शोभितः ॥ ८ ॥ धन-
राजश्च तत्पुत्र—स्तस्य पुत्रस्तु शोभितः ॥ श्रेष्ठी ज्येष्ठाह्वयश्चासीत । परिवारैः समन्वितः ॥ ९ ॥
सत्यं श्राद्धव्रतं तेन । द्वितीयं परिपालितम् ॥ यावज्जीवं तथा त्यक्तं । श्रेयसे रात्रिभोजनम् ॥१०॥
तस्य सूनुवरसामजिदाह्वो । राजमान्य इव वारिधिदेशः ॥ रत्नमौक्तिकमणिप्रकराढ्यो—ऽत्राभवत्सु-
कमलापरिवृत्तः ॥ ११ ॥ हंसराज इति नामतोऽभव—त्तस्य सूनुरमितैर्गुणैर्युतः ॥ जैनशास्त्रवरवारि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धौ मनो । मीनतामभजदस्य सर्वदा ॥ १२ ॥ रचितं तत्पुत्रेण । हीरालालाह्वयेन चरितमिदं ॥ गतिमुनिनिधिभूमिमिते । संवत्सरे तथा वर्ये ॥ १३ ॥ इति ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.
चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ॥
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छसुनेतुरेते ॥ ३ ॥

---

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीप्रदेशिचरित्रं समाप्तं ॥

For Private And Personal Use Only